This brief sketch of Kuntaka's contributions to the problems of Sanskrit Poetics and his place in its history will, it is hoped, bring into prominence the importance of his long-lost text, a part of which is edited here for the first time. It is a matter of regret that the imperfect nature of the manuscript-material at our disposal makes it impossible to present the entire text as far as it has been recovered, but what is presented here, even imperfectly, constitutes an important part of the text which, taken with the summary of the unedited portion of the work, will contribute, it is hoped, notably to the study of the subject. The importance of Kuntaka's work has been entirely overshadowed by the later dominance of the Kashmirian school of Ānandavardhana and Mammaṭa; but even though his central theory of *vakrokti* was discredited and his own name lingered only as a half-forgotten propounder of an ingenious doctrine, it is yet an indication of the great value of his work that the main principles for which he contended were implicitly accepted by Mammaṭa, Ruyyaka and other later adherents of the rival Dhvani School.

The merits of Kuntaka's work are sufficiently obvious to require any further exposition. He writes in his *vṛtti* in a lucid, concise yet vigorous style and his choice of examples testifying to his

wide reading in literature[52], is judicious. He refuses in most cases to move along conventional lines and cite conventional illustrations. Whatever value may be attached to his somewhat extreme theory of *vakrokti* as the essence of poetry, and of his strange classification and nomenclature, there can be no doubt about the originality and freshness of his outlook, about his literary acumen and critical insight into the artistic requirements of poetry and about the many stimulating suggestions with which his work abounds and which have been in many cases developed by later theorists. He is concerned more with the formal requirements of poetry, but his critical analysis of the various *forms* of speech, which he classifies as *vakratā*, is an important contribution to the study of the subject, and could not be ignored by later schools. What Kuntaka really intended to do was, no doubt, systematising and extending the *alaṃkāra*-theory of Bhāmaha and Udbhaṭa and give a longer lease of life to the already doomed Alaṃkāra school, but his own system is unique in the sense that he posited *vakrokti* definitely as the essential principle and systematically analysed its implications as was never done by any of his predecessors. On the other hand, his great admiration for Ānandavardhana made him alive to the speculative aspects of the problem and take cognisance of *rasa* and *dhvani* under some forms of *vakrokti*, the scope of which

52 See Index for the large number of authors and works named or cited anonymously by Kuntaka.

was thus made comprehensive enough to include the results of all previous speculation and practically synonymous with all that constitutes poetry. A new turn was thus given to the old *alaṃkāra*-theory, but the views of the older exponents of this theory were not accepted in their entirety but were systematised and widened in the light of the speculations of other schools of thought.

It is rather unfortunate that we cannot wholly recover that part of Kuntaka's work which contained an acute analysis of the various poetic figures ; for here he evinces considerable analytical power as well as independence of judgment in his attempt at rethinking the entire subject and reconciling the old views with the new. He professes great admiration indeed for Bhāmaha, Daṇḍin and Udbhaṭa, but his judgment never forsakes him so far as to make him a slavish adherent to their views. He finds fault, for instance, with the characterisation of the so-called *rasālaṃkāras* made by these writers, criticises Bhāmaha's three kinds of *dīpaka*, anticipating the later classification of that figure, and rejects the claims of many poetic figures which had been admitted as such by his predecessors. If this part of his work could be entirely recovered, it would have enabled us to estimate more fully the influence of his views on later writers on the subject, like Mammaṭa and Ruyyaka, in the light of the large extent of borrowing or unacknowledged appropriation made by them of Kuntaka's writings.

9. Scope of the Present Edition

The scope of the present edition as well as the

nature and extent of the materials utilised have already been indicated above. For the text of the edited portion the available MS material cannot be taken as fully adequate for a scholarly edition; while for the résumé to ch. iii. and iv, I had to depend on a single corrupt and incorrect MS. The difficulties of editing from such poor materials need no detailed description, and will, to some extent, condone the many imperfections of the present edition. I venture however, to publish the text, even in this imperfect shape, out of a consideration of the great importance and originality of this rare and valuable work on Sanskrit Poetics; and I trust it will pave the way for a better edition by a more competent scholar who may be fortunate in possessing ampler materials.

In the critical footnotes the Madras MS is cited as A, and the Jesalmere MS as B, ending at p. 160.

In the résumé to ch. iii & iv, the corrupt nature of the MS will be a sufficient apology for the imperfections of the extracts quoted throughout. An attempt has been made to fill up conjecturally, wherever possible, the numerous *lacunae* which occur in this part, and these have been faithfully indicated by enclosing brackets (); while words, letters or sentences, supplied as wanted by the sense of a passage, are marked with the brackets []. Almost all the *kārikā*-verses appear missing in this part (ch. iii); but these have been restored conjecturally, with a few exceptions where the *vṛitti* could give us no help, from the *pratīkas* of the words explained in the commentary. In editing the text

itself, only unmistakable errors in spelling and the like have been corrected; all genuine alternative readings of the MS in these cases have been indicated in the footnotes. The *kārikā*-verses and the illustrative *ślokas* in the edited portion of the text are separately numbered to facilitate reference: and the numbering is my own. References are noted where the illustrative verses can be traced in the published poetical and dramatic literature, as well as in the anthologies and in the various older works on Alaṃkāra. Although these attestations do not profess completeness, they may be of some use in tracing the history of particular verses or of discussions of them in the older Alaṃkāra works. Out of more than 500 verses cited in the four chapters, about 100 have been left untraced. In this connexion I must acknowledge my obligations to the excellent index of *pratīkas* given in Dr. Thomas's scholarly edition of the *Kavīndra-vacana-samuccaya*. I may also mention that several verses are cited in the present work from the drama, entitled *Tāpasa-vatsa-rāja-carita*, by Anaṅgaharṣa Mātrarāja, which I could trace from the list of *pratīkas* given in Dr. Hultzsch's article on this unpublished drama in the *Nachrichten der Goettingischen Gesellschaft*, 1886, pp. 239-41. Dr. Nobel of Berlin Staats-bibliothek (now Professor at Marburg) kindly favoured me by verifying these references and comparing the readings of some of these verses from the Berlin MS of the drama, of which I also obtained a collation from an incomplete rotograph transcript (existing in the University Library at Bonn) lent to me by Prof Jacobi.

In preparing the text of this edition my indebtedness to Prof. Jacobi and to Dr. Thomas, as well as to my friend and one time colleague Mahāmahôpādhyāya Pandit Anantakṛṣṇa Śāstrī and to Pandits Rāmanātha Śāstrī and Rāmakṛṣṇa Kavi of the Madras Oriental MSS Library, has been more than once indicated above. Prof. Jacobi, who has laid me under obligation in many ways, did me the honour of announcing the first edition of this work in one of his learned articles published in the *Sitzungsberichte der Preussischen Akademie* xxiv, 1922. By dedicating this work to him, which owes so much to his generous suggestion and help for its inception, I have but imperfectly expressed, in common with many other students of Oriental literature, my respectful appreciation of the inspiration and general stimulus I have received from his writings as well as from his kind words. In preparing the second edition, Pandit Sivaprasad Bhattacharya, M. A., Sāhitya-śāstrin, Professor of Sanskrit at the Calcutta Presidency College, has helped me by going critically through the printed formes as they came out of the press and communicating to me several errors of the pen and print which had escaped me but most of which are now included in the list of Additions and Corrections. He also gave me an opportunity of discussing with him several doubtful verses included in the Résumé to ch. iii and iv. To these scholars, with whose names it is a pleasure and privilege to associate this modest work, I take this opportunity of returning my sincere thanks. My thanks are also due to the

authorities of the Dacca University and the Resident, Western Rajputana States, for getting a transcript of the Jesalmere Ms of this work for my use for this edition. To Dr. Narendranath Law, himself a well-known student of Indian History and Culture I am greatly obliged for his keen interest in this work and for his kindness in including it in his Oriental Series

A large number of small misprints have unfortunately crept in, for which I offer my apology to the generous reader. Most of them were inevitable in a book printed in a country where authors have to perform the functions discharged in Europe by press proof-readers, and authors as a rule are bad proof-readers of their own works: but some of the errors due to my own inadvertance are more serious. Where all these have been detected, they are included in the list of Additions and Corrections, which the reader is requested to consult when going through the work.

The present edition is nearly double the size of the last, and has been revised throughout and in parts rewritten. The editor can only hope that in spite of its many shortcomings, its usefulness will be commensurate with this increase in volume.

UNIVERSITY OF DACCA
November, 15, 1927.

S. K. DÉ

P. S. I have found another direct reference to Kuntaka and his work in Tripurāri's commentary

on the *Mālatī-mādhava* (ed. Nir. Sag. Press, Bombay, 1926). Alluding to Kuntaka's criticism (p. 12) of the verse *asāraṃ saṃsāraṃ* (*Mālatī-m.* v, 30), and its last line Tripurāri remarks : *ato "vidhi-vilasitaṃ sarvam aphalam" iti paṭhanīyam iti kuntaka-prabhṛtayaḥ kāvya tattvajñāḥ saḥ ṛdayāḥ* But Kuntaka's suggested emendation is different. Tripurāri appears to be a South Indian author. From the fact that Kuntaka is cited by a large number of South Indian authors it is possible that his work was held in esteem and studied there extensively, and that therefore manuscripts of the entire work may still be discovered there with diligent search.

CONSPECTUS OF EDITIONS OF TEXTS

to which references are made in the notes and introduction

Abhijñāna-śakuntala, ed. Monier Williams, Oxford 1876.

Amaru-śataka, ed. Kāvyamālā 18, 1916.

Alaṃkāra-sarvasva of Ruyyaka, with Jayaratha's Vimarśinī comm., ed. Kāvyamālā 35, 1893. Samudrabandha's vṛtti accompanies the text (called Alaṃkāra-sūtra) in the Trivandrum Sanskrit Series, no. 40, 1915.

Ekāvalī of Vidyādhara, ed. Trivedī, Bom. Sansk. Series, 1903.

Aucitya-vicāra-carcā of Ksemendra, ed. Kāvyamālā pt. i, 1886.

Kavīndra-vacana-samuccaya, ed. Thomas. Bibl. Indica, 1912.

Kādambarī, ed. Peterson, Bombay 1900.

Kāvya-prakāśa of Mammaṭa, ed. Vāmanācārya. Bom. Sansk. Series, 3rd ed., 1917. References to (1) °Uddyota on this work are to Candorkar's ed., Bombay 1915. (2) to the Saṃketa of Māṇikya-candra, to the Ānandāśrama edition, no. 89, 1921. (3) to Bhaṭṭagopāla's commentary, to Trivandrum edition, 1926.

Kāvyādarśa of Daṇḍin, with two commentaries, ed. M. Raṅgācārya, Madras 1910.

Kāvyānuśāsana of Vāgbhaṭa, with his own comm., ed Kāvyamālā 43, 1915.

Kāvyānuśāsana of Hemcandra with his own comm., ed. Kāvyamālā 70, 1901,

Kāvyālaṃkāra of Rudrata with Namisādhu's Ṭippaṇa, ed Kāvyamālā 2, 1909.

Kāvya-mīmāṃsā of Rājaśekhara, ed. Gaekwad's Oriental Series, no. 1, 1916.

Kāvyālaṃkāra of Bhāmaha, ed. Trivedī (as appendix to his ed. of Pratāpa-rudra in Bom. Sansk. Series, no. lxv, 1909).

Kavyālaṃkāra-sara of Udbhaṭa with Pratihareṇ-

duāja's Laghuvṛtti, ed. M. R Telang, Nirnaya Sag. Press, Bombay 1905.
Kāvyālmkāra-sūtra-vṛtti of Vāmana, with Govinda Tipoi Bhūpāla's comm., ed. Benares Sansk. Series, 1903.
Kāvya-kalpalatā by Arisiṃha and Amaracandra, ed. Benares 1886.
Kirātārjunīya, ed. Nirnaya Sag. Press, 1922.
Kumāra-sambhava, ed. Nirnaya Sag. Press, 1908.
Kuvalayânanda, ed. Nirnaya Sag. Press, 4th impression, 1913.
Gāthā-saptaśataka, ed. Weber, 2 vols., Leipzig 1870-81.
Gauḍa-vaho, ed. Bombay Sanskrit Series, 1887.
Citra-mīmāṃsā, ed. Kāvyamālā 38, 1907.
Caura-pañcāśikā, ed. Solf, Kiel 1886.
Tantrâkhyāyikā, ed. Hertel, Berlin 1910.
Tāpasa-vatsa-rāja-carita as in Berlin MS noticed in Weber 2166 and by Hultzsch in *Nachrichten der Goettingischen Gesllschaft*, 1886, no. 7, p. 224f.
Daśa-rūpaka, ed. Nirnaya Sag. Press, 2nd. impression, 1917.
Dhvanyâloka by the Dhvanikāra and Ânandavardhana, with Abhinava's Locana (i-iii), ed. Kāvyamālā 25, 1911. Locana iv, ed. S.K. De in *Journal of the Dept. of Letters*, Calcutta University, vol. ix. 1923.
Pāda-tāḍitaka-bhāṇa by Śyāmilaka, ed. Rāmakṛṣṇa Kavi and Rāmanātha Śāstrī. Śivapurī 1922.
Pratāpa-rudra-yaśo-bhūṣaṇa of Vidyānātha, ed. Trivedī, Bom. Sansk. Series no. 65, 1909.
Bala-rāmāyaṇa, ed. Govindadeva Śāstrī, Benares 1869.
Bhallaṭa-śataka, ed. Kāvyamālā pt. iv, 1899.
Mayūra-śataka, ed. Quackenbos, New York, 1917.
Mahānāṭaka, ed. Jīvānanda, Calcutta 1878.
Mālatī-mādhava, ed. Bhandarkar. Bombay Sansk. Series. Bombay 1913.
Mudrā-rākṣasa, ed, Telang. Bombay Sansk. Series, 1900.
Megha-dūta, ed. Hultzsch, London 1911.
Raghu-vaṃśa. ed. Nandargikar, 3rd. ed., Bombay 1897.
Ratnâvalī ed Parab Bombay 1895

Rasa-gaṅgādhara of Jagannātha, ed Kāvyamālā 12, 1916.
Rasārṇava-sudhākara of Śiṅgabhūpāla, ed. Trivandrum Sansk Series, no 1, 1916
Vāgbhaṭālamkāra, ed. Kāvyamālā 48, 1916.
Vikramōrvaśī, ed. Bombay Sansk Series, 1901.
Viddha-śālabhañjikā, ed. Arte, Poona 1886.
Veṇisaṃhāra, ed. Nirnaya Sag. Press 1915.
Vyakti-viveka of Mahimabhaṭṭa and its Vyākhyāna, ed. Trivandrum Sansk. Series, no 5, 1909.
Śārṅgadhara-paddhati, ed. Peterson, Bom. Sansk. Series, no. 37, 1888.
Śiśupāla-vadha ed. Nirnaya Sag. Press, 4th ed. 1905.
Sadukti-karṇāmṛta, references are as given in Thomas's Introd. to Kavīndra-vacana.
Sarasvatī-kaṇṭhābharaṇa of Bhoja, ed. Borooah, Calcutta 1884.
Sāhitya-darpaṇa of Viśvanātha Kavirāja, ed Durgāprasāda. Bombay 1915,
Subhāṣita-ratna bhāṇḍāgāra, compiled by Vāsudeva Lakṣmaṇa Śāstrī, Bombay, 1911.
Subhāṣitāvalī, ed. Peterson, Bom. Sansk Series no. 31, 1886.
Suvṛtta-tilaka of Kṣemendra, ed. Kāvyamālā pt. ii, 1886.
Sūktimuktāvalī of Jalhaṇa, references are as given in Index of verses in Bhandarkar's *Report* 1887-91.
Harṣa-carita, ed Fuehrer. Bombay Sansk. Series, 1909.

ERRATA

P. ii, l. 21, read *kuntakācāryaḥ*.

P. xvi, *l. 11*, read 'mere' for 'more.'

Printed by Mr Nalin Chandra Paul, B A at the Calcutta Oriental Press, 107, Mechuabazar Street.

श्रीरस्तु ।

श्रीमद्राजानककुन्तकविरचितं

वक्रोक्ति-जीवितम्

प्रथमोन्मेषः ।

जगत्त्रितयवैचित्र्य[1]चित्रकर्मविधायिनम् ।
शिवं शक्तिपरिस्पन्द[2]भाजोयकरणं नुमः ॥ १ ॥
यथातत्त्वं विवेच्यन्ते भावास्तैलोक्यवर्तिनः[3] ।
यदि तत्त्वाद्भुतं नाम देव[4]रक्ता हि किंशुकाः ॥ २ ॥
स्वमनोधि[5]क्यैवाय तत्त्वं तेषां यथारुचि ।
स्थाप्यते प्रौढिमात्रं तत्परमार्थो न[6] तादृशः ॥ ३ ॥
इत्यसत्तर्क[7]सन्दर्भे स्वतन्त्रेऽप्यक्षतादरः ।
साहित्याख्येसुधासिन्धोः सारमुद्धो[8]धयाम्यहम् ॥ ४ ॥
येन हितयमप्येतत्तत्त्वनिर्मिति[9]लक्षणम् ।
तद्विदामद्भुतामोद[10]चमत्कारं विधास्यति ॥ ५ ॥

ग्रन्थारम्भेऽभिमतदेवतानमस्कारकरणं समाचारः[11], तच्चात्तहेः दुपक्रमते—

) ०विचित्र्य० B. (2) The B MS is defective at the beginnin some of the words and sentences are lost. From ०न्द to नुमः lo

(3) ०दर्शिभि, in *Jesalmer Catalogue* p. 25. (4) ०ङ् pace for one letter) देव A. (5· These four letters are lost in I क B. (6) ०यं नि for र्थो न B. (7) ०त्तर्क० B. (8· क्षू B. (9 t in B. (10) ०मोदं B. (11) सा lost in B

वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम् ।
देवीं सूक्तिपरिस्यन्द[1]सुन्दराभिनयोज्ज्वलाम् ॥ १ ॥

इति[2] । देवीं वन्दे देवतां स्तौमि । कामित्याह—कवीन्द्रवक्त्रेन्दु-लास्यमन्दिरनर्तकीम्[3] । कवीन्द्राः कविप्रवरास्तेषां[4] वक्त्रेन्दुर्मुख-चन्द्रः स एव लास्यमन्दिरं नाट्यवेश्म तत्र[5] नर्तकीं लासिकाम् । किंविशिष्टाम्—सूक्तिपरिस्यन्दसुन्दराभिनयोज्ज्वलाम् । सूक्तिपरिस्यन्दाः सुभाषितविलसितानि[6] तान्येव सुन्दरा अभिनयाः[7] सुकुमाराः सात्त्विकादयस्तैरुज्ज्वलां भ्राजमानाम् । या किल सत्कविवक्त्रे लास्य-वेश्मनीव[8] नर्तकी सविलासाभिनयविशिष्टा नृत्यन्ती विराजते तां वन्दे नौमीति वाक्यार्थः । तदिदमत्र तात्पर्यम्—यत्किल प्रस्तुतं[9] वस्तु किमपि काव्यालङ्कारकरणं[10] तदधिदैवतभूतामेवंविधरामणीयक-हृदयहारिणीं वाग्रूपां सरस्वतीं स्तौमीति ।

एवं नमस्कृत्येदानीं वक्तव्यवस्तुविषय[11]भूतान्यभिधानाभिधेयप्रयो-जनान्याख्यायति ।

वाचो विषयनैयत्यमुत्पादयितुमुच्यते ।
आदिवाक्येऽभिधानादि निर्मितेर्मानसूत्रवत् ॥ ६ ॥

इत्यन्तरश्लोकः[12] ।

लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये ।
काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते ॥ २ ॥

अलङ्कारो विधीयते अलङ्करणं क्रियते । कस्य—काव्यस्य । कवेः

(1) परिस्यन्द lost in B. (2) missing in B. (3) °नन्दिरनर्तं° lost in B. (4) कविप्रवरा° B. (5) वक्त्रेन्दुमुख° with मु half-broken, त्र of तत्र lost, in B. (6) वि° lost in B (7) सुन्दराभिनया: B. (8) °वेश्म° lost in B. (9) °च प्रस्तुतं lost in A. (10) °काव्यालङ्करणं in A. (11) नमस्कृत्यैवं in A. वक्तव्य वि° lost in A. (12) A omits this.

क्रमं काव्यं तच्च[1]। ननु च सन्ति चिरन्तनास्तदलङ्कारास्तत्किमर्थमित्याह—अपूर्वैः, तद्व्यतिरिक्तार्थाभिधायी। तदपूर्वत्वं तदुत्कृष्टस्य तन्निकृष्टस्य च द्वयोरपि सम्भवतीत्याह—कोऽपि, अलौकिकः सातिशयः। सोऽपि किमर्थमित्याह—लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये असामान्याह्लादविधायिविचित्रभावसम्पत्तये। यद्यपि सन्ति अनघाः काव्यालङ्कारास्तथापि न कुतश्चिदप्येवंविधवैचित्र्यसिद्धिः। अलङ्कार-शब्दः शरीरस्य शोभातिशयकारित्वात्मुख्यतया कटकादिषु वर्तते, तत्कारित्वसामान्यादुपचारादुपमादिषु, तद्वदेव च[2] तच्छब्दशेषु गुणादिषु[3], तथैव च तदभिधायिनि ग्रन्थे। शब्दार्थयोरेकयोगक्षेमत्वादैक्येन व्यवहारः, यथा गौरिति शब्दः गौरित्यर्थ इति[4]। तदयमर्थः—ग्रन्थस्यास्यालङ्कार इत्यभिधानम्, उपमादिप्रमेयजातमभिधेयम्, उक्तरूपवैचित्र्यसिद्धिः प्रयोजनमिति।

एवमलङ्कारस्यास्य प्रयोजनमस्तीति स्थापितेऽपि तदलङ्कार्यस्य काव्यस्य प्रयोजनं विना सदपि तदनर्थकमित्याह—

धर्मादिसाधनोपायः सुकुमारक्रमोदितः।
काव्यबन्धोऽभिजातानां हृद्यालङ्कारकः ॥ ३ ॥

हृद्यालङ्कारकश्चित्तानन्दजनकः काव्यबन्धः सर्गबन्धादिर्भवतीति सम्बन्धः। कस्येत्याकाङ्क्षायामाह—अभिजातानाम्। अभिजाताः खलु राजपुत्रादयो धर्मादुपेयार्थिनो विजिगीषवः क्लेशभीरवश्च, सुकुमाराशयत्वात्तेषाम्। तथा[6] सत्यपि तदाह्लादकत्वे काव्यबन्धस्य

(1) नास A. (2) तद् A. (3) missing A. (4) These views are discussed in ध्वन्यालोक २।६, वामन १।१।२, काव्यादर्श २।१ (4) गुणेषु in A. (5) एति B. (6) तथापि A.

क्रीडनकादिप्रख्यता प्राप्नोतीत्याह[1]—धर्मादिसाधनोपायः। धर्मादेरुपेयभूतस्य चतुर्वर्गस्य[2] साधने सम्पादने तदुपदेशरूपत्वादुपायस्तत्प्रतिनिमित्तम्। तथापि तथाविधपुरुषार्थोपदेशपरैरपरैरपि शास्त्रैः किमपराद्धमित्यभिधीयते—सुकुमारक्रमोदितः। सुकुमारः सुन्दरः सहृदयहृदयहारी क्रमः परिपाटीविन्यासस्तेनोदितः कथितः सन्। अभिजातानामाह्लादकत्वे सति प्रवर्तकत्वात्काव्यबन्धो धर्मादिप्राप्त्युपायतां प्रतिपद्यते। शास्त्रेषु पुनः कठोरक्रमाभिहितत्वाद् धर्माद्युपदेशो दुरवगाहः। तथाविधे विषये विद्यमानोऽप्यकिञ्चित्कर एव। राजपुत्राः खलु समासादितसर्वविभवाः समस्तजगतो[3]व्यवस्थाकारितां प्रतिपद्यमानाः श्राव्योपायोपदेश[4]शून्यतया स्वतन्त्राः सन्तः समुचितसकलव्यवहारोच्छेदं प्रवर्तयितुं प्रभवन्तीत्येतदर्थमेतद्राज्यलक्ष्मी[5] व्यतीतसच्चरितराजचरितं तन्निदर्शनाय निबध्नन्ति कवयः। तदेवं शास्त्रातिरिक्तं प्रगुणमलङ्कृत्येव प्रयोजनं काव्यबन्धस्य।

सुखं पुरुषार्थसिद्धिलक्षणं प्रयोजनमास्तां तावत्, अन्यदपि लोकयात्राप्रवर्तननिमित्तं श्रुत्यसुहृत्स्वाम्यादिसमाराधनमनेन विना सम्यङ् न सम्भवतीत्याह—

व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।
सत्काव्याधिगमादेव नूतनौचित्यमाप्यते ॥ ८ ॥

व्यवहारो लोकवृत्तं तस्य परिस्पन्दो व्यापारः क्रियाक्रमलक्षणस्तस्य सौन्दर्यं रामणीयकं तद्व्यवहारिभिर्व्यवहर्तृभिः सत्काव्याधिगमादेव क्रमनीयकाव्यपरिज्ञानादेव नान्यस्माद् आप्यते लभ्यत इत्यर्थः। कीदृशं तत्सौन्दर्यम्—नूतनौचित्यम्। नूतनमभिनवमलौ-

(1) ॰त्यभिधत्ते B. (2) चतुर्वर्गस्य missing in A. B has सर्वस्य only. (3) ॰जगद्यापि॰ B. (4) श्राव्योपदेश B (5) ॰दर्शनेन तद्राज्य॰ B.

कैकमौचित्यमुचितभावो यस्य। तदिदमुक्तं भवति—महतां हि राजादीनां व्यवहारे वर्ण्यमाने तदङ्गभूताः सर्वे मुख्यामात्यप्रभृतयः समुचितप्रासङ्गिककर्तव्य[1] व्यवहारनिपुणतया निबध्यमानाः सकलव्यवहारिवृत्तोपदेशतामापद्यन्ते। ततः सर्वैः कश्चित्कमनीयकाव्ये कृतश्रमः[2] समासादितव्यवहारपरिस्पन्दसौन्दर्यातिशयः श्लाघनीय[3]फलभाग् भवतीति।

योऽसौ चतुर्वर्गलक्षणः पुरुषार्थस्तदुपार्जनविषयव्युत्पत्तिकारणतया काव्यस्य पारम्पर्येण प्रयोजनमित्याम्नातः, सोऽपि समयान्तरभावितया तदुपभोगस्य तत्फलभूताह्लादकारित्वेन तत्कालमेव पर्यवस्यति। ततस्तदतिरिक्तं किमपि सहृदयहृदयसंवादसुभगं तदालम्बनीयं प्रयोजनान्तरमभिधातुमाह—

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ॥ ५ ॥

चमत्कारो वितन्यते चमत्कृतिर्विस्तार्यते, ह्लादः पुनः पुनः क्रियत इत्यर्थः। केन—काव्यामृतरसेन। काव्यमेवामृतं तस्य रसस्तदास्वादस्तदनुभवस्तेन। क्वेत्यभिदधाति—अन्तश्चेतसि। कस्य—तद्विदाम्। तं विदन्ति जानन्तीति तद्विदस्तज्ज्ञास्तेषाम्। कथम्—चतुर्वर्गफलास्वादमप्यतिक्रम्य। चतुर्वर्गस्य धर्मादेः फलं तदुपभोगस्तस्यास्वादस्तदनुभवस्तमपि प्रसिद्धातिशयमतिक्रम्य विजित्य पराङ्मुखप्रायं सम्पाद्य। इदमभिप्रायः—योऽसौ चतुर्वर्गफलास्वादः प्रकृष्टपुरुषार्थतया सर्वशास्त्रप्रयोजनत्वेन प्रसिद्धः सोऽप्यस्य काव्यामृत-

(1) °तत्तद् for कर्तव्य B (2) क्वचित् for कश्चित् A, which splits up the compound, reading कमनीये and काव्ये (3) omitted in B.

वर्णचमत्कारकलामात्रस्य[1] न कामपि साम्यकलनां कर्तुमर्हतीति : दुःश्रव-दुर्भग-दुरधिगमत्वादिदोषदुष्टो[2] ऽध्ययनावसर एव दुःसहदुःखदायी शास्त्रसन्दर्भस्तत्कालकल्पितकमनीयचमत्कृतेः काव्यस्य न कथञ्चिदपि सधर्मामधिरोहतीत्येतदप्यर्थतोऽभिहितं भवति।

कटुकौषधयच्छास्त्रमविद्याव्याधिनाशनम्।
आह्लाद्यमृतवत्काव्यमविवेकगदापहम्[3] ॥ ७ ॥
आयत्याञ्च तदात्वे च रसनिस्यन्दसुन्दरम्।
येन सम्पद्यते काव्यं तदिदानीं विचार्यते ॥ ८ ॥

इत्यन्तरश्लोकौ।

अलङ्कृतिरलङ्कार्यमपोह्य विविच्यते।
तदुपायतया तत्त्वं सालङ्कारस्य काव्यता ॥ ६ ॥

अलङ्कृतिरलङ्करणम्, अलङ्क्रियते ययेति विग्रहः। सा विवेच्यते विचार्यते। यच्चालङ्कार्यमलङ्करणीयं वाचकरूपं वाच्यरूपं च तदपि विविच्यते। तयोः सामान्यविशेषलक्षणद्वारेण स्वरूपनिरूपणं क्रियते। कथम्—अपोह्य। निकृष्य[5] पृथक् पृथगवस्थाप्य, यत्र समुदायरूपे तयोरन्तर्भावस्तस्मादिभज्य। केन हेतुना—तदुपायतया। तदिति काव्यं परामृश्यते। तस्योपायस्तदुपायस्तस्य भावस्तदुपायता तया हेतुभूतया। तस्मादेवंविधो विवेकः काव्यव्युत्पत्त्युपायतां प्रतिपद्यते। दृश्यते च समुदायान्तःपातिनामसत्यभूतानामपि व्युत्पत्तिनिमित्तमपोह्य विवेचनम्। यथा—पदान्तर्भूतयोः प्रकृतिप्रत्ययोर्वाक्यान्तर्भूतानां पदानां चेति। यद्येवमसत्यभूतोऽप्यपोद्धारस्तदुपायतया[6] क्रियते तत् किं पुनः सत्यमित्याह—

(1) ॰मात्रस्यापि B. (2) ॰दुष्टत्वाद् B. (3) Quoted anonymously in वामनकाव्यालङ्कारकामधेनुवृत्ति (p. 6) (4) अलंकार्य A. (5) निःकृष्य B. (6) ॰दुपायता B.

तत्त्वं सालङ्कारस्य काव्यता। अयमत्र परमार्थः—सालङ्कारस्यालङ्करण[1]-सहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम्। तेनालङ्कृतस्य काव्यत्वमिति स्थितिः, न पुनः काव्यस्यालङ्कारयोग इति।

सालङ्कारस्य काव्यतेति समुच्चयतया किञ्चित् काव्यस्वरूपमास्तृतम्, निपुणं पुनर्न निश्चितम्। किंलक्षणं वस्तु काव्यव्यपदेशभाग् भवतीत्याह—

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि[2] ॥७॥

शब्दार्थौ काव्यं वाचको वाच्यं चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकमिति विचित्रैवोक्तिः[3]। तेन यत्केषाञ्चिन्मतं कविकौशलकल्पितकमनीयतातिशयः शब्द एव केवलं काव्यमिति[3], केषाञ्चिद् वाच्यमेव रचनावैचित्र्यचमत्कारकारि काव्यमिति, यच्चैतयमपि निरस्तं भवति। तस्माद् द्वयोरपि प्रतितिलमिव तैलं तद्विदाह्लादकारित्वं वर्तते, न पुनरेकस्मिन्। यथा—

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।
यदि सलीलालापिनि गच्छसि तत् किं त्वदीयं मे ॥ ९ ॥
अनुरणनरणितमेखलमविरतमिश्रान्तमञ्जुमञ्जीरम्।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते[4] ॥ १० ॥

प्रतिभादारिद्र्यदैन्यादतिसत्त्वसुभाषितेन कविना वर्णसावर्ण्यरम्यतामात्रमत्रोदितम्, न पुनर्वाच्यवैचित्र्यकणिका काचिदस्तीति। यत्किल

(1) ०कार० for ०करण० B. (2) महिमभट्ट (p. 28) and रुद्रट (p. 8) quote this verse in connexion with their exposition of the views of the वक्रोक्तिजीवितकार. (3) From विचित्रैवोक्तिः to केवलं काव्यमिति missing in B. (4) रुद्रट ii, 22—23.

नूतनतारुण्यतरङ्गितलावण्यलटहकान्तेः कान्तायाः कामयमानेन केनचिदेतदु[1]च्यते—यदि त्वं तरुणि रमणमन्दिरं व्रजसि तत्किं त्वदीयं[2] रणरणकमकारणं मम करोतीत्यतिग्राम्येयमुक्तिः। किञ्च, न अकारणम्[3], यतस्तस्यास्तदनादरेण गमनेन तदनुरक्तान्तःकरणस्य विरहविधुरताशङ्काकातरता कारणं रणरणकस्य। यदि वा परिसरणस्य मया किमपराद्धमित्यकारणतासमर्पकम्, एतदप्यतिग्राम्यतरम्। सम्बोधनानि च बहूनि मुनिप्रणीतस्तोत्रामन्त्रणकल्पानि न काञ्चिदपि तद्विदामाह्लादकारितां पुष्णन्तीति यत्किञ्चिदेतत्। वस्तुमात्रञ्च शोभातिशयशून्यं न काव्यव्यपदेशमर्हति। यथा—

प्रकाशस्वाभाव्यं विदधति न भावास्तमसि य-
त्तथा नैते ते स्युर्यदि किल तथा तत्र न कथम्।
गुणाध्यासाभ्यासव्यसनदृढदोषानुरगुणो
रविव्यापारोऽयं किमयमहहं तस्य महसः ॥ ११ ॥

अत्र हि शुष्कतर्कवाक्यवासनाधिवासित[4]चेतसा प्रतिभाप्रतिभातमात्रमेव वस्तु व्यसनितया कविना केवलमुपनिबद्धम्। न[5] पुनर्वाचकवक्रतावैच्छित्तिलवोऽपि लक्ष्यते। यस्मात्तर्कवाक्यग्रथ्येव शरीरमस्य श्लोकस्य। तथा च—तमोव्यतिरिक्ताः पदार्था धर्मिणः, प्रकाशस्वभावा न भवन्तीति साध्यम्, तमस्तथाभूतत्वादिति हेतुः। दृष्टान्तस्तर्हि कथं न दर्शितः, तर्कन्यायस्यैव चेतसि प्रतिभासमानत्वात्। तथोच्यते—

तद्भावहेतुभावौ[6] हि दृष्टान्ते तद्विदिनः।
ख्याप्येते विदुषां वाच्यो हेतुरेव हि केवलः ॥ १२ ॥

(1) ॰देवमु॰ B. (2) This word is missing in A. (3) किन्त्वकारणम् A.
(4) ॰विवसित A. (5) missing in B. (6) चेतस्यभावभावौ B.

इति[1]। विदधतीति विपूर्वो दधातिः करोत्यर्थे वर्तते। स च करोत्यर्थोऽत्र[2] न सुस्पष्टसमन्वयः, प्रकाशस्वाभाव्यं न कुर्वेत्तीति। प्रकाशस्वाभाव्यशब्दोऽपि त्वित्थ एव। प्रकाशः स्वभावो यस्यासौ प्रकाशस्वभावः, तस्य भाव इति भावप्रत्यये विच्छिति पूर्ववदस्य वृद्धिः प्राप्नोति। अथ स्वभावस्य भावः स्वाभाव्यमित्यत्रापि भावप्रत्ययान्ता[3]-द्भावप्रत्ययो न प्रचुरप्रयोगार्हः। तथा च[4] प्रकाशस्वभावो स्वाभाव्यं चेति विशेषणसमासोऽपि[5] न समीचीनः। हतौ च पादेऽत्यन्त-समर्पकसमासभूयस्त्ववैशद्यं न तद्विदाह्लादकारितामावहति[6]। रवि-व्यापार इति रविशब्दस्य प्राधान्येनाभिमतस्य समासे गुणीभावो न विवक्षितः, पाठान्तरस्य 'रवेः' इति सम्भवात्।

ननु[7] वस्तुमात्रस्याप्यलङ्कारशून्यतया कथं तद्विदाह्लादकारित्व-मिति चेत्तव[8]; यस्मादलङ्कारेणाप्रस्तुतप्रशंसालक्षणेनान्यापदेशतया[9] स्फुरितमेव कविचेतसि प्रथमं च प्रतिभाप्रतिभासमानसघटितपाषाण-शकलकल्पमणिप्रख्यमेव वस्तु विदग्धकवि[10]विरचितवक्रवाक्योपारूढं शाणोल्लीढमणिमनोहरतया तद्विदाह्लादकारिकाव्यत्वमधिरोहति। तथा चैकस्मिन्नेव वस्तुन्यवर्णितानवर्णितकविविरचितं वाक्यद्वय-मिदं महदन्तरमावेदयति—

मानिनीजनविलोचनप्रभा-
नुष्णबाष्पकलुषानभिघ्नन्।
मन्दमन्दमुदितः प्रयो खे[11]
भीतभीत इव शीतमयूखः[12] ॥ १३ ॥

(1) Missing in B. (2) अत्र missing in A. (3) ॰प्रत्यया॰ A. (4) तथापि A. (5) अपि wanting in A. (6) ॰मावहतीति B. A reads ॰मावक्रतीति. (7) सदैवं B. (8) चेन्न A. (9) ॰देशालक्षणेन A. (10) ॰कवि wanting in A. (11) Missing in B. (12) विरात॰ is, as ॰मतिशाय on वृद्ध p. 69 (anon).

क्रमादेकद्वित्रि[1]प्रभृतिपरिपाटीः[2] प्रकटयन्
कलाः खेलं खेलं नवकमलकन्दाङ्कुरुचः ।
पुरस्त्रीणां प्रेयोविरहदहनोद्दीपितदृशां
कटाक्षेभ्योबिभ्यद्विभृत इव[3] चन्द्रोऽभ्युदयते ॥१४॥

एतयोरुक्तं सहृदयहृदयसंवेद्यमिति तैरेव विचारणीयम्। तस्मात्[4] स्थितमेतत्—न शब्दस्यैव रमणीयताविशिष्टस्य केवलस्य काव्यत्वम्, नाप्यर्थस्येति[5]। तदिदमुक्तम्—

रूपकादिरलङ्कारस्तथान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनितामुखम्[6] ॥१५॥
रूपकादिमलङ्कारं वाच्यमाचक्षते परे।
सूपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ॥१६॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः[7] ॥१७॥

तेन शब्दार्थौ द्वौ सम्मिलितौ काव्यमिति स्थितम्। एवमवस्थापिते द्वयोः काव्यत्वे कदाचिदेकस्य मनाङ्मालिन्यूनतायां सत्यां काव्यव्यवहारः प्रवर्तेतेत्याह—सहितावितिः। सहितौ[8] सहित[9]भावेन साहित्येनावस्थितौ। ननु च वाच्यवाचकसम्बन्धस्य विद्यमानत्वादेतयोर्न कथञ्चिदपि साहित्यविरहः, सत्यमेतत्। किन्तु विशिष्टमेवेह साहित्यमभिप्रेतम्। कीदृशम्?—वक्रतावैचित्र्यगुणालङ्कार[10]सम्पदां परस्परस्पर्धाधिरोहः। तेन

(1) •कद्वित्रि lost in A. (2) •पाटि B. (3) निभृतमिव B. (4) A read तैरेव विचारणीयम् स्थित• etc. (5) Quoted in काव्यालङ्कार• on वामनालङ्कार• (p. 6). (6) वनितामुखम् B. (7) पुनः for तु नः B. This passage is from काव्यालङ्कार i., 13-15. (8) Missing in A. (9) सह• A. (10) B adds संस्कार.

सम[1]सर्वगुणौ मन्तौ मुहृदाविव सङ्गतौ ।
परस्परस्य शोभायै शब्दार्थौ भवतो यथा ॥ १८ ॥
ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी ।
दधे कामपरिक्षामकामिनीगण्डपाण्डुताम्[2] ॥ १९ ॥

अत्राऽरुणपरिस्पन्दमन्दीकृतवपुषः शशिनः कामपरिक्षामकृशेः कामिनीकपोलफलकस्य च पाण्डुत्वसाम्यसमर्थना[3]दर्थालङ्कारपरिपोषः शोभातिशयमावहति । वक्ष्यमाण[4]वर्णविन्यासवक्रतालक्षणः शब्दालङ्कारोऽप्यतितरां रमणीयः । वर्णविन्यासविच्छित्तिविहिता लावण्यगुण[5]सम्पदस्त्येव । यथा च[6]

लीलाइ कुवलअं कुवलअं व सीसे ससुव्वहंतेण ।
सेसेण सेसपुरिसाण पुरिसआरो समुव्वसिओ[7] ॥ २० ॥

अत्राप्यप्रस्तुतप्रशंसोपमालक्षणवाच्यालङ्कारवैचित्र्यविहिता हेलामात्रविरचितयमकानुप्रासहारिणी समर्पकत्वसुभगा कापि काव्यच्छाया सहृदयहृदयमाह्लादयति ।

द्विवचनेनात्र वाच्यवाचकजातिद्वित्वमभिधीयते । व्यक्तिद्वित्वाभिधाने पुनरेकपदव्यवस्थितयोरपि काव्यत्वं स्यादित्याह—बन्धे व्यवस्थितौ । बन्धो वाक्यविन्यासः, तत्र व्यवस्थितौ विशेषेण[8] लावण्या-

(1) Wanting in A. (2) Quoted in काव्यमीमांसा p. 67 (anon), Hemacandra p. 206 (anon), मम्मट p. 496 (anon). This verse is attributed to वाल्मीकि in सुभाषितावली (no. 2153), and to महाभारत by some commentators on मम्मट (See. Jhalakikar's commentary on the verse in his ed. of काव्यप्रकाश). But it can not be traced in either epic. (3) समवय for समर्थन in B. (4) In ch. 1, 19. (5) Defined in ch. 1, below (6) Wanting in A. (7) The छाया would be—"लीलया कुवलयं कुवलयमिव शीर्षे समुद्वहता । शेषेण शेषपुरुषाणां पुरुषकारः समुद्वसितः ।" B reads समुपवसित for समुव्वसिओ. (8) विशेषेणोपस्थितौ A,

देगुणालङ्कारशोभिना सन्निवेशेन कृतावस्थानौ। सहिता[1] वित्यत्रापि यथायुक्ति स्वजातीयापेक्षया शब्दस्य शब्दान्तरेण वाच्यस्य वाच्यान्तरेण च साहित्यं परस्परस्पर्धित्वलक्षणमेव विवक्षितम्। अन्यथा तद्विदाह्लादकारित्वहानिः प्रसज्येत। यथा

असारं संसारं परिसुषिततरङ्गं त्रिभुवनं
निरालोकं लोकं मरणशरणं बान्धवजनम्।
अदर्पं कन्दर्पं जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः[2] ॥ २१ ॥

[3] अत्र किल कुचिच्चन्द्रे कश्चिद्वाचालिकः कामपि कान्तां[4] व्यापादयितुमध्यवसितो भवन्नेवमभिधीयते—यदप[5]गतसारः संसारः, शून्यरसवत्स्वं त्रैलोक्यम्, आलोकनीयकमनीयवस्तुवर्जितो जीवलोकः, सकललोकलोचननिर्माणं निष्फलप्रायम्, त्रिभुवनविजयित्व[6]दर्पहीनः कन्दर्पः, जगज्जीर्णारण्यकल्पजनया विना भवतीति किं त्वमेवंविधम[7]करणोद्यं कर्तुं व्यवसित इति। एतस्मिन्[8] श्लोके महावाक्यकल्पे वाक्यान्तराण्यवान्तरवाक्यसदृशानि तस्याः सकललोकलोभनीयलावण्यसम्पत्तिपादनपराणि परस्परस्पर्धीन्यतिरमणीयान्युपनिबद्धानि कमपि काव्यच्छायातिशयं पुष्णन्ति। मरणशरणं बान्धवजनमिति पुनरेतेषां न कलामात्रमपि स्पर्धितुमर्हतीति न तद्विदाह्लादकारि। बहुषु च रमणीयेष्वेकवाक्योपयोगिषु[9] युगपत् प्रतिभासपदवीमवतरत्सु[10] वाक्यार्थपरिपूरणार्थं तत्प्रतिभं प्राप्तुमपरं प्रयत्नेन प्रतिभा प्रसाद्यते। तथा चास्मिन्नेव प्रस्तुतवस्तुसम्बन्ध[11]चारित्वस्वभावमपि सुप्रापमेव—"विधिमपि विपन्नाद्भुतविधिम्" इति। प्रथमप्रतिभासपदार्थप्रतिनिधिपदार्थान्तरा-

(1) व्यवसितः for सहिताः A. (2) मालतीमाधव v. 30 (3) B adds इति here. (4) कामिनीं B. (5) दर्पेण A. (6) °विजयी च A. (7) त्वमेवम° A. (8) अस्मिन् A. (9) °पयोगिषु A. (10) °मनुभवत्सु A. (11) सम्बन्ध lost in A.

सर्वत्रैव सुकुमारतरापूर्व[1] समर्पणेन कामपि काव्यच्छायां[2] मुद्भावयन्ति कवयः। यथा

रुद्रद्वेस्तुलनं स्वकण्ठविपिनोच्छेदो हरेर्वासनं
कारावेश्मनि पुण्यकापहरणम्[3] ॥ २२ ॥

इत्युपनिबद्धा पूर्वोपनिबद्धपदार्थानुरूपवस्त्वन्तरासम्भवादपूर्वमेव "यस्येदृशाः केलयः"[4] इति न्यस्तम्, येनाऽन्येऽपि कामपि क्रमणीयतामनीयन्त। यथा च

तद्वक्त्रेन्दुविलोकनेन दिवसो नीतः प्रदोषस्तथा
तस्योष्ठेन निशापि मन्मथकृतोल्लाहिस्तदङ्गार्पणैः।
तां सम्प्रत्यपि मार्गदत्तनयनां द्रष्टुं प्रवृत्तस्य मे
बद्धोत्कण्ठमिदं मनः किम्[5] ॥ २३ ॥

इति[6] सम्प्रत्यपि[6] तामेवंविधां वीक्षितुं प्रवृत्तस्य[7] मम मनः किमिति बद्धोत्कण्ठमिति परिसमाप्तेऽपि[8] तथाविधवस्तुविन्यासो विहितः—"अथवा प्रेमासमाप्तोत्सवम्" इति, येन पूर्वेषां जीवितमिवा[10]पितम्।

यद्यपि[11] इयोरप्येतयोरुत्तरार्धान्येनैव वाक्येनोपनिबन्धः, तथापि कविप्रतिभाप्रौढिरेव प्राधान्येनावतिष्ठते। शब्दस्यापि शब्दान्तरेण सादृश्यविरहोदाहरणं यथा

(1) ॰तरापर B. (2) काव्यशोभा॰ A. (3) बालरामायण 1, 51 (p. 24) = रसार्णवसुधाकर p. 108 (anon). (4) ibid. *loc cit* (5) नागानन्दराजचरित, Berlin MS, fol. 1, 68a (See Weber, *Berlin Cat.* ii, no. 2166; also see Hultzsch in *Nach. Goett Gesellsch*, 1886, no. 7, p. 235). Quoted in ॰*Locana* (p. 151, two lines). Hemacandra, comm. pp. 121-122. (6) Lost in A. (7) Wanting in A. (8) समाप्ते A. (9) किमथवा A. (10) ॰मिव A. (11) यदि वा A.

चारुता वपुरभूषयद्यासां तामनन्तनवयौवनयोगः ।

तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसङ्गमभूषः[1] ॥ २४ ॥

दयितसङ्गमस्तामभूषयदिति व्यक्तव्ये कौट्यो मदः, दयितसङ्गमो भूषा यस्येति, दयितसङ्गमशब्दस्य प्राधान्येनाभिमतस्य[2] समासहत्तावन्तर्भूतत्वाद् गुणीभावो न तद्विदाह्लादकारी। दीपकालङ्कारस्य च काव्यशोभाकारित्वेनोपनिबद्धस्य निर्वहणावसरे त्रुटितप्रायत्वात्[3] प्रक्रमभङ्गविहितं सरसहृदयवैरस्यमनिवार्यम्। 'दयितसङ्गतिरेनम्' इति पाठान्तरं[4] सुलभमेव।

द्वयोरप्येतयोरुदाहरणयोः[5] प्राधान्येन प्रत्येकमेकतरस्य साहित्यविरहो व्याख्यातः। परमार्थतः[6] पुनरुभयोरप्येकतरस्य साहित्यविरहोऽन्यतरस्यापि पर्यवस्यति। तथा चार्थः समर्थवाचकासद्भावे स्वात्मना स्फुरन्नपि मृतकल्प एवावतिष्ठते। शब्दोऽपि वाक्योपयोगिवाच्यासम्भवे[7] वाच्यान्तरवाचकः सन् वाक्यस्य[8] व्याधिभूतः प्रतिभातीत्यलमतिप्रसङ्गेन।

प्रकृतन्तु। कौट्यो बन्धे—वक्रकविव्यापारशालिनि। वक्रो योऽसौ शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकी षट्प्रकारवक्रताविशिष्टः कविव्यापारस्तत्क्रियाक्रमस्तेन शालते श्राघते यस्तस्मिन्[9]। एवमपि कष्टकल्पनोपहतेऽपि प्रसिद्धव्यतिरेकिवस्तूल्लेखाह—तद्विदाह्लाद-

(1) शिशुपाल० x, 33. (2) The text is corrupt here in A and some words are missing. It reads मदः कौट्यो[illegible]भेनाभिमतस्य and omits दयितसङ्गमो भूषा etc. up to प्राधा०. (3) कुटिलत्वात् A. (4) A is corrupt and omits all words from पनिबन्धं to पाठान्तरम् (5) उदाहरणयोः omitted in A. (6) Missing in A. (7) A reads वाच्योपयोगिसम्भवे (8) वाच्यस्य B. (9) This explanation is quoted by वसुदेवस्य (p. 8) and महिमभट्ट (p. 28).

कारिणि। तदिति काव्यपरामर्शः। तद्विदन्तीति तद्विदस्तज्ज्ञा[1]-स्तेषामाह्लादमानन्दं करोति यस्तस्मिन् तद्विदाह्लादकारिणि बन्धे व्यवस्थितौ। वक्रतां[2] वक्रताप्रकारांस्तद्विदाह्लादकारित्वं च प्रत्येकं यथावसरमेवोदाहरिष्यते[3]।

एवं काव्यस्य सामान्यलक्षणे विहिते विशेषलक्षणमुपक्रमते। तत्र शब्दार्थयोस्तावत्स्वरूपं निरूपयति—

वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।
तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः ॥८॥

इति एवंविधं[4] वस्तु प्रसिद्धं प्रतीतम्—यो वाचकः स[5] शब्दः, यो वाच्यस्याभिधेयः सोऽर्थ इति। ननु च द्योतकव्यञ्जकावपि शब्दौ सम्भवतः, तदसंग्रहात्कथमव्याप्तिः[6], यस्मादर्थप्रतीतिकारित्वसामान्यादुपचारात्तावपि वाचकावेव। एवं द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचाराद्वाच्यत्वमेव। तस्माद् वाचकत्वं वाच्यत्वं च शब्दार्थयोर्लोके सुप्रसिद्धं यद्यपि लक्षणम्, तथाप्यस्मिन् अलौकिके काव्यमार्गे[7] कविकर्मवर्त्मनि अयमेतयोर्वक्ष्यमाणलक्षणः[8] परमार्थः किमप्यपूर्वं तत्त्वमित्यर्थः। कीदृशमित्याह—

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारिस्वस्यन्दसुन्दरः ॥ ९ ॥

स शब्दः काव्ये, यस्तस्मिन्नुचित[9]समस्तसामग्रीकः। कीदृक्—

(1) तज्ज्ञा missing in A. (2) Wanting in A. (3) ०ष्यते A. (4) ०विधं mitted in A. (5) omitted in A. (6) न काव्यव्याप्तिः for नाव्याप्तिः A. (7) मार्गे only, A. (8) वक्ष्यमाणः only, B. (9) A is corrupt here and reads ०समुचितः समस्तपदेषु, dropping all the words from समुचितसमस्त सामग्रीकः to ०पदेषु.

विवक्षितार्थैकवाचकः। विवक्षितो योऽसौ वक्तुमिष्टोऽर्थस्तदेकवाचकः, तस्यैकः केवल एव वाचकः। कथम्—अन्येषु सत्स्वपि। अपरेषु तद्वाचकेषु बहुष्वपि विद्यमानेषु। तथा च—सामान्यात्मना वक्तुमभिप्रेतो योऽर्थस्तस्य विशेषाभिधायी शब्दः सम्यग् वाचकतां न प्रतिपद्यते। यथा[1]

कल्लोलवेल्लितदृषत्कठोरहारे
रत्नान्यमूनि मकराकर मा वमंस्थाः।
किं कौस्तुभेन भवतो विहितो न नाम
याञ्ञाप्रसारितकरः पुरुषोत्तमोऽपि[2] ॥ २५ ॥

अत्र रत्नसामान्योत्कर्षाभिधानमुपक्रान्तम्। कौस्तुभेनेति रत्नविशेषाभिधायी शब्दस्तद्विशेषोत्कर्षाभिधानमुपसंहरतीति प्रक्रमोपसंहारवैषम्यं न शोभातिशयमावहति। न चैतदुक्तं शक्यते—यः[3] कश्चिद्विशेषे[4] गुणग्रामगरिमा विद्यते स सर्वसामान्येऽपि सम्भवत्येवेति। यस्मात्[5]

वाजिवारणलोहानां काष्ठपाषाणवाससाम्।
नारीपुरुषतोयानामन्तरं महदन्तरम्[6] ॥ २६ ॥

तस्मादेवंविधे विषये सामान्याभिधायिन्येव शब्दः सहृदयहृदयहारितां प्रतिपद्यते। तथा चास्मिन् प्रक्रान्ते पाठान्तरं सुलभमेव—"एकेन किं न विहितो भवतः स नाम" इति। यत्र विशेषात्मना वस्तु प्रतिपादयितु[7]मभिमतं तत्र विशेषाभिधायकमेवाभिधानं निबध्नन्ति कवयः। यथा

(1) Omitted in A (2) मङ्कटशतक 62 (=सुभाषितावली no. 866, भागवतविष्णुशर्म=काव्यप्रकाश p 397, anon) मङ्कट also notes the पाठान्तर. (3) यदेक. A. (4) °विशेष A (5) यत A. (6) सन्ध्याभाषा, ed. Hestel, i 40 (=सुभाषितरत्नभाण्डागार, p. 170 anon) (7) प्रतिभासयितु A.

इयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमतो कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी[1] ॥ २० ॥

अत्र[2] परमेश्वरवाचकशब्दसहस्रसम्भवेऽपि कपालिन इति भीमरसालम्बनविभाववाचकः शब्दो जुगुप्सापदत्वेन प्रयुज्यमानः कामपि वाचकवक्रतां विदधाति। 'सम्प्रति' 'इयं' चेत्यतीवरमणीयम्—यत् किल पूर्वमेका सैव[3] दुर्व्यसनदूषितत्वेन शोचनीया सञ्जाता, सम्प्रति पुनस्तया तस्यास्तथाविधदुरध्यवसायसाहायकमिवारब्धमित्युपहस्यते। 'प्रार्थना'-शब्दोऽप्यतितरां रमणीयः, यस्मात् काकतालीययोगेन सत्समागमः कदाचिन्न वाच्यतावहः। प्रार्थना पुनरत्यन्तं कौलीनकलङ्ककारिणी। 'सा च' 'त्वं च' इति द्वयोरप्यनुभूयमानपरस्परस्पर्धिलावण्यातिशयप्रतिपादनपरत्वेनोपात्तम्। 'कलावतः' 'कान्तिमती' इति च मत्वर्थीयप्रत्ययेन[4] द्वयोरपि प्रशंसा प्रतीयत इत्येतेषां प्रत्येकं कविदप्यर्थः शब्दान्तराभिधेयतां नोल्लङ्घते। कविविवक्षितविशेषाभिधानक्षमत्वमेव वाचकत्वलक्षणम्, यस्मात्प्रतिभायां तत्कालोल्लिखितेन केनचित्परिस्पन्देन परिस्फुरन्तः[5] पदार्थाः प्रकृतप्रस्तावसमुचितेन केनचिदुत्कर्षेण वा समाच्छादितस्वभावाः सन्तो विवक्षाविधेयत्वेना[6]-

(1) कुमारसम्भव v, 71 (= काव्यप्रकाश pp. 239, 308, 376 = Hemacandra, pp. 144, 174, इति p. 28 = व्यक्तिविवेक p. 40 etc.). A reads पिनाकिनः (for कपालिनः) and कलात्मनः (for कलावतः), which readings are given in some editions and MSS of कुमार०. (2) Hemacandra in his इति utilises (p. 139) this passage anonymously up to प्रशंसा प्रतीयते. (3) पूर्वमेकासौ च B. (4) त्वमतुप्प्रत्ययेन B. (5) There is a gap for the two syllables रिस्फु in A. (6) A reads विवक्षिता० only.

भिधेयतापदवीमवतरन्तस्तयाविधविशेषप्रतिपादन[1]समर्थेनाभिधानेनाभिधीयमानाश्चेतन[2]चमत्कारितामापद्यन्ते। यथा

संरम्भः करिकोटमेघशकलोद्देशेन सिंहस्य यः
सर्वस्यैव स जातिमात्र[3]विहितो हैवाकलेशः किल।
इत्याशाद्विरदच्छटाम्बुदघटाबन्धेऽप्यसंरम्भवान्
योऽसौ कुल चमत्कृतेरतिशयं यात्वस्विकाकेसरी[4] ॥२८॥

अत्र[5] करिणां 'कोट'-व्यपदेशेन[6] तिरस्कारः, तोयदानां च 'शकल'-शब्दाभिधानेनानादरः, 'सर्वस्य' इति यस्य कस्यचित्तुच्छ[7]तरप्रायस्येत्यव[8]-हेला, जातेश्च 'मात्र'-शब्दविशिष्टत्वेनावलेपः, हैवाकस्य 'लेश'-शब्दाभिधानेनाल्पताप्रतिपत्तिरित्येतैः विवक्षितार्थैकवाचकत्वं द्योतयन्ति। 'घटाबन्ध'[9]-शब्दश्च प्रस्तुतमहत्त्वप्रतिपादनपरत्वेनोपात्तस्तन्निबन्धनतां प्रतिपद्यते। विशेषाभिधानाकाङ्क्षिणः पुनः पदार्थस्वरूपस्य तत्प्रतिपादनपरविशेषणशून्यतया शोभाहानिरुत्पद्यते। यथा

तत्रा[10]नुल्लिखितास्त्रमेव निखिलं निर्माणमेतद्विधे-
रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा।
याताः[11] प्राणभृतां मनोरथगतीरुल्लङ्घ्य यत्सम्पद-
स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम्[12] ॥२९॥

अत्र 'आभास'-शब्दः स्वयमेव मात्रादिविशिष्टत्वमभिलषँल्लक्ष्यते। पाठान्तरम्—"छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता"

(1) ०पादन lost in A. (2) ०चेतः A. (3) ०लिप्त० lost in A. (4) This verse is discussed in व्यक्तिविवेक pp. 37f, 57 = Hemacandra p. 173 (anon). (5) Hemacandra appropriates in his वृत्ति (p. 173) this passage up to चमत्कारप्रतिपत्ति'. (6) ०व्यपदेश B. (7) ०क्षुच्छ A. (8) ०त्व A. (9) घटा only, A. (10) यत्रा A. (11) जाता. B. (12) Quoted anonymously in काव्यप्रकाश (p. 394), which also notes the पाठान्तर.

इति। एतच्च वाचकत्वव्यञ्जकत्वप्रकारस्वरूपनिरूपणावसरे प्रतिपदं प्रकटीभविष्यतीत्यलमतिप्रसङ्गेन।

अर्थस्य वाच्यत्वस्य कीदृशः—काव्ये यः सहृदयाह्लादकारिस्वस्यन्दसुन्दरः। सहृदयाः काव्यार्थविदस्तेषामाह्लादमानन्दं करोति यस्तेन स्वस्यन्देनात्मीयेन स्वभावेन सुन्दरः सुकुमारः। तदेतदुक्तं भवति—यद्यपि पदार्थस्य नानाविधधर्मखचितत्वं सम्भवति तथापि तथाविधेन धर्मेण[1] सम्बन्धः समाख्यायते यः सहृदयहृदयाह्लादमाधातुं क्षमते। तस्य च तदाह्लादसामर्थ्यं सम्भाव्यते येन काचिदेव स्वभावमहत्ता रसपरिपोषाङ्गत्वं वा[2] व्यक्तिमासादयति। यथा

दंष्ट्रापिष्टेषु[3] सद्यः शिखरिषु न कृतः स्कन्धकण्डूविनोदः
सिन्धुष्वङ्गावगाहः खुरकुहरगलत्तुच्छतोयेषु[4] नासः।
लब्धाः[5] पातालपङ्के न लुठनरतयः पोत्रमात्रोपयुक्ते[6]
येनोद्धारे धरित्र्याः स जयति विभुताविप्लवेच्छो वराहः[7] ॥२०॥

अत्र च[8] तथाविधः पदार्थपरिस्पन्दमहिमा निबन्धोदयः स्वभावसम्भविनस्त्वपरिस्पन्दान्तरस्य संरोधमम्पादनेन[9] स्वभावमहत्तां समुल्लासयन् सहृदया[10]ह्लादकारितां प्रपन्नः[11]। यथा च

तामभ्यगच्छद्रुदितानुसारी
मुनिः कुशेध्माहरणाय यातः।
निषादविद्धाण्डजदर्शनोत्थः
श्लोकत्वमापद्यत यस्य शोकः[12] ॥२१॥

(1) Missing in A. (2) ॰पोषाङ्गतया A. (3) ॰विष्टेषु A. (4) ॰विप्रक्षोयतुच्छेषु B; ॰तुच्छ॰ lost in A (5) प्राप्ताः A. (6) ॰पोत॰ lost in A. (7) Quoted in सदुक्तिकर्णामृत (वराहमिहिरस्य); सुभाषितरत्नभाण्ड॰, p. 29, sl. 39. The reading of सदुक्तिकर्णामृत is खुरकुहरविप्रक्षोयतुच्छेषु, which agrees with B. (8) Missing in A. (9) ॰सम्पादने A. (10) ॰दया only, B. (11) ॰कारितापन्न B (12) रघुवंश xiv, 70.

अत्र क्रोऽसौ मुनिर्वाल्मीकिरिति पर्यायपदमात्रे वक्तव्ये परमकारुणिकस्य निषादनिर्भिन्नशकुनिसन्दर्शनमात्रसमुत्थितः शोकः[1] श्लोकत्वमभजत यस्येति तस्य तदवस्थजनकराजपुत्रीदर्शनविषयहृत्तेरन्तःकरणपरिस्पन्दः करुणरसपरिपोषाङ्गतया सहृदयहृदया[2]ह्लादकारी कवेरभिप्रेतः। यथा च

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्सन्देशाहृदयनिहितादागतं त्वत्समीपम्।
यो बृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि[3] ॥ ३२ ॥

अत्र प्रथममात्मन्यणपदार्थस्यादाक्षासकारिपरिस्पन्दनिबन्धनः। भर्तुर्मित्रं मां विद्धीत्युपादेयत्वमात्मनः[4] प्रथयति। तच्च न सामान्यम्, प्रियमिति विशेषकथापावितम्। इति[5] तामाश्वास्योत्सुकीकृत्य च तत्सन्देशात्त्वत्समीपमागमनमिति[6] प्रकृतं प्रस्तौति। हृदयनिहितादिति स्वहृदयनिहितं[7] सावधानत्वं द्योत्यते। ननु चान्यः[8] कश्चिदेवंविध[9]व्यवहारविदग्धबुद्धिः कथं न नियुक्त इत्याह—ममैवात्र किमपि कौशलं विजृम्भते। अम्बुवाहमित्यात्मनस्तत्कारिताभिधानं द्योतयति[10]—यः प्रोषितानां बृन्दानि त्वरयति, सञ्जातत्वराणि करोति। कीदृशानाम्—श्राम्यतां त्वरायामसमर्थानामपि। बृन्दानीति बाहुल्यात्तत्कारिताभ्यासं कथयति। कैन—मन्द्रस्निग्धैर्ध्वनिभिः, माधुर्य[11]रमणीयैः शब्दैर्विदग्धदूतप्रचोदनावचनप्रायैरित्यर्थः। क्व—पथि[12] मार्गे। यद्-

(1) शोकादिव: B. (2) B omits ०हृदया०. (3) मेघदूत (ed. Hultzsch) 96. (4) ०त्मादिय० lost in A. (5) अपि B, which word may go with ०पावितम् of the previous sentence B reads विशेषपावितम् only. (6) ०गतमिति A. (7) सुहृत्स्वनिहितं B. (8) अथान्य. A for ननु चान्यः. (9) कश्चिदेव व्य A. (10) The sentence अम्बुवाह० etc. missing in B. (11) सौन्दर्य A. (12) Wanting in A.

च्छया यथाकथञ्चिदहमेतदाचरामीति[1] किं पुनः प्रयत्नेन सुहृल्लेखनिमित्तं संरब्धबुद्धिं न करोमीति। कोट्टराणि छन्दांसि—अबलाविषमोच्छ्वसितानि। अबलाशब्देनात्र तल्लेयमौविरहवैधुर्यासहत्वं भण्यते[2], तद्विषमोच्छ्वसितानीति तेषां तदनुरक्तचित्तहृत्तित्वम्। तदयमत्र वाक्यार्थः—विधिविहितविरहवैधुर्यस्य परस्परानुरक्तचित्तहृत्तेर्यस्य कस्यचित्कामिजनस्य समागमसौख्यसम्पादनसौहार्दं सदैव गृहीतव्रतोऽस्मीति। अत्र यः पदार्थपरिस्पन्दः कविनोपनिबद्धः प्रबन्धस्य मेघदूतत्वे[3] परमार्थतः स एव जीवितमिति[4] सुतरां सहृदयहृदयाह्लादकारी[5]। न पुनरेवंविधो यथा

सद्यः पुरोपरिसरेऽपि[6] शिरीषमृद्वी
सीता[7] जवात्क्वचिदपि पदानि गत्वा[8]।
गन्तव्यमद्य कियदित्यसकृद् ब्रुवाणा
रामायणः कृतवती प्रथमावतारम्[9] ॥ ३३ ॥

अत्रासकृत्प्रतिक्षणं कियदद्य गन्तव्यमित्यभिधान[10]लक्षणः परिस्पन्दो न स्वभावमहत्तामुन्मीलयति, न च रसपरिपोषाङ्गतां प्रतिपद्यते। यस्मात्सीतायाः सहजेन केनाप्यौचित्येन गन्तुमध्यवसितायाः सौकुमार्यादेवंविधं वस्तु हृदये परिस्फुरदपि वचसमारोहतीति सहृदयैः सम्भावयितुं[11] न पार्यते। न च प्रतिक्षणमभिधीयमानमपि राघवायुष्प्रथमावतारस्य सम्यक् सङ्गतिं भजते, सकृदाकर्णनादेव तस्योत्पत्तेः[12]। एतच्चात्यन्तरमणीयमपि मनाङ्मात्रचलितावधानत्वेन कवेः कदर्थितम्।

(1) इति missing in B. (2) Wanting in A. (3) ०दूतत्वेन A. (4) जीवजीवमिति A, for एव जीवितमिति. (5) सुहृदां सहृदयाह्लादकारी A. (6) ०सरेऽपि A. (7) दृष्ट्वा B. (8) सीता B. (9) बालरामायण VI, 34 (p. 161) = रसार्णवसुधाकर, p. 104. (10) ०नित्यसकृदित्यभिधान A. (11) संभावितुं A. (12) तस्योपपत्तेः A.

तस्माद् "अवश्यम्" इत्यत्र पाठः कर्तव्यः[1]। तदेवंविधं विशिष्टमेव शब्दार्थयोर्लक्षणमुपादेयम्। तेन नेयार्थपार्थादयो[2] दूरोत्सारितत्वात्पृथङ् वक्तव्याः।

एवं शब्दार्थयोः प्रसिद्धस्वरूपातिरिक्तमन्यदेव रूपान्तरमभिधाय न तावन्मात्रमेव काव्योपयोगि, किन्तु वैचित्र्यान्तरविशिष्टमित्याह—

उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते[3] ॥ १० ॥

उभौ द्वावप्येतौ शब्दार्थावलंकार्यावलंकरणीयौ केनापि शोभातिशयकारिणालङ्करणेन[4] योजनीयौ। किं तत्तयोरलङ्करणमित्यभिधीयते—तयोः पुनरङ्कृतिः। तयोर्द्वित्वसंख्याविशिष्टयोरप्यलंकृतिः पुनरेकैव, यथा द्वावप्यङ्ग्रियेते[5]। कासौ—वक्रोक्तिरेव। वक्रोक्तिः[7] प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा[8]। कीदृशी—वैदग्ध्यभङ्गीभणितिः। वैदग्ध्य[9] विदग्धभावः कविकर्म[10] कौशलं तस्य भङ्गी विच्छित्तिः, तया भणितिः[11] विचित्रैवाभिधा वक्रोक्तिरित्युच्यते। तदिदमत्र तात्पर्यम्—यत् शब्दार्थौ पृथगवस्थितौ केनापि व्यतिरिक्तेनालङ्करणेन योज्येते, किन्तु वक्रतावैचित्र्ययोगितयाभिधानमेवा[12]-

(1) करणीयः A. (2) नेयार्थादयो A. These refer to the दोष so-called. (3) वक्रोक्ति-जीवित-कार's views. (4) °लङ्कारेण A. (5) °रभि° lost in A. (6) °लङ्कृतौ क्रियेते A. (7) वक्रो° lost in A. (8) °भिधान B वक्रोक्ति-जीवित-कार appropriates (p 8) this passage, from here to शोभातिशय कारित्वात्. (9) कर्म missing in A. (10) भङ्गि° lost in A. (11) °मेव तयो° in A.

नयोरलङ्कारः, तस्यैव शोभातिशयकारित्वात्। एतच्च वक्रताव्याख्यानावसर एवोदाहरिष्यते।

ननु च किमिदं प्रसिद्धार्थविरुद्धं प्रतिज्ञायते यदुक्तिरेवालङ्कारो नान्यः कश्चिदिति, यतश्चिरन्तनैरपरैः[1] स्वभावोक्तिलक्षणमलङ्करणमाम्नातं तच्चातीवरमणीयमित्यसहमानस्तदेव निराकर्तुमाह[2]—

अलङ्काराङ्गतां येषां स्वभावोक्तिरलङ्कृतिः।
अलङ्कार्यतया तेषां किमन्यदवतिष्ठते ॥ २१॥

येषामलङ्काराङ्गतामलङ्कारकाराणां स्वभावोक्तिरलङ्कृतिः, या स्वभावस्य पदार्थधर्मलक्षणस्य परिस्पन्दस्य उक्तिरभिधा सैवालङ्कृतिरलङ्करणमिति प्रतिभाति, ते सुकुमारमानसत्वाद् विवेकक्लेशद्वेषिणः। यस्मात् स्वभावोक्तिरिति कोऽर्थः? स्वभाव एवोच्यमानः स एव यदलङ्कारस्तल्लिम्[3]न्यक्तदृष्टितिरिक्तं काव्यशरीरकल्पं वस्तु विद्यते यत्तेषामलङ्कार्यतया विभूषत्वेनावतिष्ठते पृथगवस्थितिमासादयति, न किञ्चिदित्यर्थः।

ननु च पूर्वमवस्थापितम्—यदाक्यस्यैवाविभागस्य सालङ्कारस्य काव्यत्वमिति (१।६) तल्किमर्थमेतदभिधीयते? सत्यम्, किन्तु तत्रासत्यभूतोऽप्यपोद्धारबुद्धिविहितो विभागः कर्तुं शक्यते वर्णपद[4]न्यायेन वाक्यपदन्यायेन चेत्युक्तमेव (पृः ६)। एतदेवप्रकारान्तरेण विकल्पयितुमाह—

स्वभावव्यतिरेकेण वक्तुमेव न युज्यते।
वस्तु तद्रहितं यस्मान्निरुपाख्यं प्रसज्यते ॥ २२॥

(1) °नैः पर B. The word चिरन्तन would refer to writers like दण्डी (II 8 13) and रुद्रट (p. 49). (2) भामह II 85, 87, 93. Kuntaka follows भामह in rejecting स्वभावोक्ति as an अलङ्कार. (3) °किमपरम° A. (4) वाक्पद A.

स्वभावव्यतिरेकेण स्वपरिस्पन्दं विना निःस्वभावं वक्तुमभिधातुमेव न युज्यते न शक्यते। वस्तु वाच्यलक्षणम्। कुतः—तद्रहितं तेन स्वभावेन रहितं वर्जितं यस्मादनिरुपाख्यं प्रसज्यते। उपाख्याय निष्क्रान्तं निरुपाख्यम्। उपाख्या शब्दः, तस्यागोचरभूतमभिधानायोग्यमेव सम्पद्यते। यस्मात् स्वभावशब्दस्येदृशी व्युत्पत्तिः—भवतोऽस्मादभिधानप्रत्ययाविति भावः, स्वस्यात्मनो भावः स्वभावः[1]। तेन स एव यस्य कस्यचित्पदार्थस्य प्रख्योपाख्यावतारनिबन्धनम्, तेन वर्जितमसत्कल्पं वस्तु शशविषाणप्रायं शब्दज्ञानागोचरतां प्रतिपद्यते। स्वभावयुक्तमेव सर्वथाभिधेयपदवीमवतरतीति[2] शाकटिकवाक्यानामपि सालङ्कारता प्राप्नोति, स्वभावोक्तियुक्तत्वेन। एतदेव युक्त्यन्तरेण विकल्पयति—

शरीरं चेदलङ्कारः किमलङ्कुरुतेऽपरम्।
आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति ॥१३॥

यस्य कस्यचिदर्थमानस्य वस्तुनो वर्णनीयत्वेन स्वभाव एव वर्ण्य[3]शरीरम्। स एव चेदलङ्कारो यदि विभूषणं तत्किमपरं तद्व्यतिरिक्तं विद्यते यदलङ्कुरुते[4] विभूषयति। स्वात्मानमेवालङ्करोतीति चेत्तदयुक्तम्, अनुपपत्तेः। यस्मादात्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति, शरीरमेव शरीरस्य न कुत्रचिदप्यंसमधिरोहतीत्यर्थः[5], स्वात्मनि क्रियाविरोधात्। अन्यच्चाभ्युपगम्यापि ब्रूमः—

भूषणत्वे स्वभावस्य विद्यते भूषणान्तरे।
भेदावबोधः प्रकटस्तयोरप्रकटोऽथवा ॥१४॥

(1) Wanting in A. (2) ०मनुसरति A. (3) वर्णना A. (4) कुरुते lost in A. (5) ०मर्थः lost in A.

स्पष्टे सर्वत्र संसृष्टिरस्पष्टे सङ्करस्ततः।
अलङ्कारान्तराणां च विषयो नावशिष्यते ॥१५॥

भूषणत्वे स्वभावस्य अलङ्कारत्वे स्वपरिस्पन्दस्य[1] यदा भूषणान्तरमलङ्कारान्तरं विधीयते तदा विहिते कृते, तस्मिन् सति, द्वयी गतिः सम्भवति। कासौ—तयोः स्वभावोक्त्यलङ्कारान्तरयोः[2] भेदावबोधो भिन्नत्वप्रतिभासः प्रकटः सुस्पष्टः कदाचिदप्रकटत्वापरिस्फुटो वेति। तदा स्पष्टे प्रकटे तस्मिन् सर्वत्र सर्वस्मिन्[3] कविवाक्ये संसृष्टिरेवैकालङ्कृतिः प्राप्नोति। अस्पष्टे तस्मिन्नप्रकटे सर्वत्रैवैकः सङ्करोऽलङ्कारः प्राप्नोति। ततः को दोषः स्यादित्याह—अलङ्कारान्तराणां च विषयो नावशिष्यते। अन्येषामलङ्काराणामुपमादीनां विषयो गोचरो न कस्मिंश्चिदप्यवशिष्यते, निर्विषयत्वमेवायातीत्यर्थः। ततस्तेषां लक्षणकरण[4]वैयर्थ्यप्रसङ्गः। यदि वा[5] तावेव संसृष्टिसङ्करौ तेषां विषयत्वेन कल्प्येते तदपि न किञ्चित्, तैरेवालङ्कारैस्तस्यार्थस्यानङ्गीकृतत्वात्। इत्यनेनाकाण्डचर्वणप्रतिमेनालमलौकनिबन्धनेन। प्रकृतमनुसरामः। सर्वथा यस्य कस्यचित् पदार्थजातस्य[6] कविव्यापारविषयत्वेन वर्णनापदवीमवतरतः स्वभाव एव सहृदयाह्लादकारी काव्यशरीरत्वेन वर्णनीयतां प्रतिपद्यते। स एव च यथायोगं शोभातिशयकारिणा येन केनचिदलङ्कारेण योजयितव्यः। तदिदमुक्तम्—"अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः" (१।९) इति। "उभावेतावलङ्कार्यौ" (१।१०) इति च।

एवं शब्दार्थयोः परमार्थमभिधाय 'शब्दार्थौ' इति (१।७) काव्यलक्षणवाक्ये पदमेकं व्याख्यातम्। इदानीं 'सहितौ' इति (१।७) व्याख्यातुं साहित्यमेतयोः पर्यालोच्यते—

(1) परिस्पन्दस्य B. (2) °अलंकार missing in A. (3) Wanting in A. (4) करण missing in A. (5) च B. (6) पदार्थस्य जातस्य A.

शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा ।
सहितावितिनावेव किमपूर्वं विधीयते ॥ १६ ॥

शब्दार्थावभिधानाभिधेयौ सहितावविवुक्तावेव[1] सदा सर्वकालं प्रतीतौ स्फुरतः ज्ञाने प्रतिभासेते । ततस्तावेव सहितावविवुक्तावितिकिमपूर्वं विधीयते न किञ्चिदभूतं[2] निष्पाद्यते, सिद्धं साध्यत इत्यर्थः । तदेवं शब्दार्थयोर्निसर्गसिद्धं[3] साहित्यं कः सचेताः पुनस्तदभिधानेन निष्प्रयोजनमात्मानमायासयति ? सत्यमेतत्, किन्तु न[4] वाच्यवाचकलक्षणशाश्वतसम्बन्धनिबन्धनं वस्तुतः[5] साहित्यमित्युच्यते । यस्मादेतस्मिन् साहित्यशब्देनाभिधीयमाने कष्टकल्पनोपरचितानि गाङ्कुटादिवाक्यान्यसम्बद्धानि शाकटिकादि[6]वाक्यानि च सर्वाणि साहित्यशब्देनाभिधीयेरन् । तेन पदवाक्यप्रमाणव्यतिरिक्तं किमपि तत्त्वान्तरं साहित्य[7]मिति विभागोऽपि न स्यात् । ननु च पदादिव्यतिरिक्तं यत्किमपि साहित्यं नाम तदपि सुप्रसिद्धमेव, पुनस्तदभिधानेऽपि कथं न पौनरुक्त्यप्रसङ्गः ? अतएवेतदुच्यते[8]—यदिदं[9] साहित्यं नाम तदेतावति[10] निःसीमनि समयाध्वनि[11] साहित्यशब्दमात्रेणैव[12] प्रसिद्धम् । न[13] पुनरेतस्य कविकर्मकौशलकाष्ठाधिरूढिरमणीयस्याद्यापि[14] कश्चिदपि विपश्चिदयमस्य परमार्थ इति मनाङ्मात्रमपि विचारपदवीमवतीर्णः । तदद्य सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणां

(1) ०तावेव युक्तावेव B. (2) ऽपूर्वं (for अभूत) A. (3) स्वभाव० (for निसर्ग) B. (4) Wanting in A. (5) वस्तु न A. (6) शाकटिक० A. (7) ०त्वित्य० lost in A. (8) A has च, then *lacunae* for two syllables, and then व तदुच्यते. (9) तदिदं A. (10) तदेव A. (11) सहिताध्वनि A. (12) साहित्यमात्रशब्देनैव B. (13) Wanting in A. (14) All letters after ०रमणीयस्य lost in A.

सत्कविवचसामन्तरामोद[1]मनोहरत्वेन परिस्फुरदेतत्[2] सहृदय[3]षट्चरणगोचरतां नीयते।

साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः॥ १७॥

सहितयोर्भावः साहित्यम्। अनयोः शब्दार्थयोर्या काप्यलौकिकी चेतनचमत्कारकारितायाः कारणम् अवस्थितिर्विचित्रैव विन्यासभङ्गी। कीदृशी—अन्यूनानतिरिक्तत्वमनोहारिणी, परस्परस्पर्धित्वरमणीया। यस्यां द्वयोरेकतरस्यापि न्यूनत्वं निकर्षो न विद्यते नाप्यतिरिक्तत्वमुत्कर्षो वास्तीत्यर्थः। ननु च तथाविधं साम्यं द्वयोरुपहतयोरपि सम्भवतीत्याह—शोभाशालितां प्रति। शोभा सौन्दर्यमुच्यते। तया शालते श्राघते यः स शोभाशाली, तस्य भावः शोभाशालिता, तां प्रति सौन्दर्यश्लाघितां प्रतीत्यर्थः। सैव च[4] सहृदयाह्लादकारिता। तस्यां स्पर्धित्वेन यासाववस्थितिः परस्परसाम्यसुभगमवस्थानं सा[5] साहित्यमुच्यते। तत्र वाचकस्य वाचकान्तरेण वाच्यस्य वाच्यान्तरेण साहित्यमभिप्रेतम्, वाक्ये काव्यलक्षणस्य परिसमाप्तत्वादिति प्रतिपादितमेव (१।७)।

ननु च वाचकस्य वाच्यान्तरेण वाच्यस्य वाचकान्तरेण कथं न साहित्यमिति चेत्तत्र, क्रमव्युत्क्रमे प्रयोजनाभावादसमन्वयाच्च। तस्मादेतयोः शब्दार्थयोर्यत्र यस्यां स्वसम्पत्क्षमश्लेषसमुदायः सहृदयाह्लादकारी परस्परस्पर्धया परिस्फुरति, सा काचिदेव वाक्यविन्यासवक्रता साहित्यव्यपदेशभाग् भवति।

(1) All syllables after ०हार and before द lost in A. (2) This phrase is missing in A. (3) सहृदयहृदय A. (4) Wanting in A (5) Wanting in B.

मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः ।
अलङ्करणविन्यासो वक्रतातिशयान्वितः ॥ २४ ॥
हृद्यौचित्यमनोहारि रसानां परिपोषणम् ।
सर्वथा विद्यते यत्र यथास्वमुभयोरपि ॥ २५ ॥
सा काव्यवस्थितिस्तद्विदानन्दस्यन्दसुन्दरा[1] ।
पदादिवाक्यपरिस्पन्दसारः साहित्यमुच्यते ॥ २६ ॥

एतेषां च पदवाक्यप्रमाणसाहित्यानां चतुर्णामपि प्रतिवाक्य[2]मुपयोगः । तथा चैतत्पदमेवंस्वरूपं गकारौकारविसर्जनीयात्मकमेतस्य चार्थस्य प्रातिपदिकार्थपञ्चक[3]लक्षणस्याख्यातपदार्थषट्कलक्षणस्य वाचकमिति पदसंस्कारलक्षणस्य व्यापारः । पदानां च परस्परान्वयलक्षणसम्बन्धनिबन्धनमेतद्वाक्यार्थ[4]तात्पर्यमिति वाक्यविचारलक्षणस्योपयोगः । प्रमाणेन प्रत्यक्षादिनैतदुपपन्नमिति युक्तियुक्तत्वं नाम प्रमाणलक्षणस्य योजनम् । इदमेव परिस्पन्दमाहात्म्याक्षहृदयहृदयहारिता[5] प्रतिपत्ति[6]मिति साहित्यस्योपयुज्यमानता । एतेषां यद्यपि प्रत्येकं स्वविषये प्राधान्यमन्येषां गुणीभावस्तथापि सकलवाक्यपरिस्पन्दजीवितायमानस्यास्य साहित्यलक्षणस्यैव कविव्यापारस्य[8] वस्तुतः सर्वत्रा[9]तिशायित्वम् । यस्मादेतदमुख्यतयापि यत्र वाक्यसन्दर्भान्तरे स्वपरिमलमात्रेणैव संस्कारमारभते[10] तस्यैतदधिवास[11]शून्यतामात्रेणैव रामणीयकविरहः पर्यवस्यति । तस्मादुपादेयतायाः परिहाणिरित्युच्यते । तथा च स्वप्रवृत्तिवैयर्थ्य[12]प्रसङ्गः[13] । शास्त्रातिरिक्तप्रयोजनत्वं शास्त्राभिधेयचतुर्वर्गाधिकफलत्वं चास्य पूर्वमेव प्रतिपादितम् (१।३,५) ।

(1) ०वदिदाह्लादैकनिबन्धनम् A (2) यथावाक्य A. (3) क missing in A. (4) ०र्थे wanting in A. (5) ०हृदयाह्लादकारिता A. (6) प्रति० lost in A. (7) ०विताय० lost in A (8) Omitted in B. (9) सर्वा०.B (10) ०रमारभ० lost in A. (11) ०धावना B. (12) वैयर्थ्यं omitted in A. (13) A reads here (शास्त्रा)तिरिक्तप्रयोजनप्रसङ्गः ।

अपर्याप्तोचितेऽप्यर्थे वस्तुसौन्दर्यसम्पदा ।
गीतवद्धृदयाह्लादं तद्विदां विदधाति यत् ॥ ३७ ॥
वाच्यावबोधनिष्पत्तौ पदवाक्यार्थवर्जितम् ।
यत्किमप्यर्पयत्यन्तः पानकास्वादवत्सताम् ॥ ३८ ॥
शरीरं जीवितेनैव स्फुरितेनैव जीवितम् ।
विना निर्जीवतां येन वाक्यं[1] याति विपश्चिताम् ॥ ३९ ॥
यस्मात्किमपि सौभाग्यं[2] तद्विदामेव गोचरम् ।
सरस्वती समभ्येति[3] तद्विदानीं विचार्यते ॥ ४० ॥

इत्यन्तरश्लोकाः ।

एवं सहितावित्ति व्याख्याय कविव्यापारवक्रत्वं व्याचष्टे—

कविव्यापारवक्रत्वप्रकाराः सम्भवन्ति षट् ।
प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः ॥१८॥

कवीनां व्यापारः कविव्यापारः काव्यक्रियालक्षणस्तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकि वैचित्र्यं तस्य प्रकाराः प्रभेदाः षट् सम्भवन्ति । मुख्यतया तावन्त एव सम्भवन्तीत्यर्थः । तेषां प्रत्येकं प्रकाराः[4] बहवो भेदा विशेषाः । कीदृशाः—विच्छित्तिशोभिनः वैचित्र्यभङ्गीभ्राजिष्णवः । सम्भवन्तीति सम्बन्धः । तदेव दर्शयति—

वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता ।
वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः[5] ॥१९॥

वर्णानां विन्यासो वर्णविन्यासः अक्षराणां विशिष्टन्यसनं तस्य

(1) काव्यं B. (2) किमप्यलौकिकं B. (3) समभ्येति A. (4) प्रतिकारं B
(5) B reads कारिका's 19, 20 consecutively.

वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येणोपनिबन्धः सति वैचित्र्यविशेषविहितस्सहृदयाह्लादकारी शब्दशोभातिशयः। यथा

प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वी कपोलतलद्युतिः।
प्रसरति ततो ध्वान्तच्छोद[1]क्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः[2] ॥ ४१ ॥

अत्र वर्णविन्यासवक्रतामात्र[3]विहितः शब्दशोभातिशयः सुतरां समुल्लसितः। एतदेव वर्णविन्यासवक्रत्वं चिरन्तनेष्वनुप्रास इति प्रसिद्धम्। अत्र च प्रभेदस्वरूपनिरूपणं लक्षणावसरे करिष्यते (२।२)।

पदपूर्वार्धवक्रता—पदस्य सुबन्तस्य तिङन्तस्य वा यत्पूर्वार्धं प्रातिपदिकलक्षणं धातुलक्षणं वा तस्य वक्रता वक्रभावो विन्यासवैचित्र्यम्। तत्र च बहवः प्रकाराः सम्भवन्ति। यत्र रूढिशब्दस्यैव प्रस्तावसमुचितत्वेन वाच्यप्रसिद्धधर्मान्तरा[4]ध्यारोपगर्भत्वेन निबन्धः स पदपूर्वार्धवक्रतायाः प्रथमः प्रकारः। यथा

रामोऽस्मि सर्वं सहे[5] ॥ ४२ ॥

द्वितीयः—यत्र संज्ञाशब्दस्य वाच्य[6]प्रसिद्धस्य धर्मस्य लोकोत्तरातिशयाध्यारोपं गर्भीकृत्योपनिबन्धः। यथा

(1) ध्वस (for छोद) in B. (2) सुभाषितावली no. 2004 (anon) = काव्यप्रकाश p. 260 (anon) = सरस्वतीकण्ठाभरण *ad* i, 87 (anon) = सदुक्तिकर्णामृत i, 396 = अलङ्कारतिलक (वामट) p. 45 (anon) = अलङ्कारशेखर *ad* viii 1 (anon). The चन्द्रिका commentary on मम्मट says that this verse occurs in मालतीमाधव as a description of morning. But this is probably a mistake, as it does not occur in any MS of the drama. (3) मात्र wanting in A. (4) °प्रसिद्धान्तरधर्मा A (5) महानाटक v. 7 = ध्वन्यालोक p. 61 (anon) = प्रसिद्धारेन्दुराज p. 86 = मुकुलभट्ट p. 11 = काव्यप्रकाश p. 188 (anon). (6) वाच्यधर्म A.

रामोऽन्यो भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्माङ्गाग्यविपर्ययाद्यदि परं देवो न जानाति तम्[1] ।
वन्दीवैष[2] यशांसि गायति मरुद्व्यस्तैकबाणाहति-
श्रेणीभूतविशालताल[3]विवरोद्गीर्णैः स्वरैः सप्तभिः[4] ॥४३॥

अत्र रामशब्दो लोकोत्तरशौर्यादिधर्मातिशयाध्यारोपपरत्वेनोपात्तो वक्रतां प्रथयति ।

पर्यायवक्रत्वं नाम प्रकारान्तरं यदपूर्वार्थवक्रतायाः[5]—यत्रानेकशब्दाभिधेयत्वे वस्तुनः किमपि पर्यायपदं प्रस्तुतानुगुणत्वेन प्रयुज्यते । यथा

वामं काज्जलवद्विलोचनमुरो रोहद्विसारिस्तनं
मध्यं चामममक्षाणि एव विपुलाभोगा नितम्बस्थली ।
सद्यः प्रोद्गतविस्मयैरिति गणैरालोक्यमानं मुहुः
पायाद्वः प्रथमं वपुः स्मरिपोर्मिथ्योभवत्कान्तया ॥४४॥

अत्र 'स्मरिपोः' इति पर्यायः कामपि वक्रतामुन्मीलयति । यस्मात्कामशत्रोः कान्तया मिथ्योभावः शरीरस्य न कथञ्चिदपि[6] सम्भाव्यत[7] इति गणानां सद्यः प्रोद्गतविस्मयत्वमुपपन्नम् । सोऽपि पुनः पुनः परिस्फोलने-

(1) नाम् B. (2) वैष B. (3) ०साल A. (4) सप्तभैः A. This verse is quoted anonymously by the काव्यप्रकाश (pp. 182, 246). The commentators on मम्मट attribute it to the lost राघवाभ्युदयनाटक. माणिक्यचन्द्र says that it forms the speech of कुम्भकर्ण in that drama; while ०चन्द्रिका says that it is addressed by विभीषण to राम in the same play. It is attributed to विश्वनाथ in सहृदयानन्द (see Dhruva's edition of हरिश्चन्द्र, introd. p. xii). Also quoted anonymously in the सरस्वतीकण्ठाभरण (p. 341). (5) ०वक्रता० lost in A. (6) कथञ्चित् A. (7) संभाव्य A.

नाधर्यकारीति 'प्रथम'-पदस्य[1] जीवितम्। एतच्च पर्यायवक्रत्वं वाच्यासम्भविधर्मान्तर[2]गर्भीकारेणापि दृश्यते। यथा

अङ्गराज सेनापतें राजवल्लभ रत्नैनं भीमाद्दुःशासनम्[3] इति ॥४५॥

अत्र त्रयाणामपि पर्यायाणा[4]मसंभाव्यमानतत्परित्राणपात्रत्वलक्षणमकिञ्चित्करत्वं गर्भीकृत्योपहस्यते—रत्नैनमिति।

पदपूर्वार्धवक्रताया उपचारवक्रत्वं नाम प्रकारान्तरं विद्यते—यद्यामूर्तस्य वस्तुनो मूर्तद्रव्याभिधायिना शब्देनाभिधानमुपचारात्। यथा—निष्कारणं निकारकणिकापि मनस्विनां मानसमायासयति। यथा—हस्तापचेयं यशः। 'कणिका'-शब्दो[5] मूर्तवस्तुस्तोकार्थाभिधायी[6] स्तोकत्वसामान्योपचारादमूर्तस्यापि निकारस्य स्तोकाभिधानपरत्वेन[7] प्रयुक्तस्तद्विदाह्लादकारित्वाद्वक्रतां पुष्णाति। 'हस्तापचेयम्' इति मूर्तपुष्पादिवस्तु[8]सम्भविसंहतत्वसामान्योपचारादमूर्तस्यापि यशसो हस्तापचेयमित्यभिधानं वक्रत्वमावहति। द्रवरूपस्य[9] वस्तुनो वाचकशब्दस्तरङ्गितत्वादिधर्म[10]निबन्धनः किमपि सादृश्यमात्रमवलम्ब्य संहतस्यापि वाचकत्वेन प्रयुज्यमानः कविप्रवाहे प्रसिद्धः। यथा

श्वासो[11]च्छ्वस्यतरङ्गिणि स्तनतटे[12] इति ॥४६॥

क्वचिदमूर्तस्यापि द्रवरूपार्थाभिधायी वाचकत्वेन प्रयुज्यते। यथा

(1) शब्दस्य B, for पदस्य. (2) °सम्भव° only, A. (3) वेणीसंहार, *ad* in 47, p. 46=व्यक्तिविवेक p. 45. (4) अपि पर्यायाणा dropped in B. (5) The whole passage from मूर्तद्रव्याभिधायिना up to this word is dropped in A. सहृदयच (p. 9) substantially quotes this passage. (6) मूर्तद्रव्याभिधायी only in A. (7) मूचकाभिधान° B. (8) वस्तु missing in A. (9) द्रव्य° A (10) धर्म wanting in A. (11) वादी° A. (12) कवीन्द्रवचनसमुच्चय no. 450 (anon). This verse is quoted in full below.

एकां कामपि कालविप्लवमयीं शौर्योष्मकण्डूव्यय-
व्यग्रः स्थूशिरविस्मृतामरचमूडिम्बाहवा[1] बाहवः ॥४७॥

एतयोस्तरङ्गिणीति विप्लवस्थिति च वक्रतामावहतः।

विशेषणवक्रत्वं नाम पदपूर्वोत्तरवक्रतायाः प्रकारो विद्यते—यत्र विशेषणमाहात्म्यादेव तद्विदाह्लादकारित्वलक्षणं वक्रत्वमभिव्यज्यते यथा·

दाहोऽभ्रः प्रसृतिम्यचः प्रचयवान् बाष्पः प्रणाल्योचितः
श्वासाः प्रेङ्खितदीप्रदीपलतिकाः[2] पाण्डिम्नि मग्नं वपुः।
किञ्चान्यत्कथयामि रात्रिमखिलां खन्मार्ग[3]वातायने
हस्तच्छत्रनिरुद्धचन्द्रमहसस्तस्याः स्थितिर्वर्तते[4] ॥ ४८ ॥

अत्र दाहो बाष्पः श्वासो वपुरिति न किञ्चिदैचित्र्यमुन्मीलितम्। प्रत्येकं विशेषणमाहात्म्यात्पुनः काचिदेव वक्रताप्रतीतिः। यथा च

व्रीडायोगा[5]न्नतवदनया सन्निधाने गुरूणां
बद्धोत्कम्पस्तनकलशया[6] मन्युमत्प्रेयसो मे।
तिष्ठेत्युक्तं किमिव न तया यत्समुत्सृज्य बाष्पं
मय्यासक्तश्चकित[7]हरिणीहारिनेत्रत्रिभागः[8] ॥ ४९ ॥

अत्र चकितहरिणीहारीति क्रियाविशेषणं नेत्रत्रिभागासङ्गस्य गुरुसन्निधानविहितापराधत्रस्तरमणीयस्य कामपि कमनीयतामावहति[9], चकितहरिणीहारिविलोचनसाम्येन।

(1) ०डिम्बाहवा lost in A. This verse is quoted in full in ch. III.
(2) दीपदीप्तकलिका A. (3) तदङ्क० A (4) विदग्धवदनिका II, 21 = सुभाषितावली no 1411 = कवीन्द्रवचन० no 275 = काव्यक p 68 (anon) = Jayaratha p 41 (anon) = अलङ्कारशेखर p 68 (anon) II. चित्रमीमांस p. 103 (anon). (5) व्रीडालोका० A. (6) वेपोत्कम्पस्तनकलशया: B. (7) ०यकित० lost in A. (8) शार्ङ्गधरपद्धति no 3464 (नेत्रत्रिभागप्रसङ्गयस्थित) = सुभाषितावली no. 1335 (यस्य स्थितस्य) = ध्वन्यालोक p. 132 (anon) (9) पुनाति (for आवहति) B

अयमपरः पदपूर्वार्धवक्रतायाः प्रकारो यदिदं संवृतिवक्रत्वं नाम— यत्र पदार्थस्वरूपं प्रस्तावानुगुण्येन[1] केनापि निकर्षणोत्कर्षेण वा युक्तं व्यक्ततया साक्षादभिधातुमशक्यं संवृतिसामर्थ्योपयोगिना शब्देनाभिधीयते। यथा

सोऽयं दग्धधृतव्रतः प्रियतमे कर्तुं किमप्युद्यतः[2] ॥ ५० ॥

अत्र वक्षराजो वासवदत्ताविपत्ति[3]विधुरहृदयस्तत्प्राप्तिप्रलोभनवशेन पद्मावतीं परिणेतुमीहमानस्तदेवाकरणीयमित्यवगच्छन् तस्य वस्तुनो महापातकस्येवाकीर्तनीयतां ख्यापयति किमपीत्यनेन संवरणसमर्थेन सर्वनामपदेन। यथा च

निद्रानिमीलितदृशो मदमत्सरायाः[5]
नाप्यर्थवन्ति न च यानि निरर्थकानि।
अद्यापि मे वरतनोर्मधुराणि[6] तस्या-
स्तान्यक्षराणि हृदये किमपि ध्वनन्ति[7] ॥ ५१ ॥

(1) ॰कादनुगुणेन A. (2) This forms the last line of the verse चक्षुर्यच्च तदाननादपगतम् from तापसवत्सराजचरित. Kuntaka quotes this verse in full in ch iv. See below, abstract of that chapter for reference (3) ॰विवर्त्ति A. (4) ॰पेक्षमणो B. (5) ॰मत्सरादि B. (6) गदितानि B, for मधुराणि. (7) चौरपञ्चाशिका (ed. Solf, no. 36, see also note p. 31). This verse does not occur in Boblen's edition (Berlin, 1833) Since this verse is quoted (anonymously) in ॰चन्द्रलोक on दशरूपक (ed. Parab, *ad* iv, 23), विल्हण's authorship of the verse appears doubtful. In सुभाषितावली (no 1280) and जल्हणकृत सूक्तिमुक्तावली (74a), this श्लोक is attributed to कालशक. Quoted also anonymously in Hemacandra p. 89 and Samudrabandha p. 9. (समुद्रबन्ध probably quotes it from the वक्रोक्तिजीवित itself).

अत्र किमपीति तदाकर्णनविहितायाश्चित्तचमत्कृतेरनुभवैकगोचरत्व-लक्षणमव्यपदेश्यत्वं प्रतिपाद्यते[1]। तानीति[2] तथाविधानुभवविशिष्ट-तया स्मर्यमाणानि। नाप्यर्थवन्तीति स्वसंवेद्यत्वेन व्यपदेश्याविषयत्वं प्रकाश्यते। तेषां च न च यानि निरर्थकानीत्यलौकिकचमत्कारका-रित्वादपार्थकत्वं निवार्यते। त्रिष्वप्येतेषु विशेषणवक्रत्वं प्रतीयते।

इदमपरं पदपूर्वार्धवक्रतायाः प्रकारान्तरं सम्भवति वृत्तिवैचित्र्य-वक्रत्वं नाम—यत्र समासादिवृत्तीनां कासाञ्चिद् विचित्रायामेव कविभिः परिग्रहः क्रियते। यथा

मध्येऽङ्कुरं पल्लवाः[3] ॥ ५२ ॥

यथा च

पाण्डिम्नि मग्नं वपुः[4] ॥ ५३ ॥

यथा वा

सुधाविसरनिष्यन्दसमुल्लासविधायिनि।
हिमधामनि खण्डेऽपि न जनो नोल्लसायते ॥ ५४ ॥

अपरं लिङ्गवैचित्र्यं नाम पदपूर्वार्धवक्रतायाः प्रकारान्तरं दृश्यते—यत्र भिन्नलिङ्गानामपि शब्दानां वैचित्र्याय सामानाधिकरण्येोप-निबन्धः। यथा

दृष्टं जडे जगति को नु दृढप्रमाण-
कर्णः करी ननु भवेद् ध्वनितस्य पात्रम्[5] ॥ ५५ ॥

यथा च

मैथिली तस्य दाराः[6] ॥ इति[7] ॥ ५६ ॥

(1) This passage is quoted by ध्वन्यालोक p. 9. (2) तानि only, B (3) विक्रमोर्वशीय 4, 23. (4) See above p. 46, sl. 33. (5) कर्णः (for कर्णः) A. Quoted in full in सुभाषितावली no. 628 (भट्टवासुदेवस्य). The verse is given in full below, ch. ii. (6) बालरामायण iii 27, p 64. (7) Wanting in A.

अस्यदपि लिङ्गवैचित्र्यवक्रत्वम्—यत्रानेकलिङ्गसम्भवेऽपि सौकुमार्यात कविभिः स्त्रीलिङ्गमेव प्रयुज्यते, 'नास्त्रैव स्त्रीति पेशलम्' (२।२२) इति कृत्वा। यथा[1]

एतां पश्य पुरस्तटीम्[2] इति ॥ ५७ ॥

पदपूर्वार्धस्य धातोः क्रियावैचित्र्यवक्रत्वं नाम वक्रत्वप्रकारान्तरं विधत्ते—अत्र क्रियावैचित्र्यप्रतिपादनपरत्वेन[3] वैदग्ध्य[4]भङ्गीभणिति-रमणीयान् प्रयोगान् निबध्नन्ति कवयः। तत्र[5] क्रियावैचित्र्यं बहुविधं विच्छित्तिविततत्वव्यवहारं दृश्यते। यथा

रइकेलिहिअणिअंसणकरकिसलअरुद्धणअणजुअलस्स।
रुद्धस्स तइअणअणं पव्वइपरिचुम्बिअं जअइ[6] ॥ ५८ ॥

अत्र समानेऽपि हि[7] स्वगतप्रयोजने साध्ये तुल्ये च लोचनत्वे, देव्याः परिचुम्बनेन यस्य निरोधः सम्पाद्यते तद्भगवतस्तृतीयं[8] नयनं जयति सर्वोत्कर्षेण वर्तत इति वाक्यार्थः। अत्र जयतीति क्रिया-पदस्य किमपि सहृदयहृदयसंवेद्यं वैचित्र्यं[9] परिस्फुरदेव लक्ष्यते। यथा

स्वेच्छाक्रीडरिणः स्वच्छवच्छायायासितेन्दवः।
जायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः[10] ॥ ५९ ॥

(1) Wanting in A. (2) दशरूपकावलोक p 41 (anon) = Hemacandra p. 297 (anon) = सरस्वतीकण्ठा० p 300 (anon). This verse is quoted in full below, at II 22. (3) °पादनद्वारेण परत्वेन A. (4) वैचित्र्य A. (5) तत्र A.

(6) रतिकेलिहृतविवसनकरकिसलयरुद्धनयनयुगलस्य।
रुद्धस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ॥ इति छाया।

साधारणप्रतिक (ed. Weber) 455 = काव्यप्रकाश p 168 (7) Wanting in B. (8) तृतीय missing in A. (9) °वैचित्र्यं वै lost in A. (10) This is मङ्गलश्लोक to the इति of the प्रथमोन्मेष.

अत्र नखानां[1] सकललोकप्रसिद्धच्छेदनव्यापारव्यतिरेकि किमप्यपूर्वमेव प्रयत्नार्तिच्छेदनलक्षणं क्रियावैचित्र्यमुपनिबद्धम्। यथा च

स दहतु दुरितं शार्ङ्गिणो वः शराग्निः[2] ॥ ६० ॥

अत्र च पूर्ववदेव क्रियावैचित्र्यप्रतीतिः[3]। यथा च

कमुप्पलदलसिलिअलोअणेहिं
हेलालोलणमणिअणअणेहिं।
लीलइ लीलावईहि णिरुद्धओ
सिढिलिअचाओ जअइ सअरद्धओ[4] ॥ ६१ ॥

अत्र लोचनैर्लीलया लीलावतीभिर्निरुद्धः स्वव्यापारपराङ्मुखीकृतः सन्[5] शिथिलीकृतचापः कन्दर्पो जयति सर्वोत्कर्षेण वर्तत इति किमुच्यते, यतस्तादृग्विधविजयावाप्तौ सत्यां जयतीति वक्तव्यम्। तदयमत्राभिप्रायः—यत्[6] लोचनविलासानामेवंविधं जैत्रताप्रौढभावं पर्यालोच्य चेतनत्वेन स स्वचापारोपणायासमुपसंहृतवान्। यतस्तेनैव त्रिभुवनविजयावाप्तिः परिसमाप्यते ममेति मन्यमानश्च तस्य सहायत्वो[7]त्कर्षातिशयो जयतीति क्रियापदेन[8] कर्तृतायाः कारणत्वेन

(1) नखा lost in A. 2) अभिज्ञान. act 2. (3) °वैचित्र्यप्रतिपत्तिः A. (4) A reads °लोलीहि in the first line, °लोअणे and णअणेहिं in the second line, लीलाए and °लावलीहि in the third line, and सिढिलिअचाओ in the last line. B reads °हलोलिणि in the first line, हेलालीलवमालिहि in the second line; निरुद्धउ in the third line, °चाउ and सअरद्धउ in the last line. The conjectural छाया of the verse would be,

कथं चोत्पलदलसिलितलोचनैर्हेलालोलनयानिलनदामिः।
लीलया खीलावतीभिर्निरुद्धः शिथिलीकृतचापो जयति मकरध्वजः॥

If we read °सलोणहि in the first line with MS A, then would it mean °सलावण्णैः, qualifying णअणेहिं, which would be णयनैः, in the second line? (5) स A. (6) यदेत B. (7) सहदत्वो० B. (8) °पद B.

कवेश्चेतसि परिस्फुरितः। तेन किमपि क्रियावैचित्र्यमत्र तद्विदाह्लाद-कारि प्रतीयते। यथा च

तान्यक्षराणि हृदये किमपि ध्वनन्ति[1] ॥ ६२ ॥

अत्र जल्पन्ति वदन्तीत्यादि न प्रयुक्तम्, यस्मात्तानि कयापि विच्छित्या किमप्यनाख्येयं समर्पयन्तीति कवेरभिप्रेतम्।

वक्रतायाः पुनोऽप्यस्ति प्रकारः प्रत्ययाश्रयः[2] इति। वक्रभाव-स्यान्योऽपि प्रभेदो विद्यते। कोऽसौ?—प्रत्ययाश्रयः। प्रत्ययः सुसिङ् च यस्याश्रयः स्थानं स तथोक्तः। तस्यापि बहवः प्रकाराः सम्भवन्ति—संख्यावैचित्र्यविच्छित्तिः, कारकवैचित्र्यविच्छित्तिः, पुरुषवैचित्र्यविच्छित्तिश्च। तत्र, संख्यावैचित्र्यविच्छित्तिः—यस्मिन् वचनवैचित्र्यं काव्यबन्धशोभायै[3] निबध्यते। यथा

मैथिल्या तस्य दाराः[4] ॥ इति ॥ ६३ ॥

यथा च

फुल्लेन्दीवरकाननानि नयने यातो मरीजाकराः[5] ॥ ६४ ॥

अत्र द्विवचनबहुवचनयोः सामानाधिकरण्यमतीव चमत्कारकारि। कारकवैचित्र्यविच्छित्तिः—यत्राचेतनस्यापि पदार्थस्य चेतनत्वाध्यारोपेण चेतनस्यैव क्रियासमावेशलक्षणं रसादिपरिपोषणार्थं कर्तृत्वादिकारकं[6] निबध्यते। यथा

स्तनद्वन्द्वं मन्दं स्रपयति बलाद्धाष्पनिवहो
हठादन्तःकण्ठं[7] लुठति सरसः पञ्चमरवः।

(1) See above p. 34. (2) This is part of कारिका 19, which is now taken up for comment. (3) काव्यशोभोपनिबन्धनाय B. (4) See above p. 35. (5) तापञ्चकराश्च० (Berlin MS, i. 685) (6) कारकलं A. (7) कण्ठे B.

शरज्ज्योत्स्नापाण्डुः पतति च कपोलः करतले
न जानीमस्तस्याः क इव हि विकारः[1] व्यतिकरः ॥ ६५ ॥

अत्र बाष्पनिवहादीनामचेतनानामपि चेतनत्वाध्यारोपेण कविना कर्तृत्वमुपनिबद्धम्—यत्तस्या[2] विवशायाः सत्त्वास्तेषामेवंविधो व्यवहारः, सा पुनः स्वयं किञ्चिदप्याचरितुं समर्थेत्यभिप्रायः। अन्यच्च कपोलादीनां तद्[3]वयवानामितदवस्तुत्वं प्रत्यक्षतयास्मदादिगोचरतामापद्यते, तस्याः पुनर्योऽसावस्तुविकारव्यतिकरस्तं[4] तदनुभवैकविषयत्वादयं न जानीमः। यथा च

चापाचार्यस्त्रिपुरविजयो कार्त्तिकेयो विजेयः
शस्त्रव्यस्तः सदनमुदधिर्भूरियं हस्तकारः।
अस्त्रेवैतत् किमु लतवता रेणुकाकण्ठबाधां
बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः[5] ॥ ६६ ॥

अत्र चन्द्रहासो लज्जत इति पूर्ववत् कारकवैचित्र्यप्रतीतिः।

पुरुषवैचित्र्यविक्षितं वक्तृत्वं विद्यते—यत्र प्रत्यक्षापरभावविपर्यासं प्रयुञ्जते कवयः, काव्यवैचित्र्यार्थं युष्मदस्मदि वा प्रयोक्तव्ये प्रातिपदिकमात्रं निबध्नन्ति। यथा

अक्षाङ्गाभ्यविषयैयादि एवं देवो न जानाति तम्[6] ॥ ६७ ॥

अत्र त्वं न जानासीति वक्तव्ये वैचित्र्याय देवो न जानातीत्युक्तम्। एवं[7] युष्मदादिविपर्यासः क्रियापदं विना प्रातिपादिकमात्रेऽपि दृश्यते। यथा

अयं जनः प्रष्टुमनास्तपोधने
न चेद्रहस्यं प्रतिवक्तुमर्हसि[8] ॥ ६८ ॥

(1) विकारस्य B. (2) यदि तस्या B. (3) A omits तद्व. (4) A omits तं (5) बालरामायण II, 37 (p. 42) = काव्यप्रकाश pp. 333, 354 = वक्रोक्तिजीवित pp. 45, 66. (6) See above p. 31. (7) एष हि A. (8) कुमारसम्भव V, 4c.

अवाहं प्रष्टुकाम इति वक्तव्ये लाटच्यप्रतीत्यर्थमयं जन इत्युक्तम् यथा वा

सोऽयं दक्षद्भुतव्रतः[1] इति ॥ ६८ ॥

अत्र सोऽहमिति वक्तव्ये पूर्ववद् 'अयम्' इति वैचित्र्यप्रतीतिः। एते च सुख्यतया वक्रताप्रकाराः कतिचिन्निदर्शनार्थं प्रदर्शिताः। शिष्टाश्च सहस्रशः सम्भवन्तीति महाकविप्रवाहे सहृदयैः स्वयमेवोत्प्रेक्षणीयाः।

एवं वाक्यावयवानां पदानां[2] प्रत्येकं वर्णाद्यवयवद्वारेण यथासम्भवं वक्रभावं व्याख्यायेदानीं पदसमुदायभूतस्य वाक्यस्य वक्रता व्याख्यायते—

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।
यद्वालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति[3] ॥ २० ॥

वाक्यस्य वक्रभावोऽन्यः। वाक्यस्य पदसमुदायभूतस्य। आख्यातं साध्यवत्कारकविशेषणं वाक्यमिति यस्य प्रतीतिस्तस्य श्लोकादेर्वक्रभावो भङ्गीभणितिवैचित्र्यम् अन्यः पूर्वोक्तवक्रताव्यतिरिक्तो समुदायवैचित्र्यनिबन्धनः कोऽपि सम्भवति। यथा

उपस्थितां पूर्वमपास्य लक्ष्मीं
वनं मया सार्धमसि प्रपन्नः।
त्वामाश्रयं प्राप्य तया नु कोपा-
त्सोढास्रि न त्वद्भवने वसन्ती[4] ॥ ७० ॥

एतच्छ्रोतया तथाविधकरुणाक्रान्तान्तःकरणया वल्लभं प्रति सन्दिश्यते —यदुपस्थितां सेवासमाधया लक्ष्मीमपास्य श्रियं परित्यज्य पूर्वं यस्त्वं

(1) See above p. 34 (2) Amounts this word (3) This कारिका is quoted by वक्रोक्तिजीवन p. 9. (4) रघुवंश ९ v 60

मया सार्धं वनं प्रयत्नो विपिनं प्रयातस्तस्य तव सम्प्रेऽप्येतत्र सम्भाव्यते। तया पुनस्तस्मादेव कोपात् स्वौचितभावसमुचितसपत्नीविद्वेषात्त्वदुपदृष्टे वसन्ती न सोढास्मि। तदिदमुक्तं भवति—यत्तस्मिन् विधुरदशाविसंष्ठुलेऽपि समये तथाविधप्रसादात्सदृतामध्यारोप्य यदिदानीं मान्याख्ये निष्कारणपरित्यागतिरस्कारपात्रतां नीतास्मीत्येतदुचितमनुचितं वा विदितव्यवहारपरम्परेण भवता स्वयमेव[1] विचार्यतामिति।

स च वक्रभावस्तथाविधो यः सहस्रधा भिद्यते बहुप्रकारं भेदमासादयति। सहस्रशब्दोऽत्र संख्याभूयस्त्वमात्रवाची, न नियतार्थद्योतिः, यथा—सहस्रदलमिति[3]। यस्मात् कविप्रतिभानामानन्त्यान्नियतत्वं न सम्भवति। योऽसौ वाक्यस्य वक्रभावो बहुप्रकारः, न जानीमस्तं कीदृशमित्याह—यत्सालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति। यत्र यस्मिन्नसावलङ्कारवर्गः कविप्रवाहप्रसिद्धप्रतीतिरूपमादिरलङ्करणकलापः सर्वः सकलोऽप्यन्तर्भविष्यति[4] अन्तर्भावं व्रजिष्यति[5], पृथक्त्वेन नावस्थास्यते[6]। तत्प्रकारभेदत्वेनैव[7] व्यपदेशमासादयिष्यतीत्यर्थः। स चालङ्कारवर्गः स्वलक्षणावसरे प्रतिपदमुदाहरिष्यते।

एवं वाक्यवक्रतां व्याख्याय वाक्यसमूहरूपस्य प्रकरणस्य तत्समुदायात्मकस्य च प्रबन्धस्य वक्रता व्याख्यायते—

वक्रभावः प्रकरणे प्रबन्धे वास्ति[8] यादृशः।
उच्यते सहजाहार्यसौकुमार्यमनोहरः ॥ २१ ॥

वक्रभावो विन्यासवैचित्र्यं प्रबन्धैकदेशभूते प्रकरणे यादृशोऽस्ति यादृग् विद्यते प्रबन्धे वा नाटकादौ सोऽप्युच्यते कथ्यते[9]। कीदृशः—सहजाहार्यसौकुमार्यमनोहरः। सहजं स्वाभाविकमाहार्यं व्युत्पत्त्य-

(1) स lost in A. (2) नियता० lost in A. (3) सहस्रमवश्यमिति B. 4) अन्तर्भविष्यति omitted in B. (4) अनुभविष्यति for व्रजिष्यति A. (6) नावस्थास्यते B. (7) ०स्वभाव A, for भेद. (8) अस्ति A. (9) omitted in A.

पार्जितं यच्छ्लोकुमार्यं रामणीयकं तेन मनोहरो हृदयङ्गमो यः स तथोक्तः। तत्र प्रकरणे वक्रभावो यथा—रामायणे मारीचमाया-मयमाणिक्यमृगानुसारिणो रामस्य करुणाक्रन्दाकर्णनकातरान्तः-करणया जनकराजपुत्र्या तत्प्राणपरित्राणाय स्वजीवितपरिरक्षा-निरपेक्षया[1] लक्ष्मणो निर्भर्त्स्य प्रेषितः। तदेतदत्यन्तमनौचित्ययुक्तम्[2], यस्मादनुचरसन्निधाने प्रधानस्य तत्रविधव्यापारकरण[3]मसम्भाव-नीयम्। तस्य च सर्वातिशयचरितयुक्तत्वेन वर्ण्यमानस्य तेन कनीयसा प्राणपरित्राणसम्भावनेत्येतदत्यन्तमसमीचीनमिति पर्यालोच्य उदात्तराघवे[4] कविना वैदग्ध्यवशेन मारीचमृगमारणाय प्रयातस्य परित्राणार्थं लक्ष्मणस्य सीतया कातरत्वेन रामः प्रेरित इत्युपनिबद्धम्। अत्र च तद्विदाह्लादकारित्वमेव वक्रत्वम्। यथा च किरातार्जुनीये किरातपुरुषोक्तिषु[5] वाच्यत्वेन स्वमार्गेणमार्गणमात्र[6]मेवोपक्रान्तम्। वस्तुतः पुनरर्जुनेन सह तात्पर्यार्थपर्यालोचनया विग्रहो वाच्यार्थता-मुपनीतः। तथा च तत्रैवोच्यते—

प्रयुज्य सामाचरितं विलोभनं
भयं विभेदाय धियः प्रदर्शितम्।
तथाभियुक्तं च शिखीमुखार्थिना
यथेतरत्काव्यमिवाभासते[7] ॥ ७१ ॥

प्रबन्धे वक्रभावो यथा—कुलचिह्नाङ्कविविरचिते राम[8]कथोप-निबन्धे नाटकादौ पञ्चविधवक्रतासामग्रीसमुदायसुन्दरं सङ्घट्टय-

(1) निरपेक्ष omitted in A, which reads °परिरक्षाया only. (2) °युक्त-मुक्तम् A. (3) व्यापारणं A (4) This lost drama is quoted in दशरूपकावलोक, by Hemacandra and in साहित्यदर्पण (5) B omits किरात, but A reads किरातपुरुषोक्तिरिति. (6) स्वमार्गमार्गण° A, स्वमार्गणमात्र° B. (7) किरात° xiv, 7. (8) रामायण° A.

हृदयहारि महापुरुषवर्णनमुपक्रमे प्रतिभासते। परमार्थतस्तु विधिनिषेधात्मकधर्मोपदेशः पर्यवस्यति, रामवदवर्तितव्यं न रावणवदिति। यथा च, तापसवत्सराजे कुसुमसुकुमारचेतसः सरसविनोदैकरसिकस्य नायकस्य चरितवर्णनमुपक्रान्तम्। वस्तुतस्तु व्यसनार्णवे निमज्जिष्यतो राजा तथाविधनयव्यवहारनिपुणैरमात्यैस्तैस्तैरुपायैरुत्तारणीय इत्युपदिष्टम्। एतच्च स्वलक्षणव्याख्यानावसरे व्यक्ततामायास्यति।

एवं कविव्यापारवक्रताषट्कमुद्देशमात्रेण व्याख्यातम्। विस्तरेण तु स्वलक्षणावसरे व्याख्यास्यते।

क्रमप्राप्तत्वेन बन्धोऽधुना व्याख्यास्यते—

वाच्यवाचकसौभाग्यलावण्यपरिपोषकः।
व्यापारशाली वाक्यस्य[1] विन्यासो बन्ध उच्यते ॥२२॥

विन्यासो विशिष्टं न्यसनं यः सन्निवेशः स एव व्यापारशालो बन्ध उच्यते। व्यापारोऽत्र प्रस्तुतकाव्यक्रियालक्षणः। तेन शालते श्राघते यः सन्निवेशः। कस्य—वाक्यस्य श्लोकादेः। कीदृशः—वाच्यवाचकसौभाग्यलावण्यपरिपोषकः। वाच्यवाचकयोर्द्वयोरपि वाच्यस्याभिधेयस्य वाचकस्य च शब्दस्य वक्ष्यमाणं सौभाग्यलावण्यलक्षणं यद्गुणद्वयं तस्य परिपोषकः पुष्टातिशयकारी। सौभाग्यं प्रतिभासंरम्भफलभूतं चेतनचमत्कारित्वलक्षणम्, लावण्यं सन्निवेशसौन्दर्यम्, तयोः परिपोषकः। यथा

दत्त्वा वामकरं नितम्बफलके लीलावलन्मध्यया
प्रोत्तुङ्गस्तनसंसक्तचुम्बिचिबुकं कृत्वा तया मां प्रति।

(1) The reading of the commentary is वाक्यस्य which is preferrable, although the MS here reads काव्यस्य in the कारिका.

प्रान्तप्रोतनवेन्द्रनीलमणिमच्चुल्लावलोविभ्रमाः
सासूयं प्रहिताः स्मरज्वरसुचो द्विजाः कटाक्षच्छटाः[1] ॥७२॥

अत्र समग्रकविकौशलसम्पाद्यस्य चेतनचमत्कारित्वलक्षणस्य सौभाग्यस्य, कियन्मात्रवर्णविन्यासविच्छित्तिविहितस्य पदसन्धानस्य दुर्घटितस्य च लावण्यस्य परः परिपोषो विद्यते।

एवं च स्वरूपमभिधाय तद्विदाह्लादकारित्वमभिधत्ते—

वाच्यवाचकवक्रोक्तिचितयातिशयोत्तरम्।
तद्विदाह्लादकारित्वं किमप्यामोदसुन्दरम् ॥२३॥

तद्विदाह्लादकारित्वं काव्यविदानन्दविधायित्वम्। कीदृशम्—वाच्यवाचकवक्रोक्तिचितयातिशयोत्तरम्। वाच्यमभिधेयं वाचकं शब्दो वक्रोक्तिरलङ्करणम्, एतस्य चितयस्य योऽतिशयः कोऽप्युत्कर्षस्तस्मादुत्तरमतिरिक्तम्। स्वरूपेणातिशयेन च स्वरूपेणान्यत् किमपि तत्त्वान्तरमेतदतिशयेनेतस्माच्चितयादपि लोकोत्तरमित्यर्थः। अन्यच्च कीदृशम्—किमप्यामोदसुन्दरम्। किमप्यव्यपदेश्यं सहृदयहृदयसंवेद्यम् आमोदः सुकुमारवस्तुधर्मो रञ्जकत्वं नाम, तेन सुन्दरं रञ्जकत्वरमणीयम्। यथा

हंसानां निनदेषु यैः कवलितैरासज्यते कूजता-
मन्यः कोऽपि कषायकण्ठलुठनादाघर्घरो विभ्रमः।
ते सम्प्रत्यकठोरवारणवधूदन्ताङ्कुरस्पर्धिनो
निर्याताः कमलाकरेषु विसिनीकन्दाग्रिमग्रन्थयः[2] ॥ ७३ ॥

अत्र चितयेऽपि वाच्यवाचकवक्रोक्तिलक्षणे प्राधान्येन न कस्मिंश्चिदपि कवेः संरम्भो विभाव्यते। किन्तु प्रतिभावैचित्र्यवशेन किमपि तद्विदाह्लादकारित्वमुन्मीलितम्। यद्यपि सर्वेषामुदाहरणानामविकलकाव्यलक्षणपरिसमाप्तिः सम्भवति तथापि यत्राधान्येनाभिधीयते

(1) कवीन्द्रवचन, ९१२ (anon).

(2) Quoted anonymously in ध्वन्यालोक ch. iv, p. 242.

स एवांशः प्रत्येकमुद्भिन्नतया तेषां परिस्फुरतीति सहृदयैः स्वयमेवोन्नेयम्।

एवं काव्यसामान्यलक्षणमभिधाय तद्विशेषलक्षणविषयप्रदर्शनार्थं मार्गभेदनिबन्धनं त्रैविध्यमभिदधे—

सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः॥२४॥

तत्र तस्मिन् काव्ये मार्गाः पन्थानस्रयः[1] सम्भवन्ति। न द्वौ चत्वारः, स्वरादिसंख्यावत्तावतामेव वस्तुतस्तज्ज्ञैरुपलम्भात्। ते च कीदृशाः—कविप्रस्थानहेतवः। कवीनां प्रस्थानं प्रवर्तनं तस्य हेतवः, काव्यकरणस्य कारणभूताः। किमभिधानाः—सुकुमारो विचित्रश्च मध्यमश्चेति। कीदृशो मध्यमः—उभयात्मकः। उभयमनन्तरोक्तं मार्गद्वयमात्मा यस्येति विग्रहः। छायातदुपजीव्योल्लुक्कं भवति। तेषाञ्च स्वलक्षणावसरे स्वरूपमाख्यास्यते।

अत्र च बहुविधा विप्रतिपत्तयः सम्भवन्ति। यस्मात्किरातनैर्विदर्भादिदेशविशेषसमाश्रयणेन वैदर्भीप्रभृतयो रीतयस्त्रिस्रः समाम्नाताः[2]। तासां चोत्तमाधममध्यमत्ववैचित्र्येण त्रैविध्यम्। अन्यैश्च[3] वैदर्भगौडीयलक्षणं मार्गद्वितयमाख्यातम्। एतच्चोभयमप्ययुक्तियुक्तम्। यस्मादेशभेदनिबन्धनत्वे रीतिभेदानां देशानामानन्त्यादसंख्यत्वं प्रसज्यते। न च विशिष्टरीतियुक्तत्वेन काव्यकरणं मातृसेयभगिनीविवाहवद् देशधर्मतया व्यवस्थापयितुं शक्यम्। देशधर्मो हि हृद्यव्यवहारपरम्परामात्रशरणः शक्यानुष्ठानतां नातिवर्तते। तथाविधकाव्यकरणं पुनः शक्त्यादिकारणकलापसाकल्यमपेक्ष्यमाणं न शक्यते

(1) B adds सन्ति here.

(2) वामन i. 2. 9 13. (3) दण्डी i, 42.

यथाकथञ्चिदनुष्ठातुम्। न च दाक्षिण्यात्यगीतविषयसुस्वरतादिध्वनिरामणीयकवत्तस्य स्वाभाविकत्वं वक्तुं पार्यते। तस्मिन् सति तथाविधकाव्यकरणं सर्वस्य स्यात्। किञ्च, शक्तौ विद्यमानायामपि व्युत्पत्त्यादिराहार्यकारणसम्पत्तिनियतदेशविषयतया न व्यवतिष्ठते, नियमनिबन्धनाभावात् तत्रादर्शनाद् अन्यत्र च दर्शनात्। न च रीतीनामुत्तमाधममध्यमत्वभेदेन त्रैविध्यमव्यवस्थापयितुं न्याय्यम्। यस्मात् सहृदयाह्लादकारिकाव्यलक्षणप्रस्तावे वैदर्भीसदृशसौन्दर्यासम्भवान्मध्यमाधमयोरुपदेशवैयर्थ्यमायाति। परिहार्यत्वेनाप्युपदेशो न युक्ततामालम्बते, तैरेवानभ्युपगतत्वात्। न चागतिकगतिन्यायेन यथाशक्ति दरिद्रदानादिवत् काव्यं करणीयतामर्हतामर्हति। तदेवं निर्वचनसमाख्यामात्रकरणकारणत्वे देशविशेषाश्रयणस्य वयं न विवदामहे। मार्गद्वितयवादिनामप्येतान्येव दूषणानि। तदलमनेन निःसारवस्तुपरिमलनव्यसनेन।

कविस्वभावभेदनिबन्धनत्वेन काव्यप्रस्थानभेदः समञ्जसतां गाहते। सुकुमारस्वभावस्य कवेस्तथाविधैव सहजा शक्तिः समुल्लसति, शक्तिशक्तिमतोरभेदात्। तया च तथाविधसौकुमार्यरमणीयां व्युत्पत्तिमापद्यते। ताभ्यां च सुकुमारवर्त्मनाभ्यासतत्परः क्रियते। तथैव चेतस्यादृ विचित्रः स्वभावो यस्य कवे[1]स्तदिदमाह्लादकारिकाव्यलक्षणकरणप्रस्तावात् सौकुमार्यव्यतिरेकिणा वैचित्र्येण रमणीय एव, तस्य च क्वचिद्विचित्रैव तदनुरूपा शक्तिः समुल्लसति। तया च तथाविधवैदग्ध्यबन्धुरां व्युत्पत्तिमापद्यते। ताभ्यां च वैचित्र्यवासनाधिवासितमानसो विचित्रवर्त्मनाभ्यासभाग् भवति। एवमेतदुभयकविनिबन्धनसंवलितस्वभावस्य कवेस्तदुचितैव शबलच्छायातिशयशालिनी शक्तिः समुदेति। तया च तदुभयपरिस्पन्दसुन्दरव्युत्पत्त्युपार्जनमाचरति। ततस्तच्छायाद्वितयपरिशीलनेशलाभ्यासपरवशः सम्पद्यते।

(1) B reads क only.

तदेवमेते कवयः सकलकाव्यकरणकलाष्काष्ठाधिरूढिरमणीयं किमपि काव्यमारभन्ते, सुकुमारं विचित्रमुभयात्मकं च। त एव तत्प्रवर्तननिमित्तभूता मार्गा इत्युच्यन्ते। यद्यपि कविस्वभावभेदनिबन्धनत्वादनन्तभेदभिन्नत्वमनिवार्यं तथापि परिसंख्यातुमशक्यत्वात् सामान्येन त्रैविध्यमेवोपपद्यते। तथा च रमणीयकाव्यपरिग्रहप्रस्तावे स्वभावसुकुमारस्तावदेको राशिः, तद्व्यतिरिक्तस्यारमणीयस्यानुपादेयत्वात्। तद्व्यतिरेकी रामणीयकविशिष्टो विचित्र इत्युच्यते। तदेतयोर्द्वयोरपि रमणीयत्वादेतदीयच्छायाश्रितयोपजीविनोऽस्य रमणीयत्वमेव न्यायोपपन्नं पर्यवस्यति। तच्चादेषां प्रत्येकमस्खलितस्वपरिस्पन्दमहिम्ना तद्विदाह्लादकारित्वपरिसमाप्तेर्न कस्यचिन्न्यूनता।

ननु च प्रत्ययोगान्तरतस्त्वात् स्वाभाविकत्वं वक्तुं युज्यते, व्युत्पत्त्यभ्यासयोः पुनराहार्ययोः कथमेतद् घटते? नैष दोषः, यस्मादास्तां तावत् काव्यकरणम्, विषयान्तरेऽपि सर्वस्य कस्यचिदनादिवासनाभ्यासाधिवासितचेतसः स्वभावानुसारिणावेव व्युत्पत्त्यभ्यासौ प्रवर्तेते। तौ च स्वभावाभिव्यञ्जनेनैव साफल्यं भजतः। स्वभावस्य तयोश्च परस्परमुपकार्योपकारकभावेनावस्थानात् स्वभावस्तावदारभते, तौ च तत्परिपोषमातनुतः। तथा चाचेतनानामपि भावः स्वभावसंवादिभावान्तरसन्निधानमाहात्म्यादभिव्यक्तिमासादयति, यथा चन्द्रकान्तमणयश्चन्द्रमसः करपरामर्शवशेन स्यन्दमानसहजरसप्रसराः सम्पद्यन्ते।

तदेवं मार्गानुद्दिश्य तानेव क्रमेण लक्षयति—

अम्लानप्रतिभोद्भिन्नवशब्दार्थबन्धुरः।
अयत्नविहितस्वल्पमनोहारिविभूषणः॥२५॥
भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः।
रसादिपरमार्थज्ञमनःसंवादसुन्दरः॥२६॥

अविभावितसंस्थानरामणीयकरञ्जकः ।
विधिवैदग्ध्यनिष्पन्ननिर्माणातिशयोपमः ॥२७॥
यत् किञ्चनापि वैचित्र्यं[1] तत्सर्वं प्रतिभोद्भवम् ।
सौकुमार्यपरिस्यन्दस्यन्दि यत्र विराजते ॥२८॥
सुकुमाराभिधः सोऽयं येन सत्कवयो गताः ।
मार्गेणोत्फुल्लकुसुमकाननेनेव षट्पदाः ॥२९॥

सुकुमाराभिधः सोऽयं सोऽयं पूर्वोक्तलक्षणः सुकुमारशब्दाभिधानः । येन मार्गेण सत्कवयः कालिदासप्रभृतयो गताः प्रयाताः, तदाश्रयेण काव्यानि कृतवन्तः । कथम्—उत्फुल्लकुसुमकाननेनेव षट्पदाः । उत्फुल्लानि विकसितानि कुसुमानि पुष्पाणि यस्मिन् कानने वने तेन षट्पदा इव भ्रमरा यथा । विकसितकुसुमकाननसाम्येन तस्य कुसुमसौकुमार्यसदृशमाभिजात्यं द्योत्यते । तेषां च भ्रमरसादृश्येन कुसुममकरन्दकल्पसारसंग्रहव्यसनिता । स च कीदृशः—यत्र यस्मिन् किञ्चनापि कियन्मात्रमपि, वैचित्र्यं विचित्रभावो वक्रोक्तियुक्तत्वम् । तत्सर्वमलङ्कारादिप्रतिभोद्भवं कविशक्तिसमुल्लसितमेव, न पुनराहार्यं यथाकथञ्चिदयत्नेन निष्पाद्यम् । कीदृशम्—सौकुमार्यपरिस्यन्दस्यन्दि । सौकुमार्यमाभिजात्यं तस्य परिस्यन्दस्तद्विदाह्लादकारित्वलक्षणं रामणीयकं तेन स्यन्दते रसमयं सम्पद्यते यत्तथोक्तम् । यत्र विराजते शोभातिशयं पुष्णातीति सम्बन्धः । यथा

प्रहृत्ततापो दिवसोऽतिमात्र-
मत्यर्थमेव क्षणदा च तन्वी ।

(1) The MS B reads वैदग्ध्यं here, but in the commentary the word वैचित्र्यं is explained.

उभौ विरोधक्रियया विभिन्नौ
जायापती सानुशयाविवास्ताम्[1] ॥ ७४ ॥

अत्र श्लेषच्छायाच्छुरितं कविशक्तिमात्रसमुल्लसितमलङ्करणमनाहार्यं कामपि कमनीयतां पुष्णाति। तथा च 'प्रहृत्तसापः' 'तन्वी' इति वाचकौ सुन्दरस्वभावमात्रसमर्पणपरत्वेन वर्तमानावर्थान्तरप्रतीत्यनुरोधपरत्वेन प्रहृत्तिं न सम्बन्धेते, कविव्यक्तकौशलसमुल्लसितस्य पुनः प्रकारान्तरस्य प्रतीतावानुगुण्यमात्रेण तद्विदाह्लादकारितां प्रतिपद्येते। किं तत्प्रकारान्तरं नाम?—विरोधविभिन्नयोः शब्दयोरर्थान्तरप्रतीतिकारिणोरुपनिबन्धः। तथा चोपमेययोः सङ्घातवस्त्वानलक्षणो विरोधः, स्वभावभेदलक्षणं च विभिन्नत्वम्। उपमानयोः पुनरौर्थाकलङ्कलक्षणो विरोधः, कोपात् पृथगवस्थानलक्षणं विभिन्नत्वम्। 'अतिमात्रम्' 'अत्यर्थं' चेति विशेषणरहितयं पक्षद्वयेऽपि सातिशयतापतीतिकारित्वेनातितरां रमणीयम्। श्लेषच्छायोल्लेखसम्पादनाप्यत्नघटितत्वेनात्र मनोहारिणी।

यच्च कीदृशः—अज्ञानप्रतिभोद्भिन्नवशब्दार्थबन्धुरः। अज्ञानात् यावदोषोपहता प्राक्तनाद्यतनसंस्कारपरिपाकप्रौढा प्रतिभा काचिदेव कविशक्तिः, तत उद्भिन्नौ नूतनाङ्कुरन्यायेन स्वयमेव समुल्लसितौ, न पुनः कदर्थनाक्लिष्टौ नवौ प्रत्यग्रौ तद्विदाह्लादकारित्वसामर्थ्ययुक्तौ शब्दार्थावभिधानाभिधेयौ ताभ्यां बन्धुरो हृदयहारी। अन्यच्च कीदृशः—अयत्नविहितस्वल्पमनोहारिविभूषणः। अयत्नेनाक्लेशेन विहितं कृतं यत् स्वल्पं मनाङ्मात्रं मनोहारि हृदयाह्लादकं विभूषणमलङ्करणं यत्र स तथोक्तः। स्वल्प-शब्दोऽत्र प्रकरणाद्यपेक्षः, न याक्षमात्रपरः। उदाहरणं यथा—

बालेन्दुवक्राण्यविकाशभावाद्
बभुः पलाशान्यतिलोहितानि।

(1) रघु० XVI, 45.

मद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम्[1] ॥ ७५ ॥

अत्र 'बालेन्दुवक्राणि' 'अतिलोहितानि' 'सद्यो वसन्तेन समागतानाम्' इति पदानि सौकुमार्यात् स्वभाववर्णनामात्रपरत्वेनोपात्तान्यपि 'नखक्षतानीव' इत्यलङ्करणस्य मनोहारिणः श्लेषं विना स्वभावोक्तिमात्रेण योजनां भजमानानि चमत्कारितामापद्यन्ते ।

यत्रान्यच्च कौटस्थः—भावस्वभावप्राधान्यव्यक्तताहार्यकौशलः । भावाः पदार्थास्तेषां स्वभावस्तत्त्वं तस्य प्राधान्यं मुख्यभावस्तेन व्यक्तं तिरस्कृतमाहार्यं व्युत्पत्तिविहितं कौशलं नैपुण्यं यत्र स तथोक्तः । तदयमभिप्रायः—पदार्थपरमार्थमहिमैव कविशक्तिसमुन्मीलितः, तथाविधो यत्र विजृम्भते । येन विविधमपि व्युत्पत्तिविलसितं काव्यान्तरगतं तिरस्कारास्पदं सम्पद्यते । अत्रोदाहरणं रघुवंशे मृगयावर्णनपरं प्रकरणम्, यथा

तस्य स्तनप्रणयिभिर्मृदुरेणशावै-
र्व्याहन्यमानहरिणीगमनं पुरस्तात् ।
आविर्बभूव कुशगर्भमुखं मृगाणां
यूथं तदध्वसरगर्वितकृष्णसारम्[2] ॥ ७६ ॥

यथा च कुमारसम्भवे (३।३५)

दृश्यानि भावं क्रियया विवक्षुः ॥ ७७ ॥

इतःपरं प्राणिधर्मवर्णनम् । यथा

शृङ्गेण च स्पर्शनिमीलिताक्षीं
मृगीमकण्डूयत कृष्णसारः[3] ॥ ७८ ॥

(1) कुमार० iii, 29. (2) रघु IX, 55. (3) कुमार० iii, 36.

अन्यच्च कौहलः—रसादिपरमार्थन्यमनःसंवादसुन्दरः। रसाः शृङ्गारादयः। तदादिग्रहणेन रत्यादयोऽपि गृह्यन्ते। तेषां परमार्थः परमरहस्यं तज्ज्ञानन्तीति तज्ज्ञास्तद्विदस्तेषां मनःसंवादो हृदयसंवेदनं स्वानुभवगोचरतया प्रतिभासः, तेन सुन्दरः सुकुमारः सहृदयहृदयाह्लादकारी वाक्यस्योपनिबन्ध इत्यर्थः। अत्रोदाहरणानि रघौ[1] रावणं निहत्य पुष्पकेणागच्छतो रामस्य सीतायास्तद्विरहविधुरहृदयेन मयाऽस्मिन्नस्मिन् समुद्देशे किमप्येवंविधं वैशसमनुभूतमिति वर्णयतः सर्वाण्येव वाक्यानि। यथा

पूर्वानुभूतं स्मरता च रात्रौ
कम्पोत्तरं भीरु तयोपगूढम्।
गुह्यविसारीण्यतिवाहितानि
मया कथञ्चिद् घनगर्जितानि[2] ॥ ७८ ॥

अत्र रात्रिहृदयकरणस्यायमभिप्रायो यद् विभावादिरूपेण रसाङ्गभूताः शकुनिरुतततरुसलिलकुसुमसमयप्रभृतयः पदार्थाः सातिशयस्वभावदर्शनप्राधान्येनैव रसाङ्गतां प्रतिपद्यन्ते। तद्व्यतिरिक्ताः सुरगन्धर्वप्रभृतयः सोत्कर्षचेतनायोगिनः शृङ्गारादिरसनिर्भरतया वर्ण्यमानाः सरसहृदयाह्लादकारितामायान्तीति कविभिरभ्युपगतम्। तथाविधमेव लक्ष्ये दृश्यते।

अन्यच्च कौहलः—अविभावितसंस्थानरामणीयकरञ्जकः। अविभावितमनालोचितं संस्थानं संस्थितिर्यत्र तेन रामणीयकेन रमणीयत्वेन रञ्जकः सहृदयाह्लादकः। तेनायमर्थः—यदि तथाविधं कविकौशलमत्र सम्भवति तद् व्यपदेष्टुमियत्तया न कथञ्चिदपि पार्यते, केवलं सर्वातिशायितया चेतसि परिस्फुरति। यच्च कौहलः—विधिवैदग्ध्यनिष्यन्दनिर्माणातिशयोपमः। विधिर्विधाता तस्य वैदग्ध्यं कौशलं

(1) रघु० canto xiii. (2) रघु० xiii, 28.

तेन निष्पन्नः परिसमाप्तो योऽसौ निर्माणातिशयः सुन्दरः सर्गोल्लेखो रमणीयरमणीलावण्यादिः स उपमा निदर्शनं यस्य स तथोक्तः। तेन विधातुरिव कवेः कौशलं यत्र विवेक्तुमशक्यम्। यथा

ज्यावल्गनिष्पन्दभुजेन यस्य
विनिःसहज्यापरम्परेण।
कारागृहे निर्जितवासवेन
दशाननेनोषितमा प्रसादात्[1] ॥ ८० ॥

अत्र व्यपदेशप्रकारान्तरनिरपेक्षः कविशक्तिपरिणामः परं परिपाकमधिरूढः।

एतस्मिन् कुलके—प्रथमश्लोके प्राधान्येन शब्दालङ्करणयोः सौन्दर्यं प्रतिपादितम्। द्वितीये वर्णनीयस्य वस्तुनः सौकुमार्यम्, तृतीये प्रकारान्तरनिरपेक्षस्य सन्निवेशस्य सौकुमार्यम्, चतुर्थे वैचित्र्यमपि सौकुमार्याविसंवादि विधेयमित्युक्तम्। पञ्चमो विषयविषयिसौकुमार्यप्रतिपादनपरः।

एवं सुकुमाराभिधानस्य मार्गस्य लक्षणं विधाय तस्यैव गुणान् लक्षयति—

असमस्तमनोहारिपदविन्यासजीवितम्।
माधुर्यं सुकुमारस्य मार्गस्य प्रथमो गुणः ॥ २० ॥

असमस्तानि समासवर्जितानि मनोहारीणि हृदयाह्लादकानि श्रुतिरम्यत्वेनार्थरमणीयत्वेन च यानि पदानि सुप्तिङन्तानि तेषां विन्यासः सन्निवेशवैचित्र्यं जीवितं सर्वस्वं यस्य तत्तथोक्तं माधुर्यं नाम सुकुमारलक्षणस्य मार्गस्य प्रथमः प्रधानभूतो गुणः। असमस्तशब्दोऽत्र प्राचुर्यार्थः, न समासाभावनियमार्थः। उदाहरणं यथा

(2) [1] रघु० VI, 40.

क्रीडारसेन रहसि स्मितपूर्वमिन्दो-
र्लेखां विलङ्घ्य विनिशाम्य च सुभ्रु गौर्या ।
किं शोभितोऽहमनयेति शशाङ्कमौलेः
पृष्टस्य पातु परिचुम्बनमुत्तरं वः[1] ॥ ८१ ॥

अत्र पदानामसमस्तत्वं शब्दार्थरमणीयता विन्यासवैचित्र्यं च वितयमपि चकास्ति ।

तदेवं माधुर्यमभिधाय प्रसादमभिधत्ते—

अक्लेशव्यञ्जिताकूतं झगित्यर्थसमर्पणम् ।
रसवक्रोक्तिविषयं यत्प्रसादः स कथ्यते ॥ २१ ॥

झगिति प्रथमतरमेवार्थसमर्पणं वस्तुप्रतिपादनम् । कीदृशम्—अक्लेशव्यञ्जिताकूतम् अकदर्थनाप्रकटिताभिप्रायम् । किंविषयम्—रसवक्रोक्तिविषयम् । रसाः शृङ्गारादयः, वक्रोक्तिः सकलालङ्कारसामान्यं विषया गोचरो यस्य तत्तथोक्तम् । स एव प्रसादाख्यो गुणो कथ्यते भण्यते । अत्र पदानामसमस्तत्वं प्रसिद्धाभिधानत्वम् अव्यवहितसम्बन्धत्वं समासेऽपि गमकसमासयुक्तता च परमार्थः । 'आकूत'-शब्दस्त्वत्यर्थविच्छित्तौ च वर्तते । उदाहरणं यथा

हिमव्यपायादिवसादधराणा-
मापाण्डुरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किम्पुरुषाङ्गनानां
चक्रे पदं पत्रविशेषकेषु[2] ॥ ८२ ॥

अत्रासमस्तत्वादि[3]सामग्री विद्यते । यद्यपि विविधपत्रविशेषकवैचित्र्यविच्छित्तं किमपि वदनसौन्दर्यं मुक्ताकणाकारस्वेदलवोपबृंहितं तदपि सुव्यक्तमेव । यथा वा

(1) The last two lines of this verse are quoted again below, ii 84.

(2) कुमार० III, 33. (3) च समत्वादि B.

अनेन सार्धं विहराम्बुराशे-
स्तीरेषु ताडीवनमर्मरेषु ।
द्वीपान्तरानीतलवङ्गपुष्पै-
रपाकृतस्वेदलवा मरुद्भिः[1] ॥ ८३ ॥

अलङ्कारव्याप्तिर्यथा

बालेन्दुवक्राणि[2] इति ॥ ८४ ॥

एवं प्रसादमभिधाय लावण्यं लक्षयति—

वर्णविन्यासविच्छित्तिपदसन्धानसम्पदा ।
स्वल्पया वस्तुसौन्दर्यं लावण्यमभिधीयते ॥३२॥

वस्तो वाक्यविन्यासस्तस्य सौन्दर्यं रामणीयकं लावण्यमभिधीयते लावण्यमित्युच्यते। कीदृशम्—वर्णानामक्षराणां विन्यासो विचित्रं रचनं तस्य विच्छित्तिः शोभा वैदग्ध्यभङ्गी तया लक्षितं पदानां सुप्तिङन्तानां सन्धानं संयोजनं तस्य सम्पत्, सापि शोभैव, तया लक्षितम्। कीदृश्या—उभयरूपयापि स्वल्पया मनाङ्मात्रया नातिनिर्बन्धनिर्मितया। तदयमत्रार्थः—शब्दार्थसौकुमार्यसुभगः सन्निवेशमहिमा लावण्याख्यो गुणः कथ्यते। यथा—

स्नानार्द्रसुस्निग्धनुधूपवासं
विन्यस्तसावल्लनमल्लिकेषु ।
कामी वसन्तात्ययमन्दवीर्यः
केशेषु लेभे बलमङ्गनानाम्[3] ॥ ८५ ॥

अत्र सन्निवेशसौन्दर्यमहिमा सहृदयसंवेद्यो न व्यपदेष्टुं पार्यते। यथा वा

(1) रघु० ४, 53. (2) Already quoted above p. 49. (3) रघु० xvi, 50। आर्यासप्तशति no. 3289.

चक्रार बाणैरसुराङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः[1] ॥ ८६ ॥

अत्रापि वर्णविन्यासविच्छित्तिः पदसन्धानसम्पत्तिश्च सन्निवेशसौन्दर्य-निबन्धनस्फुटावभासैव।

एवं लावण्यमभिधाय आभिजात्यमभिधत्ते—

श्रुतिपेशलताशालि सुस्पर्शमिव चेतसा।
स्वभावमसृणच्छायमाभिजात्यं प्रचक्षते ॥ ३३ ॥

एवंविधं वस्तु आभिजात्यं प्रचक्षते आभिजात्याभिधानं गुणं वर्णयन्ति। श्रुतिः श्रवणेन्द्रियं तस्य पेशलता रामणीयकं तेन शालते श्राजते यत्तथोक्तम्। सुस्पर्शमिव चेतसा मनसा सुस्पर्शमिव। सुखेन सुष्ठ्वित्यतिशयोक्तिरियम्। यस्मादुभयमपि स्पर्शयोग्यत्वे सति सौकुमार्यात् किमपि चेतसि स्पर्शसुखमर्पयतीव। यतः स्वभावमसृणच्छायम् अहार्यश्लक्ष्णकान्ति यत्तद् आभिजात्यं कथयन्तीत्यर्थः। यथा

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी।
पुत्रप्रीत्या कुवलयदलप्रापि कर्णे करोति[2] ॥ ८७ ॥

अत्र श्रुतिपेशलतादि स्वभावमसृणच्छायत्वं किमपि सहृदयसंवेद्यं परिस्फुरति।

ननु च लावण्यमाभिजात्यं च लोकोत्तरत्वेनैकलक्षणवस्तुधर्मतया यत् प्रसिद्धं तत् कथं काव्यस्य भवितुमर्हतीति चेत्सत्यम्। यस्मादनेन न्यायेन पूर्वप्रसिद्धयोरपि माधुर्यप्रसादयोः काव्यधर्मत्वं विघटते। माधुर्यं हि गुडादिमधुरद्रव्यधर्मतया प्रसिद्धं तथाविधाह्लादकारित्वसामान्योपचारात् काव्ये व्यपदिश्यते। तथैव च प्रसादः स्वच्छसलिल-स्फटिकादिधर्मतया प्रसिद्धः स्फुटावभासित्वसामान्योपचाराच् झगिति-

(1) रघु० xi, 72. (2) मेघदूत 44.

प्रतीतिपेशलतां प्रतिपद्यते। तदेव च काव्ये कविशक्तिकौशलोल्लिखितवाक्यैकजीवितं बन्धसौन्दर्यं चेतनचमत्कारकारित्वसामान्योपचाराल्लावण्यशब्दव्यतिरेकेण शब्दान्तराभिधेयतां नोज्झति। तथैव च काव्ये स्वभावमसृणच्छायत्वमाभिजात्यशब्देनाभिधीयते।

ननु च कैश्चित्प्रतीयमानं वस्तु ललनालावण्यसाम्यात्लावण्यमित्यादितप्रतीतिः—

प्रतीयमानं पुनरन्यदेव
वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्त-
माभाति लावण्यमिवाङ्गनासु[1] ॥ ८८ ॥

तत्कथं बन्धसौन्दर्यमात्रं लावण्यमित्यभिधीयते? नैष दोषः, यस्मादनेन दृष्टान्तेन वाच्यवाचकलक्षणप्रसिद्धावयवव्यतिरिक्तत्वेनास्तित्वमात्रं साध्यते प्रतीयमानस्य, न पुनः सकललोकलोचनसंवेद्यस्य ललनालावण्यस्य। सहृदयहृदयानामेव संवेद्यं सत् प्रतीयमानं समीकर्तुं पार्यते। तस्य बन्धसौन्दर्यमेवाव्युत्पन्नपदपदार्थानामपि श्रवणमात्रेणैव हृदयहारित्वसदृश्या व्यपदिश्यते। प्रतीयमानं पुनः काव्यपरमार्थज्ञानामेवानुभवगोचरतां प्रतिपद्यते। यथा कामिनीनां किमपि सौभाग्यं तदुपभोगोचितानां नायकानामेव संवेद्यतामर्हति, लावण्यं पुनस्तासामेव सत्कविगिरामिव सौन्दर्यं सकललोकगोचरतामायातीत्युक्तमेवेत्यलमतिप्रसङ्गेन।

एवं सुकुमारस्य लक्षणमभिधाय विचित्रं लक्षयति—

प्रतिभाप्रथमोद्भेदसमये यत्र वक्रता।
शब्दाभिधेययोरन्तः स्फुरतीव विभाव्यते ॥३४॥

(१) ध्वन्यालोक १, ४.

अलङ्कारस्य कवयो यत्नालङ्करणान्तरम् ।
असन्तुष्टा निबध्नन्ति हाराद्यैरपि बन्धवत् ॥३५॥
रत्नरश्मिच्छटोत्सिक्तभासुरैर्भूषणैर्यथा ।
कान्ताशरीरमाक्राद्य भूषायै परिकल्प्यते ॥३६॥
यत्र तद्वदलङ्कारैर्भ्राजमानैर्निजात्मना ।
स्वशोभातिशयान्तःस्थमलङ्कार्यं प्रकाश्यते ॥३७॥
यदप्यनूतनोल्लेखं वस्तु यत्र तदप्यलम् ।
उक्तिवैचित्र्यमात्रेण काष्ठां कामपि नीयते ॥३८॥
यत्रान्यथाभवत् सर्वमन्यथैव यथारुचि ।
भाव्यते प्रतिभोल्लेखमहत्त्वेन महाकवेः ॥३९॥
प्रतीयमानता यच्च वाक्यार्थस्य निबध्यते ।
वाच्यवाचकवृत्तिभ्यां व्यतिरिक्तस्य कस्यचित् ॥४०॥
स्वभावः सरसाकूतो भावानां यत्र बध्यते ।
केनापि क्रमनीयेन वैचित्र्योपबृंहितः ॥४१॥
विचित्रो यत्र वक्रोक्तिवैचित्र्यं जीवितायते[1] ।
परिस्फुरति यस्यान्तः सा काव्यातिशयाभिधा ॥४२॥
सोऽतिदुःसञ्चरो येन विदग्धकवयो गताः ।
खड्गधारापथेनेव सुभटानां मनोरथाः ॥४३॥

Jayaratha (p. 8) quotes this line in connexion with his ex-
n of the वक्रोक्तिजीवितकार's views.

स विचित्राभिधानः पन्था कौट्टक्—अतिदुःसञ्चरः, यत्रातिदुःखेन सञ्चरते। किं बहुना, येन विदग्धकवयः केचिदेव व्युत्पन्नाः केवलं गताः प्रयाताः, तदाश्रयेण काव्यानि चक्रुरित्यर्थः। कथम्—खड्ग-धारापथेनेव सुभटानां मनोरथाः। निस्त्रिंशधारामार्गेण यथा सुभटानां महावीराणां मनोरथाः सङ्कल्पविशेषाः। तदयमत्राभिप्रायः—यद-सिधारामार्गगमने मनोरथानामौचित्यानुसारेण यथारुचि प्रवर्त-मानानां मनाङ्नाप्यमपि स्खलनता न सम्भाव्यते। साक्षात्समरसम्मर्दे-समाचरणे पुनः कदाचित् किमपि स्खलनमपि सम्भाव्येत। तदनेन मार्गस्य दुर्गमत्वं तत्रस्थितानां च विहरणप्रौढिः प्रतिपाद्यते। कौट्टक् स मार्गः—यत्र यस्मिन् शब्दाभिधेययोरभिधानाभिधीयमानयोरन्तः स्वरूपानुप्रवेशिनी वक्रता भणितिविच्छित्तिः स्फुरतीव प्रस्यन्दमानेव विभाव्यते लक्ष्यते। कदा—प्रतिभाप्रथमोद्भेदसमये। प्रतिभायाः कविशक्तेरचरमोन्मेषावसरे। तदयमत्र परमार्थः—यत् कविप्रयत्न-निरपेक्षयोरेव शब्दार्थयोः स्वाभाविकः कोऽपि वक्रताप्रकारः परिस्फुरन् परिदृश्यते। यथा

कोऽयं भाति प्रकारस्तव यवन पदं लोकपादाहतीनां
तेजस्विव्रातसेव्ये नभसि नयसि यत्पांसुपूरं प्रतिष्ठाम्।
यस्मिन्नुत्थाप्यमाने जननयनपथोपद्रवस्तावदास्तां
केनोपायेन सद्यो वपुषि कलुषतादोष एष त्वयैव[1] ॥८६॥

अत्राप्रस्तुतप्रशंसालक्षणोऽलङ्कारः प्राधान्येन वाक्यार्थः। प्रतीयमान-पदार्थान्तरत्वेन प्रयुक्तत्वाच्च विचित्रकविव्यक्तिसमुल्लिखितवक्रशब्दार्थो-पनिबन्धमाहात्म्यात् प्रतीयमानमप्यभिधेयतामिव प्रापितम्। प्रक्रम एव प्रतिभासमानत्वात्र चार्थान्तरप्रतीतिकारित्वेऽपि पदानां श्लेषव्यय देशः शक्यते कर्तुम्, वाच्यस्य समप्रधानभावेनानवस्थानात्। अर्थो-

(१) सुभाषितावली no. 1032 (भागवतामृतदत्तस्य).

स्मरप्रतीतिकारित्वं च प्रतीयमानार्थस्फुटत्वावभासनार्थंसुपनिबध्यमान-मतीवचमत्कारकारिणां प्रतिपद्यते ।

तमेव विविधं प्रकारान्तरेण लक्षयति—अलङ्कारस्येत्यादि । यत्र यस्मिन्मार्गे कवयो निबध्नन्ति विरचयन्ति, अलङ्कारस्य विभूषण-स्यालङ्करणान्तरं विभूषणान्तरम् असन्तुष्टाः सन्तः । कथम्—हारादेर्मणिबन्धवत् । मुक्ताकलापप्रभृतेर्यथा पदकादिमणिबन्धं रत्न-विशेषविन्यासं वैकटिकाः । यथा

हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तत्त्वत्तान्यजनोपकारघटनावैमुख्यलब्धाय्शो-
भारप्रोद्वहने करीषि कृपया साहायकं यन्मरोः[1] ॥ ८० ॥

अतात्यल्पगर्हणीयचरितं पदार्थान्तरं प्रतीयमानतया चेतसि निधाय तथाविधविलसितः मलिलनिधिर्वाच्यतयोपक्रान्तः । तदेतावदेवा-लङ्कारान्तरप्रस्तुतप्रशंसायाः[2] स्वरूपम्—गर्हणीयप्रतीयमानपदार्थान्तरपर्य-वसानमपि वाक्यं [व]स्तून्युपक्रमरमणीयतयोपनिबध्यमानं तद्विदाह्लाद-कारितामायाति । तदेतद् व्याजस्तुतिप्रतिरूपकप्रायमलङ्करणान्तरम-प्रस्तुतप्रशंसाया भूषणत्वेनोपात्तम् । न चात्र सङ्करालङ्कारव्यवहारो भवितुमर्हति[3], पृथगतिपरिस्फुटत्वेनावभासनात् । न चापि संसृष्टि-सम्भवः समप्रधानभावेनानवस्थितेः । न च द्वयोरपि वाच्यालङ्कारत्वम्, विभिन्नविषयत्वात् । यथा वा

नामाप्यन्यतरान्निमीलितमभूत्तावद्विमीलितं
प्रस्थाने स्खलतः स्वधर्मनि विधेरन्यद्गृहीतः करः ।

(1) Quoted anonymously in काव्यप्रकाश x. p. 671 = पुष्पराज on वक्रो-क्तीय (ii, 249) = Hemacandra (com.), p. 28 (anon) = Ruyyaka p. 113.
(2) ०प्रशंसयोः B. (3) ०मर्हतीति B

लोकस्यायमदृष्टदर्शनकृता[1] दृग्वैशसादुद्धृतो
युक्तं काष्ठिक सूनवान् यदसि तामास्खालिताकालिकीम्[2] ॥९१॥

अत्रायमेव न्यायोऽनुसन्धेयः। यथा च

किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा वल्लरी
लीलाप्रोच्छलितस्य किं लहरिका लावण्यवारांनिधेः।
उद्गाढोत्कलिकावतां स्वसमयोपन्यासविस्मापिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः[3] ॥ ९२ ॥

अत्र रूपकलक्षणो योऽयं[4] वाक्यालङ्कारः, तस्य सन्देहोक्तिरियं छायान्तरातिशयोत्पादनायोपनिबद्धा चेतनचमत्कारितामावहति। शिष्टं पूर्वोदाहरणद्वयोक्तमनुसर्तव्यम्।

अन्यच्च कोदृक्—रत्नेत्यादि। युगलकम्। यत्र यस्मिन्नलङ्कारैर्भ्राजमानैर्निजात्मना स्वजीवितेन भासमानैर्भूषाये परिकल्पते-शोभायैर्भूष्यते। कथम्—यथा भूषणैः, कङ्कणादिभिः। कीदृशैः—रत्नरश्मिच्छटोल्लेखभासुरैः मणिमयूखोल्लासभ्राजिष्णुभिः। किं कृत्वा—कान्तशरीरमाच्छाद्य कामिनीवपुः स्वप्रभाप्रसरतिरोहितं विधाय। भूषाये कल्पयते तद्देवालङ्करणैरुपमादिभिर्यत्र कल्पयते। एतच्चैतेषां भूषाये कल्पनम्—यदेतैः स्वशोभातिशयान्तःस्थं निजकान्ति-कमनीयान्तर्गतमलङ्कार्यम्[5] लक्ष्यतयेयं प्रकाश्यते द्योत्यते। तदिदमत्र तात्पर्यम्—तदलङ्कारमहिम्नैव तथाविधो[6]ऽत्र भ्राजते, तस्यात्यन्तो-द्भिन्नहृत्तेः स्वशोभातिशयान्तर्गतमलङ्कार्यं प्रकाश्यते[7]। यथा

(1) °कृप्ता B (2) °मास्खालिकामालिकीम् B. भल्लटशतक 86 = सुभाषितावली no 1017. (3) सुभाषितावली 1471 (कर्त्रा:) = anonymous in Ruyyaka p. 43. (4) °लक्षणयोर्यं B. (5) The whole passage from प्रतिभासते on p. 43, line 1, up to this word (inclusive) is dropped entirely in A. The above text is given by B alone (6) तादृशो A. (7) प्रकाश्यते B.

आर्यस्याजिमहोत्सवव्यतिकरे नासंविभक्तोऽत्र वः
कश्चित् क्वाप्यवशिष्यते त्यजत रे नक्षत्वरा: संभ्रमम् ।
भूयिष्ठेष्वपि का भवेषु[1] गणनात्यर्थं[2] किमुक्तास्यते
तस्योदारभुजोऽर्णवोऽनवसिता नाचारसम्पत्तय: ।६३॥

अत्राजिमहोत्सवव्यतिकरत्वेन तथाविधं रूपणं विहितं[3] यत्कालङ्कार्यम् "आर्य: स्वशौर्येण युष्मान् सर्वानेव मारयति" इत्यलङ्कारस्योभातिशयाक्रान्तत्वेन भ्राजते। तथा च कश्चित् सामान्योऽपि क्वापि दवीयस्यपि[4] देशे नासंविभक्तो युष्माकमवशिष्यते। तस्मात् समरमहोत्सवसंविभागलम्पटतया प्रत्येकं यूयं सम्भ्रमं त्यजत। गणनया वयं भूयिष्ठा इत्य[5]क्त्यानुष्ठानतां यदि मन्यध्वे तदप्ययुक्तम्। यस्मादसंख्यसंविभागशक्यता[6] कदाचिदसम्पत्त्या कार्पण्येन वा सम्भाव्यते, तदेतदुभयमपि नास्तीत्युक्तम्—तस्योदारभुजोऽर्णवोऽनवसिता नाचारसम्पत्तय: [इति]। यथा च

कृतम: प्रविजृम्भितविरहव्यथ: शून्यतां नीतो देश:[7] ॥६४॥

इति। यथा च

कानि च[8] पुण्यभाञ्जि भजन्त्यभिख्यामक्षराणि[9]॥६५॥

इति। अत्र कस्मादागता: स्थ, किं चास्य नाम इत्यलङ्कार्यमप्रस्तुतप्रशंसालक्षणालङ्कारच्छायाच्छुरितत्वेनैतदीयशोभातिशयेन[10] सहृदयहृदयाह्लादकारितां प्रापितम्[11]। एतच्च व्याजस्तुतिपर्यायोक्तप्रभृतीनां भूयसा विभाव्यते। ननु च रूपकादीनां स्वलक्षणावसर एव स्वरूपं निर्णीयते तत् किं प्रयोजनमेतेषामिहोदाहरणस्य? सत्यमेतत्, किन्त्वेतदेव विचित्रस्य वैचित्र्यं नाम यदलौकिकच्छायातिशययोगित्वेन भूषणोपनिबन्ध: कामपि वाक्यवक्रतामुन्मीलयति।

(1) का भव० lost in A. (2) गणना व्यर्थं A. (3) विहि० lost in A (4) दवी० lost in A. (5) इत्य lost in A. (6) ०यक्षता A. (7) हर्षचरित १, प: ४०, ४१ (8) न: A. (9) हर्षचरिते, तत्रैव। (10) तदीयशोभातिशयेन wanting in B. (11) for आपन्नम् प्रापितम् in B.

विचित्रमेव रूपान्तरेण लक्षयति—यदपीत्यादि। यदपि वस्तु वाच्यमनूतनोल्लेखमनभिनवत्वेनोल्लिखितं सदपि यत्र यस्मिन्वस्तुं कामपि काष्ठां नीयते लोकोत्तरातिशयकोटिमधिरोप्यते। कथम्[1]—उक्ति-वैचित्र्यमात्रेण, भणितिवैदग्ध्यमात्रेणेत्यर्थः। यथा

अस्सं लडहत्तणअं अज्ज चिअ काइ वत्तणच्छाआ।
सामा सामण्णपओअरुणो रेह चिअ ण होइ[2] ॥ ८६ ॥

यथा वा

उद्दे शोऽयं सरसकदलीश्वेषिणोभातिशायी[3]
कृष्णोत्कर्षाङ्कुरितहरिणीविभ्रमो[4] नर्मदायाः।
किं चैतस्मिन् सुरतसुहृदस्वन्ति ते वास्ति वाता
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः[5] ॥ ८७ ॥

भणितिवैचित्र्यमात्रमेवात्र काव्यार्थः, न तु नूतनोल्लेखशालि वाच्य-विजृम्भितम्। एतच्च भणितिवैचित्र्यं सहृदयप्रकारं सम्भवतीति स्वयमेवोल्लेक्षणीयम्।

पुनर्विचित्रमेव प्रकारान्तरेण लक्षयति—यत्रान्यथेत्यादि[6]। यत्र यस्मिन्नन्यथाभवदन्येन प्रकारेण सत् सर्वमेव पदार्थजातम् अन्यथैव प्रकारान्तरेणैव भाव्यते। कथम्—यथारुचि। स्वप्रतिभानानुरूपेणोत्प्रेक्ष्यते। केन—प्रतिभोल्लेखमहत्त्वेन महाकवेः, प्रतिभासोत्प्रेक्षातिशयत्वेन सत्कवेः[7]। यत्किल वर्ण्यमानस्य वस्तुनः प्रस्तावसमुचितं किमपि सहृदयहृदयहारि रूपान्तरं निर्निमीते कविः। यथा

(1) Omitted in A. (2) गाथासप्तशतक 969 = काव्यप्रकाश p. 630 (anon). = Ruyyaka p. 67 (anon). The काया would be—

अस्सं लडहत्तणअं अज्ज चिअ काइ वत्तणच्छाआ।
सामा सामण्णपओअरुणो रेह चिअ ण होइ ॥

(3) चिटपि for कदली in B. (4) रमणी for हरिणी in B (5 काव्यप्रकाश p. 76 (anon). (6) यत्रेति A, (7) सत्क० lost in A.

तापः स्वात्मनि संश्रितद्रुमलताशोषोऽध्वगैर्वर्जनं[1]
सख्यं[2] दुःसमया तृषा तव मरो कोऽलावनर्थो न यः[3] ।
एकोऽर्थस्तु महानयं जललवस्वाम्यक्षयोन्नर्जिनः
संनह्यन्ति न यत्तवोपकृतये[4] धाराधराः प्राकृताः[5] ॥९८॥

यथा वा

विशति यदि नो कश्चिच्छालं किलाम्बुनिधिं विधेः
कृतिषु सकलास्वेको लोके प्रकाशकतां गतः ।
कथमितरथा धात्रीं धाता तमांसि निशाकरं
स्फुरदिदमियत्ताराचक्रं प्रकाशयति[6] स्फुटम् ॥ ९९ ॥

अत्र जगद्धितस्यापि मरोः कविप्रतिभोल्लिखितेन लोकोत्तरौदार्यधुराधिरोपणेन[7] तादृक् स्वरूपान्तरमुन्मीलितं[8] यत्प्रतीयमानत्वेनोदारचरितस्य कस्यापि सत्स्वप्युचितपरिस्पन्दसुन्दरेषु पदार्थसहस्रेषु तदेव व्यपदेशपात्रतामर्हतीति तात्पर्यम् । अन्वयवार्थस्तु—दुःसमयेति 'तृड्'-विशेषणेन प्रतीयमानस्य त्रैलोक्यराज्येनाप्यपरितोषः पर्यवस्यति । अध्वगैर्वर्जनमित्यौदार्येऽपि तस्य समुचितसंविभागासम्भवादर्थिभिर्लज्ज्यमानैरिव स्वयमेवानभिसरणं प्रतीयते । संश्रितद्रुमलताशोष इति तदाश्रितानां तथाविधेऽपि सङ्कटे तदेकनिष्ठताप्रतिपत्तिः । तस्य च पूर्वोक्तस्वपरिकरपरितोषाच्चमत्कृतया तापः स्वात्मनि, न भोगलवलौल्येनेति प्रतिपद्यते । उत्तरार्धेन—तादृशे दुर्विलसितेऽपि परोपकारविषयत्वेन श्लाघास्पदत्वमुन्मीलितम् । अपरत्रापि विधिविहितसमुचितसमयसम्भवं सलिलनिधिनिमज्जनं निजोदयन्यक्कृतनिखिलस्वपरपक्षः प्रजापतिप्रणीतसकलपदार्थप्रकाशनव्रताभ्युपगमनिर्वहणाय

(1) शोषोऽ० lost in A. (2) सख्य A. (3) ०वनर्थोदय. A. (4) न यत् lost in A. (5) सुभाषितावली no. 948 (ईश्वरसूरीर्लाटकस्य) (6) प्रकाशयतु B (7) ०तराधिरोपणेन B. (8) ०सरकृत्यादिर्तं A. (9) ०मसीयमानश्लेषोदार० A.

विवक्षान् स्वयमेव समाचरतीत्यन्यथा कदाचिदपि प्रयाङ्कृतम्[1] स्तारादीनामभिव्यक्तिर्मनागपि न सम्भवतीति कविनानूतनत्वेन यदुल्लिखितं तदतीवप्रतीयमानमङ्गस्यव्यक्तिपरत्वेन चमत्कारकारितामापद्यते[2]।

विचित्रमेव प्रकारान्तरेणोन्मीलयति—प्रतीयमानेत्यादि। यत्र यस्मिन् प्रतीयमानता गम्यमानता काव्यार्थस्य मुख्यतया विवक्षितस्य वस्तुनः कस्यचिदनाख्येयस्य[3] निबध्यते। कया युक्त्या[4]—वाच्यवाचकवृत्तिभ्यां शब्दार्थशक्तिभ्याम्[5]। व्यतिरिक्तस्य[6] तदतिरिक्तवृत्तेरन्यस्य व्यंग्यभूतस्याभिव्यक्तिः क्रियते। 'वृत्ति'-शब्दोऽत्र शब्दार्थयोस्तत्प्रकाशनसामर्थ्यमभिधत्ते। एष च 'प्रतीयमान'-व्यवहारो वाक्यवक्रताव्याख्यानावसरे सुतरां समुन्मीलति। अनन्तरोक्तमुदाहरणद्वयमत्र योजनीयम्[7]। यथा वा

वक्त्रेन्दोर्[8] हरन्ति बाष्पपयसां धारा मनोज्ञां श्रियं
निश्वासा न कदर्थयन्ति मधुरां बिम्बाधरस्य द्युतिम्।
तस्यास्त्वद्विरहे विपक्कलवलीलावण्यसंवादिनो
च्छाया कापि[9] कपोलयोरनुदिनं तन्व्याः परं पुष्यति[10] ॥१००॥

अत्र त्वद्विरहवैधुर्यसंवरणकदर्थनामनुभवन्त्यास्तस्यास्तथाविधे मङ्गति गुरुसङ्कटे वर्तमानायाः—किं बहुना—बाष्प[11] निश्वासमोक्षावसरोऽपि न सम्भवति। केवलं परिणतलवलीलावण्यसंवादसुभगा कापि कपोलयोः कान्तिरञ्जकसंवरणा प्रतिदिनं[12] परं परिपोषमासादयतीति वाच्य-

(1) ०मत A. (2) प्रतिदधते for आपद्यते in A. (3) ०नाख्येयवस्तुनो A (4) दृष्ट्या A. (5) omitted in A. (6) omitted in B (7) प्रयोजनीयम् B. (8) वक्त्रेन्दो lost in A. (9) छाया कापि lost in A. (10) कवीन्द्रवचन० 27 (धर्मकीर्तेः) = सदुक्तिकर्णामृत II, 141 (धर्मकीर्तेः) = सुभाषितावली p 47 (introd) (11) मा बाष्प lost in A. (12) ०दिन lost in A.

व्यतिरिक्तवृत्तिः दूत्युक्तितात्पर्ये[1] प्रतीयते। उक्तप्रकारकान्तिमत्त्व-कथनं च कान्तकौतुकोत्कलिकाकारणतां प्रतिपद्यते।

विचित्रमेव स्वरूपान्तरेण प्रतिपादयति—स्वभाव इत्यादि। यत्र यस्मिन् भावानां स्वभावः स्वपरिस्पन्दः सरसाकूतो[2] रसनिर्भराभिप्रायः पदार्थानां निबध्यते निवेश्यते। कीदृशः—केनापि कमनीयेन वैचित्र्य-णोपलक्षितः, लोकोत्तरेण हृदयहारिणा वैदग्ध्येनोल्लेखितः। 'भाव'-शब्देनात्र सर्वपदार्थोऽभिधीयते, न रत्यादिरेव। उदाहरणम्

क्रीडासु बालकुसुमायुधसङ्गतायाः
यत्तत् स्मितं न खलु तत् स्मितमात्रमेव।
आलोक्यते स्मितपटान्तरितं मृगाक्ष्या-
स्तस्याः परिस्फुरदिवापरमेव किञ्चित् ॥१०१॥

अत्र न खलु तत् स्मितमात्रमेवेति प्रथमार्धेऽ[3]भिलाषसुभगं सरसाभि-प्रायत्वमुक्तम्[4]। अपरार्धे तु[5]—हसितांशुकतिरोहितमन्यदेव[6] किमपि परिस्फुरदालोक्यत इति कमनीयवैचित्र्यविच्छित्तिः।

इदानीं विचित्रमेवोपसंहरति—विचित्रो यत्रेत्यादि। एवंविधो विचित्रो मार्गो[7] यत्र यस्मिन् वक्रोक्तिवैचित्र्यम् अलङ्कारविचित्रभावो जीवितायते जीवितवदाचरति। वैचित्र्यादेव विचित्रे 'विचित्र'-शब्दः[8] प्रवर्तते। तस्मात्तदेव तस्य जीवितम्। किं तद्वैचित्र्यं नामेत्याह—परिस्फुरति यस्यान्तः सा काव्यातिशयाभिधा। यस्यान्तः स्वरूपा-नुप्रवेशेन सा काव्यलौकिकातिशयोक्तिः परिस्फुरति भ्राजते। यथा—

(1) प्रत्युक्ति for दूत्युक्ति in A. (2) सरसाकृत A. (3) अर्धे omitted in A. In B, the last two lines of the verse are missing. After reading the first-half of the verse, it goes on इति प्रथमार्धे. (4) ०प्रायसुक्तम् A. (5) च A. (6) स्मितांशुक० A. (7) विचित्रः पन्थाः A. (8) विचित्रेऽपि चित्रशब्द A.

यत्नेनारजसामुदञ्चति चये द्राभ्यां दृवोयोऽन्तरान्
पाणिभ्यां युगपद्विलोचनपुटानष्टात्तमो रचितुम्।
एकैकं दलमुन्नमय्य गमयन् वासाम्बुजं कोशतां
धाता संवणाकुलश्चिरमभूत् स्वाध्यायबद्धानन:[1] ॥१०२॥

एवं वैचित्र्य सम्भावनानुभानप्रवृत्तायाः[2] प्रतीयमानत्वमुक्त्वेच्छायाः। तस्य धारा[3]विरोहस्वरूपमणीयत्वयातिशयोक्तिपरिस्पन्दस्यन्दि संदृश्यते।

तदेवं वैचित्र्य व्याख्याय तस्यैव गुणान् व्याचष्टे—

वैदग्ध्यस्यन्दिमाधुर्यं पदानामत्र बध्यते।
याति यत्त्यक्तशैथिल्यं बन्धबन्धुरताङ्गताम् ॥८४॥

अत्राभिन्न माधुर्यं वैदग्ध्यस्यन्दि वैचित्र्यसमर्पकं पदानां बध्यते वाक्यैकदेशानां[4] निवेश्यते। यत्त्यक्तशैथिल्यमुज्झितकोमलभावं भवद्बन्धबन्धुरताङ्गतां याति सन्निवेशसौन्दर्योपकरणतां गच्छति। यथा

किं तारुण्यतरोः, इत्यत्र[5] पूर्वार्धे[6] ॥ १०३ ॥

एवं माधुर्यमभिधाय[7] प्रसादमभिधत्ते—

असमस्तपदन्यासः प्रसिद्धः कविवर्त्मनि।
किञ्चिदोजः स्पृशन् प्रायः प्रसादोऽप्यत्र दृश्यते ॥८५॥

असमस्तानां समासरहितानां[8] पदानां न्यासो निबन्धः कविवर्त्मनि विपश्चिन्मार्गे यः प्रसिद्धः प्रख्यातः सोऽप्यस्मिन् विचित्राख्ये प्रसादाभिधानो गुणः किञ्चित् कियन्मात्रमोजः[9] स्पृशन्नुत्तानतया व्यवस्थितः प्रायो दृश्यते प्राचुर्येण लक्ष्यते। बन्धसौन्दर्यनिबन्धनत्वात्। तथाविधस्यौजसः समासवती वृत्तिः 'ओजः'-शब्देन चिरन्तनैरुच्यते[10]।

(1) काव्यमीमांसा VII, 66 (p. 203). (2) सम्भावनानुप्रह० A. (3) धारा lost in A. (4) देशानां lost in A. (5) ०रीत्यत्र lost in A (6) See above p. 60. (7) ०नभिधा० lost in A. (8) ०समर्हि० lost in A. (9) ०त् कियन्मा० lost in A. (10) दण्डी i, 80; वामन iii, 1, 5.

तदयमत्र परमार्थः—पूर्वस्मिन् प्रसादलक्षणे सत्योजःसंस्पर्शमात्रमिह विधीयते। यथा

अपाङ्गगततारकाः स्तिमितपक्ष्मपालीश्चतः
स्फुरत्सुभगकान्तयः स्मितसमुन्नतिद्योतिताः।
विलासभरमन्थरास्तरलकल्पितैकभ्रुवो[1]
जयन्ति रमणेऽर्पिताः[2] समदसुन्दरीदृष्टयः ॥ १०४ ॥

प्रसादमेव प्रकारान्तरेण प्रकटयति—

गमकानि निबध्यन्ते वाक्ये वाक्यान्तराण्यपि।
पदानीवाच्च कोऽप्येष प्रसादस्यापरः क्रमः ॥४६॥

अत्राक्षिप्ते विचिते यद्वाक्यं पदसमुदायस्तस्मिन् गमकानि समर्पकाण्यन्यानि वाक्यान्तराणि निबध्यन्ते निवेश्यन्ते[3]। कथम्—पदानीव पदवत्, परस्परान्वितानीत्यर्थः[4]। एष[5] कोऽप्यपूर्वः प्रसादस्यापरः क्रमः वन्यच्छायाप्रकारः। यथा

नामाप्यन्यतरो:[6] इति ॥ १०५ ॥

प्रसादमभिधाय लावण्यं लक्षयति—

अव्यालुप्तविसर्गान्तैः पदैः प्रीतैः[7] परस्परम्।
श्लक्ष्णैः संयोगपूर्वैश्च लावण्यमतिरिच्यते ॥४७॥

अत्राक्षिप्तैर्विचितैः पदैर्लावण्यमतिरिच्यते परिपोषं प्राप्नोति। कीदृशैः—परस्परमन्योन्यं प्रीतैः संश्लेषं नीतैः। अन्यच्च[8] कीदृशैः—अव्यालुप्तविसर्गान्तैः, अव्यालुप्तविसर्गाः[9] श्रूयमाणविसर्जनीया अन्ता येषां तानि तथोक्तानि तैः। श्लक्ष्णैश्च लघुभिः। संयोगेभ्यः[10] पूर्वैः। अतिरिच्यते

(1) मन्थराः सरला B. (2) रमणार्पिताः B. (3) omitted in B. (4) परस्परान्विताविव्यर्थः A. (5) अयं A. (6) See above p. 59 (7) प्रोक्तैः A, (8) अन्यथा A. (9) °विसर्जनीयैः A. (10) संयोग only in A.

इति सम्बन्धः। तदिदमत्र तात्पर्यम्—पूर्वोक्तलक्षणं लावण्यं विद्य[1]-मानमनेनातिरिक्तता[2] नीयते। यथा

श्वासोत्कम्पतरङ्गिणि स्तनतटे धौताञ्जनश्यामलाः
कीर्यन्ते करुणाः कृशाङ्गि किममी बाष्पाम्बुशा बिन्दवः।
किञ्चाकुञ्चितकण्ठरोधकुटिलाः कर्णान्तलम्बिनो
हुङ्काराः कलपञ्चमप्रणयिनस्त्रुट्यन्ति निर्यान्ति च[3] ॥१०६॥

यथा वा

एतस्मिन्विपक्वतिन्दुकफलश्यामोदराधाक्षर-
प्रान्तं श्वस्त पुलिन्दसुन्दरकरस्पर्शक्षमं[4] लक्ष्यते।
तत् पल्लीपतिपुत्रि कुञ्जरकुलं कुम्भाभयाभ्यर्थना[5]-
दीनं त्वामनुयाचते कुचयुगं[6] पत्रांशुकैर्मा पिधाः[7] ॥१०७॥

यथा वा

हंसानाम् निनदेषु[8] इति ॥ १०८ ॥

एवं लावण्यमभिधायाभिजात्यमभिधीयते—

यन्नातिकोमलच्छायं नातिकाठिन्यमुद्वहत्।
आभिजात्यं मनोहारि तदत्र प्रौढिनिर्मितम् ॥४८॥

'अत्रास्मिन् तदभिजात्यं यन्नातिकोमलच्छायं नात्यन्त[9]मसृणकान्ति नातिकाठिन्यमुद्वहन्नातिकठोरतां धारयत् तत् प्रौढिनिर्मितं सकल[10]-कविकौशलसम्पादितं सन्मनोहारि हृदयरञ्जकं भवतीत्यर्थः[11]। यथा

अधिकरसलसत्यं कल्पितस्तोपलीला-
परिमलन[12]निमीलत्पाण्डिमा गण्डपाली।

(1) विद्योत A. (2) ०नमेन व्यतिरिक्तता A. (3) कवीन्द्रवचन० no. 45((anon). See above p. 32 (4) कर lost in A. (5) ०भयाभ्यर्थना B. (6 ०नाथति स्तन० B. (7) सदुक्तिकर्णामृत ii, 376 (वल्लण)=काव्यप्रकाश p. 26((anon). (8) See above p. 44. A omits निनदेषु. (9) नात्यन्त lost in A (10) चत् for सकल A. (11) भवती lost in A. (12) परिनिलन A.

श्रुतमु कथय कस्य व्यक्तयत्यक्षमेव
स्मरनरपतिकैशोयौवराज्याभिषेकम्[1] ॥ १०८ ॥

एवं सुकुमारविचित्तानामेव गुणानां विचित्रे कस्मिंदतिशयः सम्पद्यत इति बोद्धव्यम् ।

आभिजात्यप्रभृतयः पूर्वमार्गोदिता गुणाः ।
अत्यतिशयमायान्ति जनितार्द्रार्थ[2]सम्पदः ॥ १०९ ॥

इत्यक्षरश्लोकः[3] ।

एवं विचित्रमभिधाय मध्यमसुपक्रमते[4]—

वैचित्र्यं सौकुमार्यञ्च यत्र सङ्कीर्णतां गते ।
भ्राजेते सदृशार्द्रार्थशोभातिशयशालिनी ॥ ४९ ॥
माधुर्यादिगुणग्रामो वृत्तिमाश्रित्य मध्यमाम् ।
यत्र कामपि पुष्णाति बन्धच्छायातिरिक्ततां ॥ ५० ॥
मार्गोऽसौ मध्यमो नाम नानारुचिमनोहरः ।
स्पर्धया यत्र वर्तन्ते मार्गद्वितयसम्पदः ॥ ५१ ॥
अत्यारोचकिनः केचिच्छायावैचित्र्यरञ्जके ।
विदग्धभोग्यविधौ भुवङ्गा इव सादराः[5] ॥ ५२ ॥

मार्गोऽसौ मध्यमो नाम मध्यमाभिधानोऽसौ पन्थाः । कीदृशः —नानाविधा रुचयः प्रतिभासा येषां ते तथोक्तास्तेषां[6] सुकुमार-विचित्रमध्यमव्यसनिनां[7] सर्वेषामेव मनोहरो हृदयहारी । यस्मिन्

(1) °विषेकम् lost in A. Quoted in काव्यप्रकाश p. 342. (2) °सार्थं A. (3) Omitted in B. (4) °क्रमिष्यते A. (5) This कारिका is omitted here in B, but given later. (6) तेषां omitted in A. (7) °स्यानिकानां for °व्यसनिनां in A.

सर्वया मार्गद्वितयसम्पदः सुकुमारविचित्रशोभाः साम्येन वर्तन्ते व्यवतिष्ठन्ते, न न्यूनातिरिक्तत्वेन। यच्च वैचित्र्यं विचित्रत्वं सौकुमार्यं सुकुमारत्वं सङ्कीर्णतां गते तस्मिन् मिश्रतां प्राप्ते सती भ्राजिते शोभेते। कीदृशे[1]—सहजाहार्यशोभातिशयशालिनी, शक्तिव्युत्पत्तिसम्भवौ यः[2] शोभातिशयः कान्त्युत्कर्षस्तेन शालेते श्राघेते ये ते तथोक्ते।

माधुर्येत्यादि। यच्च च माधुर्यादिगुणग्रामो माधुर्यप्रभृतिगुणसमूहो मध्यमासुभयच्छायाच्छुरितां वृत्तिं स्वच्छन्दगतिमाश्रित्य कामप्यपूर्वां बन्धच्छायातिरिक्तां सन्निवेशकान्त्यधिकतां पुष्णाति पुष्यतीत्यर्थः।

तत्र गुणानामुदाहरणानि। तत्र माधुर्यस्य यथा—

वेलानिलैर्मृदुभिराकुलितालकान्ता
गायन्ति यस्य चरितान्यपरान्तकान्ताः।
लोलानताः समवलम्ब्य लतास्तरूणां
शिन्तालमालिषु तटेषु महार्णवस्य[3] ॥ १११ ॥

प्रसादस्य यथा—

तद्वक्त्रेन्दुविलोकनेन[4] इत्यादि ॥ ११२ ॥

लावण्यस्य यथा—

संक्रान्ताङ्गुलिपर्वसूचितकरस्पर्शा कपोलस्थली
नेत्रे निर्भरमुक्तबाष्पकलुषे निश्वासताम्रोऽधरः।
बद्धोद्वेदविशृङ्खलालकलता निर्वेदशून्यं मनः
कष्टं दुर्नयवेदिभिः कुसचिवैर्वैदेह्या दृढं खेद्यते[5] ॥ ११३ ॥

आभिजात्यस्य यथा—

आलम्ब्य लम्बाः सरसाग्रवल्लीः
पिबन्ति यस्य स्तनभारनम्राः।

(1). Omitted in A. (2) सम्भवोदयः B. (3) पादताडितकभाष्य, श्लो॰ 55 (4) See above p. 13 (5) तापसवत्सराज (Berlin Ms iii., 76b).

स्रोतश्चुतं शोकरकुणिताक्षो
मन्दाकिनीनिर्भरमग्नमुख्यः ॥ १२४ ॥

एवं मध्यमं व्याख्याय तमेवोपसंहरति—अत्रेति[1]। अत्रैतस्मिन् केचित् कतिपये सादरास्तदाग्रहेण काव्यानि कुर्वन्ति। यस्मात्[2] अरोचकिनः कमनीयवस्तुअसहिनः[3]। कीदृशे चास्मिन्—छायावैचित्र्यरञ्जके कान्तिविच्छित्तिभावाच्छादके। कथम्—विदग्धनेपथ्यविधौ भुजङ्गा इव, अपास्याकल्पकल्पने नागरा यथा। सोऽपि छायावैचित्र्यरञ्जक एव।

अत्र गुणोदाहरणानि[4] परिमितत्वात्प्रदर्शितानि, प्रतिपदं पुनश्छायावैचित्र्यं सहृदयैः स्वयमेवानुसर्तव्यम्[5]। अनुसरणदिक्प्रदर्शनं पुनः क्रियते। यथा—मालतीमाधवराजमल्लीरत्नावलीनां सौकुमार्यवैचित्र्य[8]संवलितपरिस्पन्दसुन्दराणि काव्यानि सम्भवन्ति। तत्र मध्यममार्गसंवलितं[9] स्वरूपं विचारणीयम्। एवं सहजसौकुमार्यसुभगानि[10] कालिदाससर्वसेनादीनां काव्यानि द्रष्टव्यानि। तत्र सुकुमारमार्गस्वरूपं चर्वणीयम्। तथैव च विचित्रवक्रत्वविजृम्भितं हर्षचरिते[11] प्राधुर्येण भट्टबाणस्य विभाव्यते[12], भवभूतिराजशेखरविरचितेषु बन्धसौन्दर्यसुभगेषु मुक्तकेषु परिदृश्यते। तस्मात् सहृदयैः सर्वत्र सर्वमनुसर्तव्यम्[13]। एवं मार्गान्वितयलक्षणं दिङ्मात्रमेव प्रदर्शितम्। न पुनः साकल्येन सत्कविकौशलप्रकाराणां केनचिदपि स्वरूपमभिधातुं पार्यते। मार्गेषु गुणानां समुदायधर्मता। यथा न केवलं श्लेषादिधर्मत्वं तथा तल्लक्षणव्याख्यानावसर एव प्रतिपादितम्।

(1) B here inserts कारिका 52. (2) यस्मात् A. (3) omitted in A. (4) ०हरणा lost in A. (5) स्वयमनुसरणीयम् A. (6) मालिनी B. (7) ०पुराज lost in A. (8) ईदृश्या for वैचित्र्य in B. (9) मार्गसंधि संवलितं B. (10) ०र्यसुभगा० lost in A. (11) हर्षचर्यं A. (12) भा and वि lost in A. (13) सम० for सर्वम० in A.

एवं प्रत्येकं प्रतिनियतगुणग्रामरमणीयं मार्गचित्रयं साधारणगुणस्वरूपव्याख्यानार्थमाह—

आह्लसेन स्वभावस्य महत्त्वं येन पोष्यते ।
प्रकारेण तदौचित्यमुचिताख्यानजीवितम् ।

तदौचित्यं नाम गुणः । कीदृक्—आह्लसेन सुखहेतुना पदार्थस्य महत्त्वमुत्कर्षो येन पोष्यते परिपोषं प्राप्यते[2] । प्रकः प्रस्तुतत्वादभिधावैचित्र्यमत्र 'प्रकार'-शब्देनोच्यते । कीदृशमुचिताख्यानमुदाराभिधानं जीवितं परमार्थो यस्य तत्तथोक्तम् । गुणेनैव विभूषणविन्यासो विच्छित्तिमावहति । यथा

करतलकलिताक्षमालयोः
समुदितसाध्वसमञ्जुहस्तयोः ।
क्षतरुचिरजटानिवेशयो-
रपर इवेश्वरयोः समागमः[3] ॥ ११५ ॥

यद्वा वा

उपगिरि पुरुहूतस्यैष सेनानिवेशः
स्फुटमपरमितो[4] द्रेस्त्वत्तादन्यावसन्तु ।
ध्रुवमिह करिणस्ते दुर्धराः सन्निकर्षे
सुरगजमलेखासौरभं न क्षमन्ते ॥ ११६ ॥

यथा च

हे नागराज बहुधास्य नितम्बभागं
भोगेन गाढमभिवेष्टय मन्दराद्रेः ।

(1) सुहृदेव A. (2) परिपोषं प्राप्यते omitted in A (3) Berlin *Ms* iii, 84b The word समागमः repeated in *B* (4)

सोढाविषह्यहृदयावलग्नयोगक्लेशा-
पर्यङ्कबन्धनविधेस्तव कोऽतिभारः[1] ॥ ११७ ॥

अत्र पूर्वत्रोदाहरणयोः[2] भूषणगुणेनैव तद्गुणपरिपोषः, इतरत्र च स्वभावौदार्याभिधानेन[3] ।

औचित्यस्यैव छायान्तरेण स्वरूपमुन्मीलयति—

यत्र वक्तुः प्रमातुर्वा वाच्यं शोभातिशायिना ।
आच्छाद्यते स्वभावेन तदप्यौचित्यमुच्यते ॥५४॥

यत्र यस्मिन् वक्तुरभिधातुः प्रमातुर्वा श्रोतुर्वा स्वभावेन स्वपरिस्पन्देन वाच्यमभिधेयं वस्तु शोभातिशायिना रामणीयकमनोहरेण आच्छाद्यते संव्रियते[4] तदप्यौचित्यमेवोच्यते । यथा

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः[5] ॥११८॥

अत्र श्लाघ्यतया तथाविध[6] महाराजपरिस्पन्दे वर्ण्यमाने मुनिना स्वानुभवसिद्धव्यवहारानुसारेणालङ्करणयोजनमौचित्यपरिपोषमावहति । अत्र[7] वक्तुः स्वभावेन च वाच्यपरिस्पन्दः संहृतप्रायो लक्ष्यते । प्रमातुर्यथा

निषीयमानस्तवका शिलीमुखै[8]-
रशोकयष्टिश्चलबालपल्लवा ।
विडम्बयन्ती दृढमौ वधूजने-
रमन्ददष्टौष्ठकरावधूननम्[9] ॥ ११९ ॥

(1) Quoted anonymously in काव्यमीमांसा p. 88 = सरस्वतीकण्ठाभरण p. 65 = Hemacandra, छन्द, p. 15. (2) पूर्वोदाहरणे B (3) औदार्याभिधानेन lost in A. (4) संव्रियते B. (5) रघु० v, 15. (6) Omitted in A. (7) Omitted in B. (8) ०का शिलीं० lost in A. (9) ०रानन्ददष्टौ० A. किरात० viii, 6.

अत्र वधूजनेनिजानुभववासनानुसारेण[1] तथाविधशोभाभिरामतानुभूतिरौचित्यपरिपोष[2]मावहति। यथा वा

वापीतडे कुडुंगा पिअसहि आउं गएहिं दीसंति।
ण धरंति करेण भणंति ण त्ति वलिउं पुण ण देंति[3] ॥१२०॥

अत्र करस्थाचिन्तमाढभूतायाः सातिशयसौभाग्यपरिस्पन्दसुन्दरेण स्वभावेन वाच्य[4]मार्च्छादितमौचित्यपरिपोषमावहति[5]।

एवमौचित्यमभिधाय सौभाग्यमभिधत्ते[6]—

कुत्सोपादेयवर्गेऽस्मिन् यदर्थं प्रतिभा कवेः।
सम्यक् संरभते तस्य गुणः सौभाग्यमुच्यते ॥५५॥

इत्येवंविधेऽस्मिन्कुत्सोपादेयवर्गे शब्दाद्युपेयसमूहे[7] यदर्थं यन्निमित्तं कवेः सम्बन्धिनी प्रतिभा शक्तिः सम्यक् सावधानतया संरभते व्यवस्यति तस्य वस्तुनः प्रस्तुतत्वात् काव्याभिधानस्य यो गुणः स सौभाग्यमित्युच्यते भण्यते।

तच्च न[8] प्रतिभासंरम्भमात्रसाध्यम्, किन्तु सन्निहितसमस्तसामग्रीसम्पाद्यमित्याह[9]—

सर्वसम्पत्परिस्पन्दसम्पाद्यं सरसात्मनाम्।
अलौकिकचमत्कारकारि काव्यैकजीवितम् ॥५६॥

सर्वसम्पत्परिस्पन्दसम्पाद्यं सर्वस्योपादेयराशेर्या सम्पत्तिरनवद्यतासाकाङ्क्षा तस्याः परिस्पन्दः स्फुरितत्वं तेन सम्पाद्यं निष्पादनीयम्।

(1) •सारेण lost in A. (2) परिपोष omitted in B. (3) This verse is obscure in sense. B reads तावी• for वापी•: while in A the last line reads ण धरंति करेण भ•• लोडाप्पुण ण देंति। (4) मार्च्छ A. (5) B omits परिपोष। (6) •मभिधीयते A. (7) कुत्सादेय for कुत्सोपेय in A. (8) Omitted in A. (9) A reads •जन्य for •सम्पाद्य; B omits सकल before सामग्री.

अन्यच्च कौतुकम्—सरसात्मनामार्द्रचेतसामलौकिकचमत्कारकारि लोकोत्तराह्लादविधायि। किं बहुना, तच्च काव्यैकजीवितं काव्यस्य यदः परमार्थ इत्यर्थः[1]। यथा

दोर्मूलावधि[2] सूचितस्तनसुरः स्निग्धत्वटाचे इशौ
किञ्चिन्नाण्डवपण्डिते स्खलितसुधासिक्तोल्लिखु भ्रूलते।
वेसः कन्दलितं स्मरव्यतिकरैर्लावण्यमङ्गैर्वृतं[3]
तन्वङ्ग्याः कृतिभिः सृपेति शनैरन्येव काचिल्लिपिः[4] ॥१२१॥

तन्वङ्ग्याः[5] प्रथमतरारूढेऽवतीर्णे आकारस्य[6] चेतसश्चेष्टायाश्च वैचित्र्यमत्र[7] वर्णितम्। तत्र[8] सूचितस्तनसुरो लावण्यमङ्गैर्वृतमित्याकारस्य, स्मरव्यतिकरैः कन्दलितमिति चेतसः, स्निग्धत्वटाचे इशाविति किञ्चिन्नाण्डवपण्डिते स्खलितसुधासिक्तोल्लिखु भ्रूलते इति चेष्टायाश्च। सूचित[9]-स्निग्ध-नाण्डव-पण्डित-कन्दलितानामुपचारवक्रत्वं लक्ष्यते, स्निग्धादित्वेतस्य कालविशेषावेदक.[10] प्रत्ययवक्रभावः, अन्येव काचिदवर्णनीयेति संहृतिवक्रतावैचित्र्यम्, अङ्गैर्वृतमिति[11] कारकवक्रत्वम्। विचित्रमार्गविषयो लावण्यगुणातिरेकः। तदेवमेतस्मिन्[12] प्रतिभासंरम्भजनितसकलसामग्रीसमुन्मीलितं सरसहृदयाह्लादकारि किमपि सौभाग्यं समुल्लसति।

अनन्तरोक्तस्य गुणत्रयस्य विषयं प्रदर्शयति—

एतस्मिंश्चापि मार्गेषु गुणत्रितयमुज्ज्वलम्।
पदवाक्यप्रबन्धानां व्यापकत्वेन वर्तते ॥ ५० ॥

(1) Omitted in A. (2) °मूलादधि A. (3) वृतं for वृतं in A. (4) Quoted by Hemacandra p. 302. B reads काचिद्वृत्तिः। (5) तस्याः A. (6) °स्याकण्ठावतीर्णस्याकारस्य A. (7) एव for अत्र in A. (8) Omitted in B. (9) °स्निग्धसूचित A. (10) कालविच्छेदावशेषकः A. (11) वृतं for वृतं in A. (12) तदेतस्मिन् A.

एतद्गुणहितयमौचित्यसौभाग्याभिधानम् उज्ज्वलमतीवभ्राजिष्णु[1] पदवाक्यप्रबन्धानां त्रयाणामपि[2] व्यापकत्वेन वर्तते सकलावयवव्याप्तावतिष्ठते। क्वेत्याह—त्रिष्वपि मार्गेषु सुकुमारविचित्रमध्यमाख्येषु तत्र पदस्य तावदौचित्यं बहुविधभेदभिन्नो वक्रभावः। स्वभावस्याप्यसेन प्रकारेण परिपोषणमेव वक्रतायाः परं रहस्यम्[3]। उचितानिधान[4]-जीवितत्वाद् वाक्यस्याप्येकदेशेऽप्यौचित्यविरहात्तद्विदाह्लादकारित्वहानिः। यथा रघुवंशे

पुरं निषादाधिपतेस्तदेत-
त्स्त्रिग्धाया मौलिमणिं विहाय।
जटासु बद्धास्वरुदत्सुमन्त्रः
कैकेयि कामाः फलितास्तवेति[6] ॥ १२२ ॥

अत्र रघुपतेरनर्घमहापुरुषसम्यदुपेतत्वेन वर्ण्यमानस्य 'कैकेयि कामाः फलितास्तव' इत्येवंविधतुच्छतरपदार्थसंस्मरणं तदभिधानं चात्यन्त[7]-मनौचित्यमावहति। प्रबन्धस्यापि क्वचित्प्रकरणैकदेशेऽप्यौचित्यविरहा-देकदेशदाहदूषितदग्धपटप्रायता प्रसज्यते। यथा—रघुवंशे एव[8] दिलीप-सिंह-संवादावसरे

अथैकधेनोरपराधचण्डा[9]-
द्गुरोः कृशानुप्रतिमाद्बिभेषि।
शक्योऽस्य मन्युर्भवता अपि जेतुं
गाः कोटिशः स्वर्शयता वटोघ्नीः[10] ॥ १२३ ॥

इति सिंहस्याभिधातुमुचितमेव, राजोपहासपरत्वेनाभिधीयमानत्वात्।

(1) उज्ज्वलमतीवभ्राजिष्णु omitted in A. (2) त्रया० lost in A. (3) रहस्याभिधानम् A. (4) उचितवक्र A. (5) अप्येक lost in A. (6) रघु xiii, 59. (7) यत्नत् for च in A. (8) Omitted in A. (9) दग्धा B. (10) रघु ii, 49.

राज्ञः पुनरस्य[1] निजयशःपरिरक्षणपरत्वेन तृणवल्लघुतृणयः प्राणाः प्रतिभासन्ते। तस्यैतत्पूर्वपक्षोत्तरत्वेन

कथं च शक्यानुनयो महर्षि[2]-
र्विज्ञापनादन्यपयस्विनीनाम्।
इमां तनूजां सुरभेरवेहि
रुद्रौजसा तु प्रहृतं त्वयास्याम्[3] ॥ १२४ ॥

इत्यन्यासां गवां तत्प्रतिवस्तूपादानयोग्यता यदि कदाचिन्नसम्भवति ततस्तस्य मुनेर्मम चोभयोरप्येतज्जीवितपरिरक्षणनैरपेक्ष्य[4]मुपपन्नमिति तात्पर्यपर्यवसानादत्यन्तमनौचित्यमुन्नेयमुक्तिः। यथा च कुमारसम्भवे त्रैलोक्याक्रान्तिप्रवणपराक्रमस्य तारकाख्यस्य विपोर्जिगीषावसरे सुरपतिर्मन्मथेनाभिधीयते

कामिकपत्नीं व्रतदुःखशीलां
लोलं मनस्वातृतया प्रविष्टाम्।
नितम्बिनीमिच्छसि[5] मुक्तलज्जां
कण्ठे स्वयंग्राहनिषक्तबाहुम्[6] ॥ १२५ ॥

इत्यविनयानुष्ठाननिष्ठं विविष्टपाधिपत्यप्रतिष्ठितस्यापि तथाविधाभिप्रायानुवर्तनपरत्वेनाभिधीयमानमनौचित्यमावहति। एतच्चैतस्यैव कवेः सहजसौकुमार्यसुदित[7]सूक्तिपरिस्पन्दसौन्दर्यस्य पर्यालोच्यते, न पुनरन्येषामाचार्यमात्रकाव्यकरणकौशलश्लाघिनाम्। सौभाग्यमपि पदवाक्यप्रकरणप्रबन्धानां प्रत्येकमनेकाकारकमनीय[8]कारणकलापवलितरामणीयकानां किमपि सहृदयहृदयसंवेद्यं काव्यैकजीवितम-

(1) पुनर्यस्य B (2) शक्यानुनयो महर्षेः B. (3) रघु ii, 54. (4) परिरक्षणैरपेक्ष्यमित्य A. (5) विवम्बिनी॰ A. (6) कुमार iii, 7. (7) °मुद्रित A. (8) रमणीय for कमनीय in A.

लौकिकचमत्कारकारि संवलितयानेकरसास्वादसुन्दरं[1] सकलावयव-व्यापकत्वेन काव्यस्य गुणान्तरं परिस्फुरतोल्लसमतिप्रसङ्गेन।

इदानीमेतदुपसंहृत्यान्यदवतारयति—

मार्गाणां वितयं तदेतदसकृत्प्राप्तव्यपर्यंसुकैः
चुम्बं कैरपि यत्र कामपि भुवं प्राप्य प्रसिद्धिं गताः।
सर्वे स्वैरविहारहारि कवयो यास्यन्ति[2] येनाधुना
तस्मिन् कोऽपि स साधु सुन्दरपदन्यासक्रमः कथ्यते॥५८

मार्गाणां सुकुमारादीनामेतत्संवलितयं कैरपि महाकविभिरेव, न सामान्यैः[3], प्राप्तव्यपर्युत्सुकैः प्राप्योल्लाघिष्ठतैरसकृत् बहुवारमभ्यासेन चुम्बं परिगमितम्। यत्र यस्मिन् मार्गत्रये कामपि भुवं प्राप्य प्रसिद्धिं गताः[4] लोकोत्तरां भूमिमासाद्य प्रतीतिं प्राप्ताः। इदानीं सर्वे कवयस्तस्मिन्मार्गसंवलिते येन यास्यन्ति गमिष्यन्ति स्वैरविहारहारि स्वेच्छाविहरण-रमणीयं स[5] कोऽपि अलौकिकः साधु शोभनं कृत्वा सुन्दरपदन्यास-क्रमः कथ्यते सुभगसुललितसमर्पणपरिपाटीविन्यासो वर्ण्यते। मार्ग-स्वैरविहार-पद-प्रभृतयः शब्दाः श्लेषच्छायाविशिष्टत्वेन व्याख्येयाः।

इति श्रीराजानक[6]कुन्तकविरचिते[7]
वक्रोक्तिजीविते काव्यालङ्कारे
प्रथम उन्मेषः।

(1) A reads यानेकरसा० for संवलितयानेकरसा०. (2) यास्यन्ति A. (3) ०रेव न सा० lost in A. (4) This word is lost in A. (5) Lost in A. (6) Omitted in B. (7) ०कुन्तक० in A.

द्वितीयोन्मेषः ।

सर्वत्रैव सामान्यलक्षणे विहिते विशेषलक्षणं विधातव्यमिति काव्यस्य "शब्दार्थौ सहितौ" इत्यादि (१।७) सामान्यलक्षणं विधाय तदवयवभूतयोः शब्दार्थयोः साहित्यस्य प्रथमोन्मेष एव विशेषलक्षणं विहितम् । इदानीं प्रथमोद्दिष्टस्य वर्णविन्यासवक्रत्वस्य विशेषलक्षणमुपक्रमते—

एको द्वौ बहवो वर्णा बध्यमानाः पुनः पुनः ।
स्वल्पान्तरास्त्रिधा सोक्ता वर्णविन्यासवक्रता ॥१॥

वर्णशब्दोऽत्र व्यञ्जनपर्यायः, तथा प्रसिद्धत्वात् । तेन सा वर्णविन्यासवक्रता व्यञ्जनविन्यसनविच्छित्तिः त्रिधा त्रिभिः प्रकारैरुक्ता वर्णिता । के पुनस्ते त्रयः प्रकाराः, इत्युच्यते[1]—एकः केवल एव, कदाचिद् द्वौ बहवो वा वर्णाः पुनः पुनर्बध्यमाना योज्यमानाः । कीदृशाः—स्वल्पान्तराः । स्वल्पं स्तोकमन्तरं व्यवधानं येषां ते तथोक्ताः । त एव त्रयः प्रकारा इत्युच्यन्ते । अत्र वीप्सया[2] पुनः पुनरित्ययोगव्यवच्छेदपरत्वेन नित्यम्, भाव्ययोगव्यवच्छेदपरत्वेन । तस्मात्पुनः पुनर्बध्यमाना एव, न तु पुनः पुनरेव बध्यमाना इति । तत्रैकव्यञ्जननिबन्धोदाहरणं यथा

धम्मिल्लो विनिवेशितालकुसुमः सौन्दर्यधुर्यं स्मितं
विन्यासो वचसां विदग्धमधुरः कण्ठे कलः पञ्चमः ।
लीलामन्थरतारके च नयने यातं विलासालसं
कोऽप्येवं हरिणीदृशः शरशरापातावदातः क्रमः ॥ १ ॥

(1) उच्यते for इत्युच्यते in A, which omits the next two or three lines (from एकः to इत्युच्यते). (2) वीप्सायाः A.

एकस्य द्वयोर्बहूनां चोदाहरणं यथा

भग्नेलावल्लरीकास्खरलितकदलीस्तम्बताम्बूलजम्बू-
अम्बीराम्रालतालीसरलतरलतालासिका[1] यस्य जङ्घाः।
वेल्लत्कल्लोलहेला बिसकलनजडाः कूलकच्छेषु सिन्धोः
सेनासीमन्तिनीनामनवरतरताभ्यासतान्ति[2] समीराः ॥ २ ॥

एतामेव वक्रतां विच्छित्यन्तरेण विविनक्ति—

वर्गान्तयोगिनः स्पर्शा द्विरुक्तास्त-ल-नादयः।
शिष्टाश्च रादि[3]संयुक्ताः प्रस्तुतौचित्यशोभिनः ॥ ७ ॥

इयमपरा वर्णविन्यासवक्रता त्रिधा त्रिभिः प्रकारैरुल्लसति 'च'-शब्देनाभिसम्बध्यते। के पुनरस्यास्त्रयः प्रकारा इत्याह—वर्गान्तयोगिनः स्पर्शाः। स्पर्शाः[4] कादयो मकारपर्यन्ता वर्गास्तदन्तैः[5] ङकारादिभिर्योगः संयोगो येषां ते तथोक्ताः, पुनः पुनर्बध्यमानाः,—प्रथमः प्रकारः। त-ल-नादयः तकार-लकार-नकार-प्रभृतयो द्विरुक्ता द्विरुच्चारिता द्विगुणाः सन्तः, पुनः पुनर्बध्यमानाः,—द्वितीयः। तद्व्यतिरिक्ताः शिष्टाश्च व्यञ्जनसंज्ञा ये वर्णास्ते रेफप्रभृतिभिः[6] संयुक्ताः, पुनः पुनर्बध्यमानाः—तृतीयः। स्वल्पान्तराः परिमितव्यवहिता इति सर्वेषामभिसम्बन्धः[7]। ते च कीदृशाः—प्रस्तुतौचित्यशोभिनः। प्रस्तुतं वर्ण्यमानं वस्तु तस्य यदौचित्यमुचितभावस्तेन शोभन्ते ये ते तथोक्ताः। न पुनर्वर्णसावर्ण्यसनितामात्रेणोपनिबद्धाः प्रस्तुतौचित्यस्थानकारिणः[8]। प्रस्तुतौचित्यशोभित्वात् क्वचित्परुषरसप्रस्तावे[9] तादृशानेवाभ्यनुजानाति। अथ प्रथमप्रकारोदाहरणं यथा

(1) ०तरलतरलता० A ; ०लादला B. (2) तन्ती for तान्ति in A. (3) रेफा दिभिश्च संयुक्ताः A. (4) Omitted in B. (5) वर्गान्तैः only in A. (6) प्रभृतिभि lost in A. (7) ०भिसम्बन्धः B. (8) ०रिणः lost in A. (9) रस omitted in A.

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा
गुञ्जन्ति मञ्जु मधुपाः कमलाकरेषु ।
एतच्चकास्ति च रवेर्नवबन्धुजीव-
पुष्पच्छदा[1]भमुदयाचलचुम्बिबिम्बम्[2] ॥ २ ॥

यथा च

कदलीस्तम्बताम्बूलजम्बूजम्बीराः[3] इति ॥ ४ ॥

यथा वा

सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणाम्[4] इति ॥ ५ ॥

द्वितीयप्रकारोदाहरणं

प्रथममरुणच्छायः[5] ॥ ६ ॥

इत्यस्य द्वितीयचतुर्थौ पादौ। तृतीयप्रकारोदाहरणमस्यैव तृतीयः पादः। यथा वा

सौन्दर्यधुर्यं स्मितम्[6] ॥ ७ ॥

यथा च 'कल्लार'-शब्दसाहचर्येण 'ह्लाद'-शब्दप्रयोगः। परमरम[7]प्रस्तावे तथाविधसंयोगोदाहरणं यथा

उत्तम्भयत्तालवश्च[8] प्रतपति तरणावार्धवौ तापतन्द्री-
मद्रिद्रोणीकुटीरे कुहरिणि हरिणारातयो यापयन्ति[9] ॥ ८ ॥

एतमेव वैचित्र्यान्तरेण[10] व्याचष्टे—

क्वचिदव्यवधानेऽपि मनोहारिनिबन्धना ।
सा स्वराणामसारूप्यात् परां पुष्णाति वक्रताम् ॥ ३ ॥

(1) ॰च्छटा॰ A. (2) आर्द्धचरपद्धति no. 3736 (anon)=काव्यप्रकाश p. 192 (anon). (3) See above p. 80 (4) See above p 62, l. 19. (5) See above p. 30. (6) See above p. 79. (7) रस omitted in A. (8) ॰तालपत्रं A. (9) हरिणा रातयो यापयन्ति in A. कवीन्द्रवचन॰ no. 93 (anon), where the readings are corrupt. (10) एतस्मैव वैचित्र्यान्तरं A.

क्वचिदनियतप्रायवाक्यैकदेशे क्वचिंश्चिदव्यवधानेऽपि व्यवधानाभावे[1]ऽप्येकस्य द्वयोः समुदितयोश्च बह्वनां वा पुनः पुनर्बध्यमानानामेषां मनोहारिनिबन्धना हृदयावर्जकविन्यासा भवति। क्वचिदेव सम्पद्यत इत्यर्थः। यमकव्यवहारोऽत्र न प्रवर्तते[2], तस्य नियतस्थानतया व्यवधानात्। स्वरैरव्यवधानमत्र न विवक्षितम्, तस्यानुपपत्तेः तत्रैकस्याव्यवधानोदाहरणं यथा

वामं कज्जलवद्विलोचनसुरो रोहद्विसारिस्तनम्[3] ॥ ८ ॥

द्वयोर्यथा

ताम्बूलीनवमुग्धकमुकतरुतलस्रस्तरैः[4] सानुसामिः
पाथं पाथं कलाचीकृतकदलदलं नारिकेलीफलाम्भः।
सेव्यन्तां व्योमयात्राश्रमजलजयिनः सैन्यसीमन्तिनीभि-
र्दोलद्दोर्व्यूहकेलीकलितकुहकुहाशावकाक्ता वनान्ताः[5] ॥ १० ॥

यथा वा

अयि पिबत चकोराः क्षत्तसम्भाव्य कण्ठान्
क्रमुकवलनचञ्चच्चञ्चवश्चन्द्रिकाम्भः।
विरहविधुरितानां जीवितत्राणहेतो-
र्भवति हरिणलक्ष्मा येन तेजोदरिद्रः[6] ॥ ११ ॥

बह्वनां यथा

सरलतरलतालासिकाः[7] इति ॥ १२ ॥

'अपि'-शब्दात् क्वचिद् व्यवधानेऽपि। द्वयोर्यथा

स्वस्थाः सन्तु वसन्त ते रतिपतेरग्रेसरा वासराः ॥ १३ ॥

(1) क्वचिंश्चिदव्यवधानाभावे B. (2) वर्तते B. (3) See above p 31 (4) °नवलता°स्तरै A. (5) बालरामायण i, 63 (p. 28) = *quoted in* सुभाषितावलिः ii, 42. (6) बालरामायण v, 73 (p. 143) = विद्धशालभञ्जिका iii, 15 = अमरुशतक° no. 493. (7) See above p 80. The same reading here as there.

बहूनां व्यवधानेऽपि यथा

चकितचातकमेचकितवियति वर्षाव्यये ॥ १४ ॥

सा स्वराणामसारूप्यात् सेयमनन्तरोक्ता स्वरानाम्नकारादीनामसारूप्यादसादृश्यात् क्वचित्किञ्चिदावर्तमानसमुदायैकदेशे परामर्त्यां वक्रतां कामपि पुष्णाति पुष्यतीत्यर्थः[1]। यथा

राजीवजीवितेश्वरे ॥ १५ ॥

यथा वा

धूमरसरिति इति ॥ १६ ॥

यथा च[2]

खस्था सन्तु वसन्त इति[3] ॥ १७ ॥

यथा वा

तालतालो इति[4] ॥ १८ ॥

सोऽयमुभयप्रकारोऽपि वर्णविन्यासवक्रताविशिष्टवाक्यविन्यासो[5] यमकाभासः सन्निवेशविशेषो[6] मुक्ताकलापमध्यप्रोतमणिमयपदकबन्धवत्सुतरां सहृदयहृदयहारितां प्रतिपद्यते। तदिदमुक्तम्—

अलङ्कारस्य कवयो यचालङ्करणान्तरम्।
असन्तुष्टा निबध्नन्ति हारादेर्मणिबन्धवत्[7] ॥ १९ ॥ इति।

एतामेव विविधप्रकारां[8] वक्रतां विशिनष्टि, यदेवंविधवक्ष्यमाणविशेषणविशिष्टा[9] विधातव्येति—

नातिनिर्बन्धविहिता नाप्यपेशलभूषिता।
पूर्वावृत्तपरित्यागनूतनावर्तनोज्ज्वला ॥ ४ ॥

(1) पुष्णाति only in B. (2) इति यथा च lost in A. (3) See above p. 82 (4) See above p. 80 (5) ०विन्यासो A. (6) A marks a lacuna here. (7) This is कारिका i, 35. (8) एतामेवंविधप्रकारां A. (9) ०वर्ण्यमानविशेष A.

नातिनिर्बन्धविहिता[1]—'निर्बन्ध'-शब्दोऽत्र व्यसनितायां वर्तते। तेनातिनिर्बन्धेन पुनः पुनरावर्तनव्यसनितया न विहिता, अप्रयत्नविरचितेत्यर्थः। व्यसनितया प्रयत्नविरचने हि प्रस्तुतौचित्यपरिहाणिर्वाच्यवाचकयोः[2] परस्परस्पर्धित्वलक्षणसाहित्यविरहः पर्यवस्यति। यथा

भण तरुणि[3] इति ॥ २० ॥

नाप्यपेशलभूषिता न चाप्यपेशलैरसुकुमारैरचरैरलङ्कृता। यथा

शीर्णप्राणाङ्घ्रि[4] इति ॥ २१ ॥

तदेवं कीदृशी तर्हि कर्तव्येत्याह—पूर्वाहृतपरित्यागनूतनावर्तनोज्ज्वला। पूर्वमाहृतानां पुनः पुनर्विरचितानां परित्यागेन प्रहाणेन नूतनानामभिनवानां वर्णानामावर्तनेन पुनः पुनः परिग्रहेण च तदेवमुभाभ्यां प्रकाराभ्यामुज्ज्वला भ्राजिष्णुः। यथा

एतां पश्य पुरस्तटोमिह किल क्रीडाविरामे हरः
कोदण्डेन किरीटिना सरभसं चूडान्तरे ताडितः।
इत्याकर्ण्य कथाद्भुतं हिमनिधावद्रौ सुभद्रापतेर्-
मन्दं मन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डनम्[5] ॥ २२ ॥

यथा वा

हंसानां निनदेषु[6] इति ॥ २३ ॥

(1) Omitted in A. (2) परिग्रहाणि in A. (3) See above p. 7. (4) मयूरशतक श्लो० 6 = काव्यप्रकाश p. 418 = Hemacandra p. 170. B reads प्रा for प्राण; A has only शीर्णप्राण इति. The entire verse runs thus:

शीर्णप्राणाङ्घ्रिपाणीम् व्रणिनिरपघनैर्बन्धरान्ध्रक्षतौघान्
दीर्घाघातानधीशैः पुनरपि घटयन्येक उल्लाघयन् यः।
घर्मांशोरस्य बोऽस्तद्रिगुरुघनदृषत्खण्डनिर्विण्णदर्भे-
र्दत्तार्घाः सिद्धसङ्घैर्विदधतु वृषयः शीघ्रसंक्षोभितस्य ॥

(5) Quoted anonymously in अभिनवभारती, ch. xvi = दशरूपकावलोक p. 41 = सरस्वतीकण्ठा० p. 300 = Hemacandra p. 297. (6) See above p. 44.

यथा च

एतन्मन्दविपक्व[1] इत्यादौ ॥ २४ ॥

यथा वा

णमह दसाणणसरहसकरतुलिअबलक्खसेलभअविहलं[2] ।
वेवंतथोरथणहरहरकअकंठग्गहं गोरिं ॥ २५ ॥

एवमेतां वर्णविन्यासवक्रतां व्याख्याय तामेवोपसंहरति—

वर्णच्छायानुसारेण गुणमार्गानुवर्तिनी ।
वृत्तिवैचित्र्ययुक्तेति सैव प्रोक्ता चिरन्तनैः ॥ ५ ॥

वर्णानामक्षराणां या छाया कान्तिः अव्यक्तादिगुणसंपत्तये हेतुभूतया यदनुसरणमनुसारः प्राप्यस्वरूपानुप्रवेशस्तेन । गुणान् माधुर्यादीन् मार्गांश्च सुकुमारप्रभृतीननुवर्तते या सा तथोक्ता । तत्र गुणानामान्तरतम्यात् प्रथममुपन्यसनम्, गुणद्वारेणैव मार्गानुसरणोपपत्तेः । तदयमत्रार्थः—यद्येषा वर्णविन्यासवक्रता व्यञ्जनच्छायानुसारेणैव, तथापि[3] प्रतिनियतगुणविशिष्टानां मार्गाणामनुवर्तनद्वारेण[4] यथा स्वरूपानुप्रवेशं विदधाति तथा विधातव्येति । तत एव च तस्यास्तन्निबन्धनाः प्रवितताः[5] प्रकाराः समुल्लसन्ति । चिरन्तनैः पुनः सैव स्वातन्त्र्येण वृत्तिवैचित्र्ययुक्तेति प्रोक्ता । वृत्तीनामुपनागरिकादीनां यद् वैचित्र्यं विचित्रभावः स्वनिष्ठसंख्याभेदभिन्नत्वं तेन युक्ता समन्वितेति चिरन्तनैः पूर्वसूरिभिरभिहिता । तदिदमत्र तात्पर्यम्—यदस्याः सकलगुणस्वरूपानुसरणसमन्वयेन सुकुमारादिमार्गानुवर्तनायत्तवृत्तेः

(1) See above p. 68 (2) चलक for बलक्ख in A. The छाया of the verse would be

नमत दशाननसरभसकरतुलितबलक्ष्मेलभयविह्वलाम् ।
वेपमानस्थूलस्तनभरहरकृतकण्ठग्रहां गौरीम् ॥

(3) Omitted in B. (4) ॰मनुसरणद्वारेण A. (5) Omitted in A

पारतन्त्र्यमपरिगणितप्रकारत्वं चैतदुभयमप्यवश्यम्भावि। तस्मात्पारतन्त्र्यं परिमितप्रकारत्वं चेति[1] नातिचतुरस्रम्। ननु च प्रथममेकोद्दाविलादिना प्रकारेण[2] परिमितान् प्रकारान् स्वतन्त्रत्वं[3] च स्वयमेव व्याख्याय किमेतदुक्तमिति चेदेष दोषः, यस्मादक्षणकारैरेवस्य कस्यचित्पदार्थस्य[4] समुदायपरायत्तवृत्तेः परव्युत्पत्तये प्रथममपोद्धारबुद्ध्या स्वतन्त्रतया स्वरूपमुक्तिष्यते, ततः समुदायान्तर्भावो[5] भविष्यतीत्यलमतिप्रसङ्गेन।

येयं वर्णविन्यासवक्रता नाम[6] वाचकालङ्कृतिः स्थाननियमाभावात् सकलवाक्यस्य विषयत्वेन समाम्नाता, सैव प्रकारान्तरविशिष्टा नियतस्थानतयोपनिबध्यमाना किमपि वैचित्र्यान्तरमावहतीत्याह—

समानवर्णमन्यार्थं प्रसादि श्रुतिपेशलम्।
औचित्ययुक्तमाद्यादिनियतस्थानशोभि यत् ॥ ६ ॥
यमकं नाम सोऽप्यस्याः प्रकारः परिदृश्यते।
स तु शोभान्तराभावादिह नाति प्रतन्यते ॥ ७ ॥

कोऽप्यस्याः प्रकारः परिदृश्यते, अस्याः पूर्वोक्तायाः कोऽप्यपूर्वः प्रभेदो विभाव्यते। कोऽसावित्याह—यमकं नाम। यमकमिति यस्य प्रसिद्धिः। तच्च कीदृशम्—समानवर्णम्। समानाः सरूपाः सदृशश्रुतयो वर्णा यस्मिन् तत्तथोक्तम्। एवमेकस्य द्वयोर्बहूनां सदृशश्रुतीनां व्यवहितमव्यवहितं वा यदुपनिबन्धनं तदेव यमकमित्युच्यते। तदेवमेकरूपे संस्थानद्वये सत्यपि— अन्यार्थं भिन्नाभिधेयम्। अन्यच्च

(1) A omits all words from चैतदुभय॰ to चेति. (2) प्रकरणेन A. (3) स्वतन्त्रं A. (4) पदार्थस्य for पदार्थस्य in A (5) A reads तत्त्व॰ after which some letters (i. e. समुदा॰ possibly) are lost. After this, A reads अन्तर्भावो. (6) Omitted in A.

कीदृशम्—प्रसादि प्रसादगुणयुक्तं भवतीति वाक्यसमर्पकम्[1] अकष्टश्लेनाबोध्यमिति यावत्। श्रुतिपेशलमित्येतदेव विशिष्यते। श्रुतिः श्रवणेन्द्रियं तत्र पेशलं रम्यकम्, अकठोरशब्दविरचितम्। कीदृशम्[2]—औचित्ययुक्तम्। औचित्यं वस्तुनः स्वभावोत्कर्षकेण युक्तं समन्वितम्। यत्र यमकोपनिबन्धनव्यतिरेक्तेनाप्यौचित्यमयपरिस्पन्दमित्यर्थः। तदेव विशेषणान्तरेण विशिनष्टि—आदादिनियतस्थानशोभि यत्। आदिरादिर्येषां ते तथोक्ताः प्रथममध्यान्तास्तान्येव नियतानि स्थानानि विशिष्टाः सन्निवेशास्तैः शोभते भ्राजते यत्तथोक्तम्। अत्राद्यादयः[3] सम्बन्धिशब्दाः यदादिभिर्विशेषणीयाः। स तु प्रकारः प्रोक्तलक्षणसम्पदुपेतोऽपि भवन् दृष्ट नाति प्रतन्यते अत्रेऽस्मिन्नाति विस्तार्यते। कुतः—शोभान्तराभावात्। स्थाननियमव्यतिरिक्तस्यान्यस्य शोभान्तरस्य छायान्तरस्यासम्भवादित्यर्थः। अस्य च वर्णविन्यासवैचित्र्यव्यतिरेकेणान्यल्किञ्चिदपि जीवितान्तरं न परिदृश्यते[4]। तेनानन्तरोक्तालङ्कृतिप्रकारतैव युक्ता। उदाहरणान्यत्र शिशुपालवधे चतुर्थे सर्गे समर्पकाणि कानिचिदेव[5] यमकानि, रघुवंशे वा वसन्तवर्णने।

एवं यदाश्रयाणां वर्णानां विन्यासवक्रभावे विचारिते वर्णसमुदायात्मकस्य पदस्य च वक्रभावविचारः[6] प्राप्तावसरः। तत्र पदपूर्वार्धस्य तावद्वक्रताप्रकाराः कियन्तः सम्भवन्तीति प्रक्रमते—

यत्र रूढेरसम्भाव्यधर्माध्यारोपगर्भता।
सधर्मातिशयारोपगर्भत्वं वा प्रतीयते ॥ ८ ॥
लोकोत्तरतिरस्कारश्लाघ्योत्कर्षाभिधित्सया।
वाच्यस्य सोच्यते काऽपि रूढिवैचित्र्यवक्रता ॥ ९ ॥

(1) A omits वाक्य. (2) Omitted in A. (3) चाद्यादयः A. (4) दृश्यते A (5) कानिचिदेव B. (6) वक्रभाव omitted in B.

यत्र रूढेरसम्भाव्यधर्माध्यारोपगर्भता प्रतीयते। शब्दस्य नियतवृत्तिता नाम धर्मो रूढिरुच्यते[2], रोढ्यं रूढिरिति कृत्वा। सा च द्विप्रकारा सम्भवति—नियतसामान्यवृत्तिता नियतविशेषवृत्तिता। तेन रूढि शब्देनात्र रूढिप्रधानः शब्दोऽभिधीयते[3], धर्मधर्मिणोरभेदोपचारदर्शनात्। यत्र यस्मिन् विषये[3] रूढिशब्दस्य असम्भाव्यः सम्भावयितुमशक्यो यो धर्मः कश्चित्परिस्पन्दस्तस्याध्यारोपः समर्पणं गर्भोऽभिप्रायो यस्य स तथोक्तस्तस्य भावस्तत्ता सा प्रतीयते प्रतिपद्यते। यत्रेति सम्बन्धः। सद्धर्मातिशयारोपगर्भत्वं वा। संभावनीयो धर्मश्च सद्धर्मः विद्यमानः पदार्थस्य परिस्पन्दस्तस्मिन् यस्य कस्यचिदपूर्वस्यातिशयस्याद्भुतरूपस्य महिम्न आरोपः समर्पणं गर्भोऽभिप्रायो[4] यस्य स तथोक्तस्तस्य भावस्तत्त्वम्। तत्त्व सा यस्मिन् प्रतीयते। केन हेतुना—लोकोत्तरतिरस्कारश्लाघ्योत्कर्षाभिधित्सया। लोकोत्तरः सर्वातिशायी यस्तिरस्कारः खलीकरणं श्लाघ्यश्च स्पृहणीयो य उत्कर्षः सातिशयत्वं तयोरभिधित्सा अभिधातुमिच्छा वक्तुकामता तया। कस्य—वाच्यस्य। रूढिशब्दस्य वाचो योऽभिधेयोऽर्थस्तस्य। सोच्यते कथ्यते काव्यलौकिको रूढिवैचित्र्यवक्रता। रूढिशब्दस्यैवंविधेन वैचित्र्येण विचित्रभावेन वक्रता वक्रभावः। तदिदमत्र तात्पर्यम्—यत्सामान्यमात्रमभ्युपगन्तारः शब्दानामनुमानवत्रियतविशेषालिङ्गने यद्यपि स्वभावादेव न किञ्चिदपि सम्भवति, तथाप्यनया युक्त्या कविविवक्षितनियतविशेषनिष्ठतां नीयमानाः[5] कामपि चमत्कारकारितां प्रतिपद्यन्ते[6]। यथा

ताला जाअंति गुणा जाला ते सहिअएहि घेप्पंति।
रूअकिरणाणुग्गहिआइ होंति कमलाइ कमलाइ[7] ॥ २६ ॥

(1) रूढिश्च lost in A. (2) अभिधीयते lost in A. (3) विषयीभूते A. (4) अभिप्रायो omitted in A. (5) ०विशेषनिष्ठितीयमानां A (6) प्रतिपद्यते A. (7) Quoted in ध्वन्यालोक (p. 62) from भातवाहन's own lost Prakrit

प्रतीयत इति क्रियापद[1]वैचित्र्यस्यायमभिप्रायो यदेवंविधे विषये शब्दानां वाचकत्वेन न व्यापारः, अपि तु वस्त्वन्तरवस्तूतिकारित्व-मात्रेणेति युक्तियुक्तमत्रैतदिह नाति प्रतन्यते। यस्माद्[2] ध्वनिकारेण व्यङ्ग्यव्यञ्जकभावोऽत्र सुतरां समर्थितस्तत् किं पौनरुक्त्येन।

सा च रूढिवैचित्र्यवक्रता[3] मुख्यतया द्विप्रकारा सम्भवति—यत्र रूढिवाचोऽर्थः स्वयमेव आत्मन्युत्कर्षे निकर्षे वा समारोपयितुकामः कविनोपनिबध्यते, तस्यान्यो वा कश्चिदुक्तेति। यथा

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः[4]।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे[5]
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव[6]॥ २७॥

अत्र 'राम'-शब्देन 'दृढं कठोरहृदयः' 'सर्वं सहे[7]' इति यदुभाभ्यां प्रतिपादयितुं न पार्यते, तदेवंविधविविधोद्दीपनविभावविभवसङ्गनसामर्थ्यकारणं दुस्सहजनकसुताविरहव्यथाविष्टुलेऽपि समये निरुपचरप्राणपरिरक्षावैचक्षण्यलक्षणं संज्ञापदनिबन्धनं[8] किमप्यसाधारण्यमसाधारणं क्रौर्यं प्रतीयते। वैदेहीत्यनेन जलधरसमयसुन्दरपदार्थ-

poem विषमबाणलीला = काव्यप्रकाश p. 430 (anon) = Ruyyaka p. 83 (anon). The कथा would be

तदा आयत्तं गुणा यदा ते सहृदयैरेते श्रुत्वे।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि॥

(1) पद omitted in A. (2) यदा A. (3) रूढिशब्दस्य वक्रता A. (4) ०केकाकलाः B. (5) सर्वंसहा B. (6) महानाटक v, 7 = ध्वन्यालोक p. 61 (anon) = अभिनवभारतीविवरण on उद्भट p. 86 (anon) = काव्यप्रकाश p. 188 (anon) = मुकुलभट्ट p. 11 (anon). (7) सर्वंसहा B. (8) ०रत्वावैलक्ष्ण्य० A; लक्षणसंविज्ञानपद० B.

सन्दर्शनासहत्वसमर्थत्व[1] सहजसौकुमार्यसुलभं किमपि कान्तत्व तस्याः समर्थयते। तदेव च पूर्वस्मादिशेषाभिधायिनः 'तु'-शब्दस्य जीवितम्।

विद्यमानधर्मातिशयवाच्याध्यारोपगर्भत्वं यथा

ततः प्रहस्याह पुनः पुरन्दरं
व्यपेतभीर्भूमिपुरन्दरात्मजः[2]।
वृणीष शक्रं[3] यदि सर्म[4] एष ते
न खल्वनिर्जित्य रघुं गतो भवान्[5] ॥ २८ ॥

'रघु'-शब्देनात्र सर्वत्राप्रतिहतप्रभावस्यापि[6] सुरपतेस्तथाविधाध्यवसाय-व्याघातसामर्थ्यनिबन्धनः कोऽपि स्वपौरुषातिशयः[7] प्रतीयते। प्रहस्येत्यनेनैतदेवोपबृंहितम्।

अन्यो वक्ता यत्र तत्रोदाहरणं यथा

आज्ञा शक्रशिखामणिप्रणयिनी यास्यन्ति चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लक्ष्मेति दिव्या पुरी।
सम्भूतिर्दुहिणान्वये च तदहो नेष्टेश्वरो लभ्यते
स्वाच्छेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः[8] ॥ २९ ॥

'रावण'-शब्देनात्र सकललोकप्रसिद्धदशाननदुर्विलासव्यतिरिक्तमभि[9]-जनविवेकसदाचारप्रभावसम्भोगसुखसम्पदिलक्षणायाः[10] समस्तवरगुण-

(1) समर्थकं B (2) This is the reading of the Mss क and ग in Nandargikar's edition of रघु०. (3) lost in A. (4) गर्व B. (5) रघु० iii, 51. (6) प्रताप for प्रभाव in B. (7) स्वपौरुषातिशय: A. (8) बाल रामायण i, 36 (p. 17) – काव्यप्रकाश p 400. (9) प्रसिद्धदुर्विलासदशाननव्यक्त-मभि० A. (10) A reads सुभाव for प्रभाव and adds सम्पत्ति after सुयोग and before सुखसम्पदि०.

सामग्रीसम्पदस्तिरस्कारकारणं किमप्यनुपादेयतानिमित्तभूतमौपहत्यं प्रतीयते।

अत्रैव विद्यमानगुणातिशयाध्यारोपगर्भत्वं यथा—

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्[1] ॥ २० ॥

अत्र 'राम'-शब्देन सकलत्रिभुवनातिशायी रावणानुचरविभ्रमास्पदं शौर्यातिशयः प्रतीयते[2]।

एषा च रूढिवैचित्र्यवक्रता प्रतीयमानधर्मबाहुल्याद् बहुप्रकारा भिद्यते। तच्च[3] स्वयमेवोल्लेक्ष्यतीयम्। यथा

गुर्वर्थसर्वी श्रुतपारदृश्वा
रघोः सकाशादनवाप्य कामम्[4]।
गतो वदान्यान्तरमित्ययं मे
मा भूत्परीवादनवावतारः[5] ॥ २१ ॥

'रघु'-शब्देनात्र त्रिभुवनातिशय्यौदार्यातिरेकः[6] प्रतीयते। एतस्यां वक्रतायामयमेव परमार्थो यत् सामान्यमात्रनिष्ठतामपाकृत्य कविविवक्षितविशेषप्रतिपादनसामर्थ्यलक्षणः शोभातिशयः समुल्लास्यते। संज्ञाशब्दानां नियतार्थनिष्ठत्वात् सामान्यविशेषभावो न कथिद् सम्भवतीति न वक्तव्यम्। यस्मात्तेषामप्यवस्थासङ्कलसाधारणवृत्तेर्वाच्यस्य नियतदशाविशेषवृत्तिनिष्ठता सत्कविविवक्षिता सम्भवत्येव, स्वरभुक्तिन्यायेन लग्नांशुकन्यायेन चेति।

एवं रूढिवक्रतां विवेच्य क्रमप्राप्तसमन्वयां पर्यायवक्रतां विविनक्ति—

अभिधेयान्तरतमस्त्वातिशयपोषकः।
रम्यच्छायान्तरस्पर्शात्तदलङ्कर्तुमीश्वरः ॥ १० ॥

(1) See above p. 31. (2) A reads ॰त्रिभुवनातिशायि, शौर्यादयः and प्रतीयते. (3) ते तु B. (4) ॰दनवाप्यकामः B. (5) रघु॰ v, 24. (6) ॰तिशयः for ॰तिरेकः in A.

स्वयं विशेषणेनापि स्वच्छायोत्कर्षपेशलः ।
असम्भाव्यार्थपावत्वगर्भं यश्चाभिधीयते[1] ॥ ११ ॥
अलङ्कारोपसंस्कारमनोहारिनिबन्धनः[1] ।
पर्यायस्तेन वैचित्र्यं परा पर्यायवक्रता ॥ १२ ॥

पूर्वोक्तविशेषणविशिष्टः काव्यविषये पर्यायस्तेन हेतुना[2] यद्वैचित्र्यं विचित्रभावो विच्छित्तिविशेषः सा परा प्रकृष्टा काचिदेव पर्यायवक्रतेत्युच्यते। पर्यायप्रधानः शब्दः पर्यायोऽभिधीयते। तस्य चैतदेव पर्यायप्राधान्यं यत् स कदाचिद्विवक्षिते[3] वस्तुनि वाचकतया प्रवर्तते, कदाचिदावाचकान्तरमिति। तेन पूर्वोक्तमुक्त्वा बहुप्रकारः पर्यायोऽभिहितः[4], तत् किमियत्तोऽस्य[5] प्रकाराः[6] सन्तीत्याह—अभिधेयान्तरतमः। अभिधेयं वाच्यं वस्तु तस्यान्तरतमः प्रत्यासन्नतमः[7]। यस्मात् पर्यायशब्दत्वे सत्यप्यन्तरङ्गत्वात् स यथा विवक्षितं वस्तु व्यनक्ति[8] तथा नान्यः कश्चिदिति। यथा

नाभियोक्तुमनृतं त्वमिच्छसे
कस्तयस्विविशिखेषु चादरः।
सन्ति भूमृति हि नः शराः परे
ये पराक्रमवसूनि वज्रिणः[9] ॥ २२ ॥

अत्र महेन्द्रवाचकेष्वसंख्येषु[10] सम्भवत्सु पर्यायशब्देषु 'वज्रिणः' इति प्रयुक्तः पर्यायवक्रतां पुष्णाति। यस्मात् सततसन्निहितवज्रस्यापि[11]

(1) A omits these two lines of the कारिका here. (2) A reads: एवंविध पर्यायस्तेन वैचित्र्यं परा पर्यायवक्रता (apparently repeating partly the last line of the कारिका 12) पूर्वोक्तविशेषणविशिष्टा कापि। तेन पर्यायविषयहेतुना (3) चिद्वि lost in A. (4) पर्यायो विहितः A. (5) कियत्तस्य A (6) Lost in A (7) प्रसन्नतमः A. (8) ०सं वस्तु व्यन० lost in A. (9) किरात० xvii, 58. (10) इन्द्रवाचकेष० A. (11) वस्तु is omitted in B.

सुरपतेर्यं पराक्रमवमूनि विक्रमधनानीति सायकानां लोकोत्तरत्व-
मुक्तम्। 'तपस्वि'-शब्दोऽप्यतितरां रमणीयः। यस्मात् सुभटसायकाना-
मादरो[1] बहुमानः कदाचिदुपपद्यते, तापसमार्गणेषु पुनरकिञ्चित्करेषु
क्व संरम्भ इति। यथा वा

कस्त्वं त्रास्यसि मां स्मर[2] स्मरसि मां दिष्ट्या किमभ्यागत-
स्त्वामुन्मादयितुं कथं ननु बलात् किं ते बलं पश्य तत्[3]।
पश्यामीत्यभिधाय पावकमुचा यो लोचनेनैव तं
कामं भस्मकदम्बकावशमदक्षत्तस्मै नमः शूलिने ॥ २३ ॥

अत्र परमेश्वरे पर्यायसहस्रेष्वपि सम्भवत्सु 'शूलिनः' इति यदायुक्तं तदाय-
मभिप्रायो यत्तस्मै भगवते नमस्कारव्यतिरेकेण किमन्यदभिधीयते[4]।
यत्तथाविधोल्लेखपरित्यक्तविनयहृत्तेः स्मरस्य कुपितेनापि तदभिमतावे-
क्षणव्यतिरेकेण[5] तेन[6] सततसन्निहितशूलेनापि कोपसमुचितमायुध-
ग्रहणं नाचरितम्। लोचनपातमात्रेणैव कोपकार्यकरणाद्भगवतः प्रभावा-
तिशयः परिपोषितः। अतएव तस्मै नमोऽस्त्विति युक्तियुक्ततां प्रति-
पद्यते।

अयमपरः पदपूर्वार्धवक्रताहेतुः पर्यायः—यस्तस्यातिशयपोषकः[7]
तस्याभिधेयस्यार्थस्यातिशयमुत्कर्षं पुष्णाति यः स तथोक्तः। यस्मात्सहज-
सौकुमार्यसुभगोऽपि पदार्थस्तेन परिपोषितातिशयः सुतरां सहृदय-
हृदयहारितां प्रतिपद्यते। यथा

सम्बन्धी रघुभूभुजां मनसिजव्यापारदीक्षागुरु-
र्गौरश्लीवदनोपमापरिचितस्तारावधूवल्लभः।
सद्यौमार्जितदाक्षिणात्यतरुणीदन्तावदातद्युति-
सन्दृष्टः सुन्दरि दृश्यतामयमितश्चण्डीशचूडामणिः[8] ॥ २४ ॥

(1) भट for सुभट in A. (2) स्मर A (3) यत् B (4) °भिधीयताम् B
(5) °व्यतिरेकेण A. (6) Omitted in B. (7) B omits यः. (8) बालरामायण
X, 41 (p. 293) = औचित्यविचार, श्लो० 12.

अत्र पर्यायाः सहजसौन्दर्यसम्पदुपेतत्वापि चन्द्रमसः सहृदयहृदयाह्लादकारणं कमप्यतिशयमुत्पादयन्तः पदपूर्वार्धवक्रतां पुष्णन्ति। तथा च, रामेण रावणं निहत्य पुष्पकेन गच्छता सीतायाः सविस्मयं खेदकथासेतदभिधीयते यच्चन्द्रः सुन्दरि दृश्यतामिति, रामणीयकमनोहारिणि सकललोकलोचनोत्सवचन्द्रमा विचार्यतामिति। यस्मात्तथाविधानामेव तादृशः समुचितो विचारगोचरः[1]। सम्बन्धो रघुभूभुजामित्यनेन चास्माकं नापूर्वो बन्धुरयमित्यवलोकनेन सम्मान्यतामिति प्रकारान्तरेणापि तद्विषयो बहुमानः प्रतीयते। शिष्टाश्च[2] तदतिशयाधानप्रवणत्वमेवाक्षरः प्रथयन्ति। तत एव च प्रस्तुतमर्थं प्रति प्रत्येकं पृथक्तेनोत्कर्षप्रकटनात्पर्यायाणां बहुनामप्यपौनरुक्त्यम्[3]। तृतीये पादे विशेषणवक्रता विद्यते, न पर्यायवक्रत्वम्।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रतानिबन्धनः—यस्तदलङ्कर्तुमीश्वरः। तदभिधेयलक्षणं[4] वस्तु विभूषयितुं यः प्रभवतीत्यर्थः। कस्मात—रम्यच्छायान्तरस्पर्शात्। रम्यं रमणीयं यच्छायान्तरं विच्छित्त्यन्तरं श्लिष्टत्वादि[5] तस्य स्पर्शात्, शोभान्तरप्रतीतेरित्यर्थः। कथम्—स्वयं विशेषणेनापि। स्वयमात्मनैव, स्वविशेषणभूतेन पदान्तरेण वा। तत्र स्वयं यथा

दृश्यं जडे जगति को नु हृदङ्गमाग-
कर्णः करी ननु भवेद्[6] ध्वनितस्य यावत्।
इत्यागतं[7] झटिति योऽलिनमुन्ममाथ
मातङ्ग एव किमतः परमुच्यतेऽसौ[8] ॥ २५ ॥

(1) ०चरः lost in A. (2) lost in A. (3) अपि lost in A. (4) तत् omitted in A. (5) श्लेषश्लिष्टत्वादि A. (6) भाव B. (7) इत्याह तं A. (8) सुभाषितावली no. 628 (महाकवीन्द्रस्य). See above p. 35.

अत्र 'मातङ्ग' शब्दः प्रस्तुते वारणमात्रे प्रवर्तते। शिष्टया लक्ष्या च वक्रालक्षणस्याप्रस्तुतस्य वस्तुनः प्रतीतिमुत्पादयन् रूपकालङ्कारच्छायासंस्पर्शाद् गौर्वाहीक इत्यनेन न्यायेन सादृश्यनिबन्धनस्योपचारस्य सम्भवात् प्रस्तुतस्य वस्तुनस्तत्त्वमध्यारोपयन् पर्यायवक्रतां पुष्णाति। यस्मादेवंविधे विषये प्रस्तुतस्याप्रस्तुतेन सम्बन्धोपनिबन्धो रूपकालङ्कार[2]द्वारेण कदाचिदुपमामुखेन वा। यथा—स एवार्थं स इवार्थमिति[3] वा। एष एव च[4] शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यस्य पदध्वनेर्विषयः, बहुषु चैवंविधेषु सत्सु वाक्यध्वनेर्वा। यथा

कुसुमसमययुगमुपसंहरदुत्फुल्लमल्लिकाधवलाट्टहासो[5] व्यजृम्भत योगाभिधानो महाकालः[6] ॥ २६ ॥

यथा

इक्ष्वाकोऽस्मिन् महाप्रलये धरणीवारणायाधुना त्वं शेषः[7] इति ॥ २७ ॥

अत्र युगादयः शब्दाः प्रस्तुताभिधानपरत्वेन प्रयुज्यमानाः सन्तोऽप्रस्तुतवस्तुप्रतीतिकारितया कामपि काव्यच्छायां समुन्मीलयन्तः प्रतीयमानालङ्कारव्यपदेशभाजनं भवन्ति[8]। विशेषणेन यथा

सस्निग्धमुग्धधवलोक्षदर्थं[9] विदग्ध-
मालोक्य यन्मधुरमद्य[10] विलासदिग्धम्[11]।
भस्मोचकार मदनं ननु काष्ठमेव
तन्नूनमीश इति वेत्ति[12] पुरस्त्रिलोकः ॥ २८ ॥

अत्र काष्ठमिति विशेषणपदे[13] वर्ण्यमानपदार्थापेक्षया[14] सम्बन्धस्य

(1) चाश्रान A. (2) A repeats here च्छायासंस्पर्शाद् गौर्वाहीक इत्यनेन न्यायेन सादृश्यनिबन्धनस्योपचारस्य सम्भव॰ from above. (3) स इवार्थमिति B. (4) एव च omitted in A. (5) धवल omitted in A. (6) हर्षचरित ii (p 72) = ध्वन्यलोक p 99 (anon). (7) हर्षचरित ii, loc. cit. = ध्वन्यलोक p. 127. (8) ॰व्यपदेशिता कथ्यन्ति B (9) ॰दुग्ध॰ B. (10) सुग्ध for ॰मद्य in B. (11) ॰दिग्धः B (12) lost in A. (13) ॰पदं A (14) ॰क्षेपया B.

सौरसतां प्रतिपादयद्[1] रम्यच्छायान्तरस्पर्शिशेषच्छायामनोज्ञविन्यास परमस्मिन्[2] वस्तुन्यप्रस्तुते मदनाभिधानपदपलक्षणे प्रतीतिमुत्पादयद्[3] रूपकालङ्कारच्छायासंस्पर्शात् कामपि पर्यायवक्रतामुन्मीलयति।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रतायाः कारणम्—यः स्वच्छायोत्कर्षपेशलः। स्वयात्मनश्छाया कान्तिर्या सुकुमारता तदुत्कर्षेण तदतिशयेन यः पेशलो हृदयहारी। तदिदमत्र तात्पर्यम्—यद्यपि वर्ण्यमानस्य वस्तुनः प्रकारान्तरोल्लासकत्वेन[4] व्यवस्थितिस्तथापि परिस्पन्दसौन्दर्यसम्पदेव सहृदयहृदयहारितां प्रतिपद्यते। यथा

इत्यभ्युत्कयति ताण्डवलोला-
पण्डिताखिलहरीगुरुपादैः[5]।
डम्भितं विषमकाण्डकुटुम्ब-
स्यांशुभिः शरवतीविरहो[6] माम् ॥ ३८ ॥

अत्रेन्दुपर्यायो 'विषमकाण्डकुटुम्ब'-शब्दः कविनोपनिबद्धः। यस्मान्मृगाङ्कोदयहेषिणा[7] विरहविधुरहृदयेन केनचिदेतदुच्यते। यदयमप्रसिद्धोऽप्यपरिम्लानसमन्वतया प्रसिद्धतमतामुपनीतस्तेन प्रथमतरोल्लिखितत्वेन च[8] चेतनचमत्कारकारितामवगाहते। एष च स्वच्छायोत्कर्षपेशलः सहजसौकुमार्यसुभगत्वेन नूतनोल्लेखविलक्षणत्वेन च

(1) प्रतिपादयन् A. (2) ०स्पर्शं A and ०विन्यासमपरस्मिन् B (3) ०मुत्पादयन् A. (4) B has redundant न here. (5) ०पादैः A, गुरु lost in A. In the first line, ०मुत्कयति for मुत्कयति in B. (6) विरहे B. (7) There is no मृगाङ्को० in A, which reads पूर्ण with a lacuna (apparently पूर्णचन्द्रो०). (8) च is omitted in A, which has a lacuna here, followed by समानचेतन० (apparently विभासनानचेतन०)

कविभिः पर्यायान्तरपरिहारपूर्वकमुपवर्ण्यते[1]। यथा कृष्णाकुटिल केशोति वक्तव्ये यमुनाकल्लोलवक्रालकेति[2]। यथा वा गौराङ्गीवदनो पमापरिचित[3] इत्यत्र वनितादिवाचकसहस्रसङ्गावेऽपि[4] गौराङ्गीत्य तीवाग्राम्यतारमणीयम्[5]।

अयमपरः पर्यायप्रकारः पदपूर्वार्धवक्रताभिधायी—असम्भाव्यार्थ पात्रत्वगर्भं यत्राभिधीयते। वर्ण्यमानस्यासम्भाव्यः[6] सम्भावयितुमशक्यो योऽर्थः कश्चित्परिस्पन्दस्तत्र पात्रत्वं भाजनत्वं गर्भोऽभिप्रायो यत्राभिधाने तत्तथाविधं कृत्वा यत्राभिधीयते भण्यते[7]। यथा

अलं महीपाल तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्छति मारुतस्य[8] ॥ ४० ॥

अत्र महीपालेति राज्ञः सकलपृथ्वीपरिरक्षणक्षमपौरुषस्यापि[9] तथाविधप्रयत्नपरिपालनीयगुरुगोरूपजीवमात्रपरित्राणसामर्थ्यं[10] स्वप्नेऽप्यसम्भावनीयं यत्तत्पात्रत्वगर्भमाभरणमुपनिबद्धम्[11]। यथा वा

भूतानुकम्पा तव चेदियं गौ-
रेका भवेत् स्वस्तिमती त्वदन्ते।
जीवन् पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ पितेव पासि[12] ॥ ४१ ॥

(1) °हार° lost in A. (2) °लकें इति A. (3) See above p. 93.) °नितार° lost in A (5) °त्यभिधानमतीव रमणीयम् A. (6) A has वस्तुनः stead of असम्भाव्य°. (7) Omitted in B (8) रघु० II, 34. (9) अप nitted in B. (10) जीव omitted in B (11) यत् omitted in B. (12) ० ii, 48.

अत्र यदि[1] प्राणिकरुणाकारणं निजप्राणपरित्यागमाचरसि तदप्ययुक्तम्। यस्माच्चदन्ते स्वस्तिमती भवेदियमेकैव गौरिति त्रितयमप्यनादराच्चदम्। जीवन् पुनः भश्वच्चदैवोपप्लवेभ्योऽनर्थेभ्यः प्रजाः सकलभूतधात्रीवलयवर्तिनीः प्रजानाथ पासि रक्षसि[2] पितेवेत्यनादरातिशयः प्रथते। तदेवं यद्यपि सुश्लिष्टमन्वयोऽयं वाक्यार्थस्तथापि तात्पर्यान्तरमत्र प्रतीयते। यस्मात् सर्वस्य कस्यचित्प्रजानाथत्वे सति सदैव[3] तत्परिरक्षणस्याकरणमसम्भाव्यम्। तत्प्रावल्यगर्भमेव तदभिहितम्[4]। यस्मात् प्रत्यक्षप्राणिमात्रभक्ष्यमाण[5]गुरुहोमधेनुप्राणपरिरक्षणापेक्षा[6]निरपेक्षस्य सतो जीवतस्तवानेन न्यायेन कदाचिदपि प्रजापरिरक्षणं मनागपि न सम्भाव्यत इति प्रमाणोपपन्नम्। तदिदमुक्तम्

प्रमाणवत्त्वादायातः[7] प्रवाहः केन वार्यते ॥४२॥

इति। अत्राभिधानप्रतीतिगोचरोक्तानां पदार्थानां[8] परस्परप्रतियोगित्व[9]मुदाहरणप्रत्युदाहरण[10]न्यायेनानुसन्धेयम्।

अयमपरः पर्यायप्रकारः[11] पदपूर्वार्धवक्रताकारणं[12] विदधाति—अलङ्कारोपसंस्कारमनोहारिनिबन्धनः। अत्र 'अलङ्कारोपसंस्कार'-शब्दे तृतीयासमासः षष्ठीसमासश्च करणीयः[13]। तेनार्थद्वयमभिहितं भवति। अलङ्कारेण रूपकादिनोपसंस्कारः शोभान्तराधानं यत्नेन मनोहारि हृदयरञ्जकं निबन्धनमुपनिबन्धो यस्य स तथोक्तः। अलङ्कारस्योक्तेत्यादेरुपसंस्कारः शोभान्तराधानं[14] चेति विग्रहः। तत्र तृतीयासमासपक्षोदाहरणं यथा

(1) A adds वा after this (2) परिरक्षसि A. (3) तदेव A. (4) एव omitted in A, which also reads एतदभि० for तदभि० (5) भक्ष्यमाण omitted in B. (6) रक्षणापेक्षा० B. (7) प्रमाणवत्त्वा यदायातः B. (8) Omitted in A. (9) योगित्व only B. (10) प्रत्युदाहरण omitted in B. (11) Dropped in B. (12) °वक्रता A and B (13) कार्यः A. (14) शोभा० lost in A

यो लीलातालहस्तो[1] रहसि निरुपधिर्यश्च[2] केलीप्रदीपः
कोपक्रीडासु योऽन्तं दशनकृतरुजो योऽधरस्यैकसेकः[3] ।
आकल्पे दर्पणं यः श्रमशयनविधौ यश्च गण्डोपधानं
देव्याः स व्यापदं वो हरतु हरजटाकन्दलीपुष्पमिन्दुः ॥४३॥

अत्र तालहस्तादिकार्यसामान्यादभेदोपचारनिबन्धनो[4] रूपकालङ्कार-विन्यासः सर्वेषामेव पर्यायाणां शोभातिशयकारित्वेनोपनिबद्धः। षष्ठी-समासपक्षोदाहरणं यथा

देवि त्वन्मुखपङ्कजेन शशिनः शोभातिरस्कारिणा
पक्ष्माङ्गानि[5] विनिर्जितानि सहसा गच्छन्ति विच्छायताम्[6] ॥४४॥

अत्र स्वरसप्रवृत्तसायंसमयसमुचिता सरोरुहाणां[7] विच्छायतापरि-पत्तिर्नायकेन[8] नागरकतया वल्लभोपलालनाप्रवृत्तेन तद्विदग्धेनोपक्रम-रमणीयत्वमुखेन[9] निर्जितानीवेति प्रतीयमानोत्प्रेक्षालङ्कारकारित्वेन[10] प्रतिपाद्यते। एतदेव च युक्तियुक्तम्। यस्मात्सर्वस्य कस्यचित्पङ्कजस्य शशाङ्कशोभातिरस्कारितां प्रतिपद्यते; त्वन्मुखपङ्कजेन पुनः शशिनः शोभातिरस्कारिणा न्यायतो निर्जितानि सन्ति विच्छायतां गच्छन्ती-वेति[11] प्रतीयमानस्योत्प्रेक्षालक्षणस्यालङ्कारस्य शोभातिशयः समु-ल्लास्यते।

एवं पर्यायवक्रतां विचार्य क्रमसमुचितावसरामुपचारवक्रतां विचारयति—

यत्र दूरान्तरेऽन्यस्मात्सामान्यमुपचर्यते ।
लेशेनापि भवत् काञ्चिदलङ्कृतिमुद्रिकावृत्तिताम् ॥१३॥

(1) ०हस्त B. (2) निरुपधि. B. (3) ०जो योऽ lost in A. (4) सामान्या० lost in A. (5) वक्त्र for पक्ष्म in A. (6) स्वाभावौ i, 25. (7) ०रुहा० ost in A. (8) विच्छायापत्ति० A (9) ०रमणीयं त्वन्मुखेन B. (10) ०परत्वेन or ०कारित्वेन in A. (11) प्रतिपद्यत इति A.

यन्मूला सरसोल्लेखा रूपकादिरलङ्कृतिः ।
उपचारप्रधानासौ वक्रता काचिदुच्यते[1] ॥१४॥

असौ काचिदपूर्वा वक्रतोच्यते वक्रभावोऽभिधीयते। कीदृशी—उपचारप्रधाना। उपचरणमुपचारः स एव प्रधानं यस्याः सा तथोक्ता। किंस्वरूपा च—यत्र यस्यामन्यस्मात्पदार्थान्तरात् प्रस्तुतत्वाद्वर्ण्यमाने वस्तुनि सामान्यमुपचर्यते साधारणो धर्मः कश्चिदत्रमभिप्रेतः समारोप्यते। कस्मिन् वर्ण्यमाने वस्तुनि—दूरान्तरे। दूरमनल्पमन्तरं व्यवधानं यस्य तत्तथोक्तं तस्मिन्। ननु च व्यवधानममूर्तत्वाद्वर्ण्यमानस्य[2] वस्तुनो देशविप्रकृतं तावन्न सम्भवति; कालविप्रकृतमपि नास्त्येव, तस्य क्रियाविषयत्वात्। क्रियास्वरूपं कारकस्वरूपं चेत्यभयात्मकं यद्यपि वर्ण्यमानं वस्तु, तथापि देशकालव्यवधानेनात्र न भवितव्यम्। यस्मात्पदार्थानामनुमानवत् सामान्यमात्रमेव शब्दैर्विषयीकर्तुं पार्यते, न विशेषः। तत्कथं दूरान्तरत्वमुपपद्यते? सत्यमेतत्, किन्तु 'दूरान्तर'-शब्दो मुख्यतया देशकालविषये विप्रकर्षे प्रत्यासत्तिविरहे वर्तमानोऽप्युपचारात् स्वभावविप्रकर्षे वर्तते। सोऽयं स्वभावविप्रकर्षो विरुद्धधर्माध्यासलक्षणः पदार्थानाम्। यथा मूर्तिमत्वममूर्तत्वापेक्षया, द्रवत्वं च घनत्वापेक्षया, चेतनत्वमचेतनत्वापेक्षयेति। कीदृक् तत्सामान्यम्—लेशेनापि भवत्। मनाङ्मात्रेणापि सत्। किमर्थम्—काञ्चिदपूर्वामुद्भिन्नवृत्तितां वक्तुं सातिशयपरिस्पन्दतामभिधातुम्। यथा

स्निग्धश्यामलकान्तिलिप्तविय[3]तः ॥ १५ ॥

(1) These two कारिकाs are cited by Jayaratha (p. 8) in connexion with his exposition of the वक्रोक्तिजीवितकार views. (2) ०वर्णस्य A. (3) See above p. 89.

अत्र यथा बुद्धिपूर्वकारिणः कैश्चिच्चेतनवर्णं च्छायातिशयोत्पादने च्छया कैश्चिद्विद्यमानलेपनशक्तिना मूर्तेन नीलादिना रञ्जनद्रव्यविशेषेण किञ्चिदेव लेपनीयं मूर्तिमद्वस्तु वस्त्रप्रायं[1] लिम्पन्ति, तद्वदेव तत्कारित्व-सामान्यं मनाङ्मालेपेऽपि विद्यमानं कामप्युद्रिक्तहेतितामभिधातुमुप-चारात्[2] स्निग्धश्यामलया कान्त्या लिप्तं वियद् द्यौरित्युपनिबद्धम्। 'स्निग्ध'-शब्दोऽप्युपचारवक्र एव। यथा मूर्तं वस्तु दर्शनस्पर्शनसंवेद्य-लेपनगुणयोगात्[3] स्निग्धमित्युच्यते[4], तथैव कान्तिरमूर्तापुपचारात् स्निग्धेत्युक्ता। यथा वा

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा भूविक्लवास्ताः[5] ॥ ३६ ॥

अत्रामूर्तानामपि तमसामतिबाहुल्याद् घनत्वान्मूर्तैस्सूचिभिर्भेद्य-त्वमुपचरितम्। यथा वा

गण्डस्थं च मत्तमेहं धारालुलितभ्रुजाद् अ वणाइ।
णिरहंकारमिअंका हरंति णीलाओ वि णिसाओ[6] ॥ ४७ ॥

अत्र मत्तत्वं निरहङ्कारत्वं च चेतनधर्मसामान्यमुपचरितम्। सोऽय-मुपचारवक्रताप्रकारः सत्कविप्रवाहे सहस्रशः सञ्चरतीति सहृदयैः

(1) °वस्तुप्रायं A. (2) °मपि० lost in A. (3) B has only सर्वसंवेद्यं. (4) स्निग्धमि० lost in A. (5) मेघदूत 37. (6) गौडवही श्लो० 406 = quoted in ध्वन्यालोक p. 63 (anon) = व्यक्तिविवेक p. 119 (anon) = Jayaratha p. 8 (anon) = साहित्यदर्पण p. 25 (anon). The छाया would be

गण्डस्थं च मत्तमेव धारालुलितार्जुनानि च वनानि।
निरहङ्कारमृगाङ्का हरन्ति नीला अपि निशाः॥

स्वयमेवोल्लेखणीयः। अतएव च प्रत्यासन्नान्तरेऽभिधोपचारे न वक्रता व्यवहारः, यथा गौर्वाहीक इति।

इदमपरमुपचारवक्रतायाः स्वरूपम्—यन्मूला सरसोल्लेखा रूपकादिरलङ्कृतिः। या मूलं यस्याः सा तथोक्ता। रूपकमादिर्यस्या सा तथोक्ता। का सा—अलङ्कृतिरलङ्करणं रूपकप्रभृतिरलङ्कारविच्छित्तिरित्यर्थः[1]। कीदृशी—सरसोल्लेखा। सरसः साक्षादः सचमत्कृतिरुल्लेखः सादृश्येषो यस्याः सा तथोक्ता। समानाधिकरणयोरत्र हेतुहेतुमद्भावः, यथा

अतिगुरवो राजभाषा न भक्ष्या इति॥ ८॥

यन्मूला सति रूपकादिरलङ्कृतिः सरसोल्लेखा। तेन रूपकादेरलङ्करणकलापस्य सकलस्यैवोपचारवक्रता जीवितमित्यर्थः।

ननु च पूर्वस्मादुपचारवक्रताप्रकारादेतस्य को भेदः? पूर्वस्मिन् स्वभावविप्रकर्षात् सादृश्येन मनाङ्मात्रमेव भाग्यं समाश्रित्य सातिशयत्वं प्रतिपादयितुं तद्धर्ममात्राध्यारोपः प्रवर्तते, एतस्मिन् पुनरदरविप्रकृष्टसादृश्यसमुद्भवप्रत्यासत्तिसमुचितत्वादभेदोपचारनिबन्धनं[2] तत्त्वमेवाध्यारोप्यते। यथा

सन्त्येव[3] कालश्यवणोत्पलेषु
सेनावनालीविषगात्रयष्टिषु[4]।
गाम्भीर्यपातालकृशीश्वरेषु
खड्गेषु को वा भवतां मुरारिः[5]॥ ४८॥

अत्र कालश्यवणोत्पलादिसादृश्यजनित[6]प्रत्यासत्तिविहितमभेदोपचारनिबन्धनं[7] तत्त्वमध्यारोपितम्।

(1) रूपकः omitted in A. (2) ०मनश्चिलादुपचार० B. (3) सन्तेव B. (4) मनावनालीविष० B (5) सन्ति मुरारिः A. (6) ०सादृश्यं संजनितं B. (7) ०निमित्तं for ०निबन्धनं A.

'आदि'[1]-ग्रहणादप्रस्तुतप्रशंसाप्रकारस्य कस्यचिदन्यापदेशलक्षणस्यापचारवक्रतैव जीवितत्वेन लक्ष्यते ।

तथा च किमपि पदार्थान्तरं प्राधान्येन प्रतीयमानतया चेतसि निधाय तथाविधलक्षणसाम्यसम्बन्धं समाश्रित्य पदार्थान्तरमभिधीयमानतां प्रापयन्तः प्रायशः[2] कवयो दृश्यन्ते । यथा

अनर्घः कोऽप्यन्तस्तव कविन किंवाकमहिमा
स्फुरत्येकस्यैव त्रिभुवनचमत्कारजनकः ।
यदिन्दोर्मूर्तिस्ते दिवि विहरणारण्यवसुधा
सुधासारस्यन्दी किरणनिकरः शश्वदबलः[3] ॥ ५० ॥

अत्र लोकोत्तरत्वलक्षणमुभयानुयायि सामान्यं समाश्रित्य प्राधान्येन विवक्षितस्य वस्तुनः प्रतीयमानत्वेतरभेदोपचारनिबन्धनं तत्त्वमध्यारोपितम्[4] । तथा चैतयोर्द्वयोरप्यलङ्कारयोर्मुख्येऽप्युपचारवक्रताजीवितत्वे वाच्यत्वमेकत्र प्रतीयमानत्वमपरस्मिन् स्वरूपभेदस्य[5] निबन्धनम् । एतच्चोभयोरपि स्वलक्षणव्याख्यानावसरे समुन्मीलिष्यति ।

एवमुपचारवक्रतां विवेच्य समनन्तरप्रामायकाख्यां विशेषणवक्रतां विविनक्ति—

विशेषणस्य माहात्म्यात् क्रियायाः कारकस्य वा[6] ।
यत्रोल्लसति लावण्यं[7] सा विशेषणवक्रता ॥ १५ ॥

सा विशेषणवक्रता विशेषणवक्रत्वविच्छित्तिरभिधीयते। कीदृशी—यत्र यस्यां लावण्यमुल्लसति रामणीयकमुद्भिद्यते । कस्य—क्रियायाः कारकस्य[8] वा । क्रियालक्षणस्य वस्तुनः कारकलक्षणस्य वा[9] ।

(1) i.e. in तथादिः in the कारिका. (2) Omitted in A (3) The first two lines are quoted anonymously in Amaracandra's काव्यकल्पलता (p. 51) = माणिक्यचन्द्र p 20 (4) ०पचाराक्षिप्तस्वभावतत्त्वमध्यारोपितम् A. (5) ०सद् only in A. (6) च B. (7) ०असति लाव० lost in A. (8) ०या कार० lost in A. (9) च B

कस्मात्—विशेषणस्य माहात्म्यात्। एतयोः प्रत्येकं भेदकं[1] [तस्य माहात्म्यात्] पदार्थान्तरस्य सातिशय तच्चातिशयत्वम्[2]—भावस्वभावसौकुमार्यसमुल्लासकत्वमल यथपरिपोषकत्वम्[3] च। यथा

श्रमजलसेकजनितनवविलिखितनखपददाहमूर्छिता
वल्लभरभसलुलितललितालकवलयचयार्धनिद्रुता[4]।
सुरतसविविधविहितसुरतक्रमपरिमलत्रपालसा[5]
जयति निशात्यये युवतिरुक् तनुमधुमदविशदपाटल

यथा वा

करारुणालोलकपोलभित्ति-
र्बाष्पोच्छलत्कूणितपत्रलेखा[6]।
श्रोत्रान्तरे पिण्डितचित्तवृत्तिः
शृणोति गीतध्वनिमत्र तन्वी ॥ ५२ ॥

यथा च

शुचिशीतलचन्द्रिकाप्लुता-
श्चिरनिःशब्दमनोहरा दिशः।
प्रशमस्य मनोभवस्य वा
हृदि तस्याप्यय हेतुतां ययुः[7] ॥ ५३ ॥

क्रियाविशेषणवक्रत्वं यथा

सस्मार वारणपतिर्विनिमीलिताक्षः[8]
स्वेच्छाविहारवनवासमहोत्सवानाम्[9] ॥ ५४

(1) तदेकं A. (2) त द for तत्० in B. (3) पोषकत्वं A. (4) A reads वल्लभरभस० and ०वलयचयार्धा०. B reads (5) ०परिमलत्र A. (6) बाष्पोत्कल० A. (7) कथा for तस्या B. (9) Quoted anonymously by Samudrabandha p

अत्र सर्वेषैव स्वभावसौन्दर्यसमुल्लासकत्वं विशेषणानाम्। अलङ्कार च्छायातिपरिपोषकत्वं[1] विशेषणस्य यथा

अस्मिन: शोभातिरस्कारिणा[2] ॥ ५५ ॥

एतदेव विशेषणवक्रत्वं नाम प्रस्तुतौचित्यानुसारि सकलसत्काव्य जीवितत्वेन लक्ष्यते, यस्मादनेनैव रसः परां परिपोषपदवीमवतार्यते यथा

करान्तरालीन[3] इति ॥ ५६ ॥

स्वमहिम्ना विशेष्यन्ते येन लोकोत्तरश्रियः।

रसस्वभावालङ्कारास्तद्विशेषणम् ॥ ५७ ॥

[इति] अन्तरश्लोकः[4]।

एवं विशेषणवक्रतां विचार्य क्रमसमर्पितावसरां संवृतिवक्रतां विचारयति—

यत्र[5] संव्रियते वस्तु वैचित्र्यस्य विवक्षया।
सर्वनामादिभिः कैश्चित् सोक्ता संवृतिवक्रता ॥१६॥

सोक्ता संवृतिवक्रता—या त्रिलोकेविधा सा संवृतिवक्रतेत्युक्ता[6] कथिता। संवृत्या वक्रता संवृतिप्रधाना वेति समासः। यत्र यस्यां वस्तु पदार्थलक्षणं संव्रियते समाच्छाद्यते। केन हेतुना—वैचित्र्यस्य विवक्षया विचित्रभावस्याभिधानेच्छया। यथा[7] पदार्थो विचित्रभावं समासादयतीत्यर्थः। कैश्च संव्रियते—सर्वनामादिभिः कैश्चित्। सर्वस्य नाम सर्वनाम तदादिर्येषां ते तथोक्तास्तैः कैश्चिदपूर्ववाचकैरित्यर्थः।

अत्र बहवः प्रकाराः सम्भवन्ति। यत्र किमपि सातिशयं वस्तु वक्तुं शक्यमपि साक्षादभिधानादियत्तापरिच्छेदतया परिमितप्रायं

(1) अलङ्करण A. (2) A drops oपरि०. (3) See above p. 99. (4) See above p. 104. (5) Omitted in A. (6) यत्र A. (7) स्युक्ता omitted in A. (8) यथा A.

मा प्रतिभासतामिति सामान्यवाचिना सर्वनाम्नाच्छाद्य तत्कार्याभिधायिना तदतिशयाभिधानपरेण वाक्यान्तरेण प्रतीतिगोचरतां नीयते। यथा

तत्पितर्यथ परियच्छलिष्णौ
स व्यधत्त करणीयमणीयः।
पुष्पचापशिखरस्खलपोलो
मन्मथः किमपि येन निदध्यौ ॥ ५८ ॥

अत्र सदाचारश्रवणतया गुरुभक्तिभावितान्तःकरणो लोकोत्तरौदार्यगुणयोगाद्विविधविषयोपभोगविलक्षणमना निर्जितेन्द्रियनिग्रहमसम्भावनीयमपि[1] भ्रान्तवान् विहितवानित्यभिधातुं शक्यमपि सामान्याभिधायिना सर्वनाम्नाच्छाद्योत्तरार्धेन कार्यान्तराभिधायिना[2] वाक्यान्तरेण प्रतीतिगोचरतामानीयमानं कामपि[3] चमत्कारकारितामावहति।

अयमपरः प्रकारो यत्र स्वपरिस्पन्दकाष्ठाधिरूढेः सातिशयं वस्तु वचसामगोचर इति प्रथयितुं सर्वनाम्ना समाच्छाद्य तत्कार्याभिधायिना[4] तदतिशयवाचिना वाक्यान्तरेण समुन्मील्यते। यथा

यातं द्वारवतीं तदा मधुरिपौ तद्दत्तसम्पादनां[5]
कालिन्दीजलकेलिवञ्चुललतामालम्ब्य सोत्कण्ठया।
तद्गीतं गुरुबाष्पगद्गदगलत्तारस्वरं राधया
येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम्[6] ॥ ५९ ॥

(1) ०मसम्भाव० lost in A. (2) कार्यांभिधायिना A. (3) ०यमानं का० lost in A. (4) ०त्कार्याभिधा० lost in A. (5) दत्तः सम्मानतां B; दत्तसंवादनां A Hemacandra and वाग्भट read ०क्त्यानतां, while the readings in सहृदय कर्णामृत and जीवन are respectively तत्तत्सख्यामया and तद्दत्तकम्पानतां. (6 Quoted anonymously by Hemacandra (p. 73) = वाग्भट's अलङ्कारतिलक p. 54 = सहृदयकर्णामृत p. 75 (ed. Bibl. Ind.)

अत्र सर्वेणात्मा संवृतं वस्तु तत्कार्याभिधायिना वाक्यान्तरेण समुन्मील्य सहृदयहृदयहारितां[1] प्रापितम्। यथा वा

तह रुण्णं कलुणं विसाहीआए रोधमग्गरणिराए।
जह कस्स वि जम्मसए वि कोइ मा वल्लहो होउ[2] ॥ ६० ॥

अत्र पूर्वार्धे संवृतं वस्तु रोदनलक्षणं तदतिशयाभिधायिना वाक्यान्तरेण कामपि तद्विदाह्लादकारितां नीतम्।

इदमपरमत्र प्रकारान्तरं यत्र सातिशयसुकुमारं वस्तु कार्योतिशयाभिधानं विना संवृतिमात्रेरमणीयतया कामपि काष्ठामधिरोप्यते यथा

दर्पणे च परिभोगदर्शिनो
पृष्ठतः प्रणयिनो निषेदुषः।
वीक्ष्य बिम्बमनुबिम्बमात्मनः
कानि कानि न चकार लज्जया[3] ॥ ६१ ॥

अयमपरः प्रकारो यत्र स्वानुभवसंवेदनायं वस्तु वचसा वक्तुमविषय इति ख्यापयितुं संव्रियते[4]। यथा

तान्यक्षराणि हृदये किमपि ध्वनन्ति[5] ॥ ६२ ॥

इति पूर्वमेव व्याख्यातम्।

इदमपि प्रकारान्तरं सम्भवति यत्र परानुभवसंवेद्यस्य वस्तुनो वक्तृगोचरतां प्रतिपादयितुं संवृतिः क्रियते। यथा

(1) सहृदयहारितां B. (2) The छाया would be

तथा रुदितं कृच्छ्रं विशाखायां रोधमार्गनिरतायाः।
यथा कस्यापि जन्मशतेऽपि कोऽपि मा वल्लभो भवतु ॥

A reads विसाहिआलंबोधमग्गच० and होउ, while B reads विसाहिआए रोधमग्गच०. (3) कुमार० VIII, 11 = आर्यासप्तशति 3744. (4) संवृतिः क्रियते A (5) See above p. 34, where add reference to लोचन p. 60

मन्मथः किमपि येन निदध्या[1] ॥ ६३ ॥

अत्र त्रिभुवनप्रथितप्रतापमहिमा तथाविधशक्तिध्वातविषण्णचेताः कामः किमपि स्वानुभवसमुचितमचिन्तयदिति ।

इदमपरं प्रकारान्तरमत्र विद्यते—यत्र स्वभावेन कविविवक्षया वा कैमर्थिदौपहल्येन युक्तं वस्तु महापातकमिव कीर्तनीयतां नार्हतीति समर्पयितुं संक्रियते । यथा

दुर्वृत्तं तदधः मास्म भून्मृग-
स्वय्यसौ यदकरिष्यदोजसा ।
नैनमाशु यदि वाहिनीपतिः
प्रत्यपत्स्यत धृतेन पत्रिणा[2] ॥ ६४ ॥

यथा वा

निवार्यतामालि किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः[3] ।
न केवलं यो महतोऽपभाषते[4]
शृणोति तस्मादपि यः स पापभाक्[5] ॥ ६५ ॥

अत्रार्जुनमारणं भगवदपभाषणं च न कीर्तनीयतामर्हतीति संवरणेन रमणीयतां नीतम्[6] । कविविवक्षयोपहतं यथा

सोऽयं दम्भधृतव्रतः[7] प्रियतमे कर्तुं किमप्युद्यतः[8] ॥ ६६ ॥

इति प्रथममेव व्याख्यातम् ।

एवं सङ्गतिवक्रतां विचार्य प्रत्ययवक्रतायाः कोऽपि प्रकारः पदमध्यान्तभूतत्वादिहैव समुचितावसरस्तस्मात्तद्विचारमाचरति—

(1) See above p. 106. (2) किरात० XIII, 49. (3) स्फुरिताधरोत्तरः A (4) महतां निशामयसे B. (5) कुमार० V, 83 = व्यक्तिविवेक p 9 (6) B adds इति. (7) B drops व्रत. (8) See above p. 34, 40.

प्रस्तुतौचित्यविच्छित्तिं स्वमहिम्ना विकासयन्[1] ।
प्रत्ययः पदमध्येऽन्यामुल्लासयति वक्रताम् ॥ १७ ॥

कश्चित् प्रत्ययः क्तादादिः पदमध्यवृत्तिरन्यामपूर्वां वक्रतामुल्लासयति वक्रभावमुद्द्योपयति । किं कुर्वन्—प्रस्तुतस्य वर्ण्यमानस्य वस्तुनो यदौचित्यमुचितभावस्तस्य विच्छित्तिमुपशोभां विकासयन् समुल्लासयन् । केन—स्वमहिम्ना निजोत्कर्षेण । यथा

वेल्लद्बलाका घनाः[2] ॥ ६७ ॥

यथा वा

स्निह्यत्कटाक्षे दृग्यौ[3] स्थिति[4] ॥ ६८ ॥

अत्र वर्तमानकालाभिधायी शतृप्रत्ययः कामप्यतीतानागतविभ्रमविरहितां तात्कालिकपरिस्पन्दसुन्दरीं प्रस्तुतौचित्यविच्छित्तिं समुल्लासयन् सहृदयहृदयहारिणीं[5] प्रत्ययवक्रतामावहति ।

इदानीमेतस्याः प्रकारान्तरं पर्यालोचयति—

आगमादिपरिस्पन्दसुन्दरः शब्दवक्रताम् ।
परः कामपि पुष्णाति बन्धच्छायाविधायिनीम् ॥ १८ ॥

परो द्वितीयः प्रत्ययप्रकारः कामप्यपूर्वां शब्दवक्रतामावहति वाचकवक्रभावं विदधाति । कीदृक्—आगमादिपरिस्पन्दसुन्दरः । आगमो सुमादिरादिर्यस्य स तथोक्तः, तस्यागमादेः परिस्पन्दः स्वविलसितं तेन सुन्दरः सुकुमारः । कीदृशीं शब्दवक्रताम्—बन्धच्छायाविधायिनीं सन्निवेश[6]कान्तिकारिणीमित्यर्थः । यथा

(1) प्रकाशयन् B. (2) See above p. 89. (3) See above p. 75. (4) दृग्यौ इ० lost in A. (5) हारिणी lost in A. (6) All the sentences from परो द्वितीयः up to this are lost in A.

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-
दित्यभ्यूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगम्मन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत्[1] ॥६९॥

यथा च

दाहोऽभ्रःप्रस्तुतिम्पचः[2] इति ॥ ७० ॥

यथा वा

पाथं पाथं कलाचीकृतकदलदलम्[3] ॥७१॥

इति । अत्र सुभगम्मन्यभावप्रभृतिशब्देषु[4] सुमादि[5]परिस्पन्दसुन्दराः सन्निवेशच्छायाविधायिनीं[6] वाचकवक्रतां प्रत्ययाः पुष्णन्ति ।

एवं प्रसङ्गसमुचितां पदमध्यवर्तिप्रत्ययवक्रतां विचार्य समनन्तर-सम्भविनीं[7] वृत्तिवक्रतां विचारयति—

अव्ययीभावमुख्यानां वृत्तीनां रमणीयता ।
यत्रोल्लसति सा ज्ञेया वृत्तिवैचित्र्यवक्रता ॥१९॥

सा वृत्तिवैचित्र्यवक्रता ज्ञेया बोद्धव्या । वृत्तीनां वैचित्र्यं[8] विचित्र-भावः सञ्जातीयापेक्षया सौकुमार्योत्कर्षरूपेण वक्रता वक्रभावविच्छित्तिः । कीदृशी—रमणीयता यत्रोल्लसति । रामणीयकं यस्यामुल्लिख्यते । कस्य[9]—वृत्तीनाम् । कासाम्—अव्ययीभावमुख्यानाम् । अव्ययी-भावः समासः[10] मुख्यः प्रधानभूतो यासां[11] तास्तथोक्तास्तासां समास-

(1) मेघदूत 90. (2) See above p. 33 (3) See above p. 82. (4) ॰प्रभृ॰ lost in A, which reads apparently प्रभृतिषु (5) पाणिनि iii 2. 83, vi. 3. 66, 67. (6) ॰विधायिनी B. (7) भाविनीं B. (8) Omitted in A. (9) यस्याः A. (10) Omitted in A (11) A here adds वृत्तीनां.

तद्धितसुब्धातुवृत्तीनां[1] वैयाकरणप्रसिद्धानाम्। तदयमत्रार्थः—[2]यत्र स्वपरिस्पन्दसौन्दर्यमेतासां समुचितभित्तिभागोपनिबन्धादभिव्यक्तिमासादयति। यथा

अभिव्यक्तिं तावद् बहिरलभमानः[3] कथमपि
स्फुरन्नन्तः स्वात्मन्यधिकतरसम्मूर्छितभरः[4]।
मनोज्ञामुद्गृह्णां परपरिमलस्पन्दसुभगां[5]-
महो धत्ते शोभामधिमधु लतानां नवरसः ॥७२॥

अत्र 'अधिमधु'-शब्दे विभक्त्यर्थविहितः समासः समयाभिधाय्यपि विषयसप्तमीप्रतीतिमुत्पादयन् 'नवरस'-शब्दस्य श्लेषच्छायाच्छुरण-वैचित्र्यमुन्मीलयति। एतद्वृत्तिविरहिते विन्यासान्तरे वस्तुप्रतीतौ सत्यामपि न तादृक्चिदाह्लादकारित्वम्[6]। उद्गृह्ण-परिमल-स्पन्द-सुभग-शब्दानामुपचारवक्रत्वं परिस्फुटिभाव्यते। यथा च

आ स्वर्लोकादुरगनगरं नूतनालोकलक्ष्मी-
मातन्वद्भिः किमिव सिततां चेष्टितैस्ते न नीतम्[7]।
अप्येतासां दयितविरहिता[8] विद्विषत्सुन्दरीणां
यैरानीता नखपदमयी मण्डना पाण्डिमानम्[9] ॥ ७३ ॥

अत्र पाण्डुत्व-पाण्डुता-पाण्डुभाव-शब्देभ्यः पाण्डिम-शब्दस्य किमपि वृत्तिवैचित्र्यवक्रत्वं विद्यते। यथा च

कान्त्योन्मीलति[10] सिंहलीमुखरुचां चूर्णाभिषेकोल्लस-[11]
ल्लावण्यामृतवाहिनिर्झरजुषामाचान्तिभिश्चन्द्रमाः।

(1) A has समासतद्धितसुब्धातूनां. (2) B adds यदि before यत्र. (3) यक्षि० for यहि in B. (4) ०मूर्छितेश्वरः B. (5) ०सुद्गृह्णपरिमल० B. (6) तादृक् omitted in A. (7) A reads सिकता, नीतः. (8) दयितविरहे A. (9) सुभाषितावली no. 2954. (10) Lost in A; B reads कान्तलीयति. Our emendation is conjectural. (11) चूर्णां for चूर्णा in B.

येनापानमहोत्सवव्यतिकरेष्वेकातपत्रायते[1]
देवस्य त्रिदशाधिपावजिजगज्जिष्णोर्मनोजन्मनः ॥ ७४ ॥

अत्र सुबधातुवृत्तेः ममासवृत्तेश्च किमपि वक्रतावैचित्र्यं[2] परिस्फुरति।

एवं वृत्तिवक्रतां विचार्य पदपूर्वार्धभाविनोसुचिनावसरां[3] भाववक्रतां विचारयति—

साध्यतामप्यनादृत्य सिद्धत्वेनाभिधीयते।
यत्र भावो भवत्येषा भाववैचित्र्यवक्रता ॥ २० ॥

एषा वर्णितस्वरूपा भाववैचित्र्यवक्रता[4] भवत्यस्ति। भावो धात्वर्थरूपस्तस्य वैचित्र्यं विचित्रभावः प्रकारान्तराभिधानव्यतिरिक्तं रामणीयकं तेन वक्रता वक्रत्वविच्छित्तिः। कोदृशी—यत्र यस्यां भावः[5] सिद्धत्वेन परिनिष्पन्नत्वेनाभिधीयते[6] भण्यते। किं कृत्वा—साध्यतामप्यनादृत्य। निष्पाद्यमानतां प्रसिद्धामप्यवधीर्य। तदिदमत्र तात्पर्यम्—यत् साध्यत्वेनापरिनिष्पत्तेः[7] प्रस्तुतस्यार्थस्य दुर्बलः परिपोषः, तस्मात् सिद्धत्वेनाभिधानं परिनिष्पन्नत्वात्पर्याप्तं प्रकृतार्थपरिपोषमावहति। यथा

श्वासायासमलीमसाधरवधे[8] दोःकन्दलीतानवात्
केयूरायितमङ्गदैः परिगतं पाण्डिम्नि गण्डत्विषा।
अस्याः किं च विलोचनोत्पलयुगीनाल्यन्तमभ्युत्सुता
तारं साट्टगपाङ्गयोररुणितं येनोज्झताप: स्मरः ॥ ७५ ॥

अत्र भावस्य सिद्धत्वेनाभिधानमतीव चमत्कारकारि।

(1) पारे for पान in A. (2) वक्र lost in A. (3) ०विमी० lost in A. (4) वैचित्र्य lost in A. (5) यस्यां भाव: lost in A. (6) परिस्पन्दत्वेना० A. (7) A is corrupt here and has lost परिनि० but reads साध्यत्वेनाभिधा before it. (8) वधे: lost in A.

एवं भाववक्रतां विचार्य प्रातिपदिकान्तर्वर्तिनीं लिङ्गवक्रतां विचारयति—

भिन्नयोर्लिङ्गयोर्यस्यां सामानाधिकरण्यतः ।
क्वापि शोभाभ्युदेत्येषा[1] लिङ्गवैचित्र्यवक्रता ॥२१॥

एषा कथितस्वरूपा[2] लिङ्गवैचित्र्यवक्रता स्त्र्यादिविचित्रभाववक्रता-विच्छित्तिः । भवतीति सम्बन्धः, क्रियान्तराभावात् । कीदृशी—यस्यां यत्र विभिन्नयोर्विभक्तस्वरूपयोर्लिङ्गयोः सामानाधिकरण्यतस्तुल्याश्रय-त्वादेकद्रव्यवृत्तित्वात् काप्यपूर्वा शोभाभ्युदेति काम्यिकत्वसति । यथा

यस्यारोपणकर्मणापि बहवो वीरव्रतं त्याजिताः
कार्यं पुङ्खितबाणमोघरधनुस्तद्दोर्भिरभिर्मया ।
स्त्रीरत्नं तदगर्भसम्भवमितो लभ्यं च लीलायिता
तेनैषा मम फुल्लपङ्कजवनं जाता दृशां विश्रान्तिः[3] ॥ ७६ ॥

यथा वा

नभस्वता लासितकल्पवल्ली[4]-
प्रवालबालव्यजनेन[5] तस्य ।
उरःस्थलेऽकीर्यत दक्षिणेन
सर्वौषधं सौरभमङ्गरागः ॥ ७७ ॥

यथा च

आयोज्य मालामृतुभिः प्रयत्न-
सम्पादितामंसतटेऽस्य चक्रे ।
करारविन्दं मकरन्दबिन्दु-
स्यन्दि श्रिया विभ्रमकर्णपूरः ॥ ७८ ॥

(1) इदेति शोभा काप्येषा A. (2) स्वरूपकथिता B. (3) लासित A. (4) वात-वाल्य । 30 p 15) (5) वात omitted n B

इदमपरा च लिङ्गवैचित्र्यवक्रता—

सति लिङ्गान्तरे यत्र स्त्रीलिङ्गञ्च प्रयुज्यते ।
शोभानिष्पत्तये यस्मान्नामैव स्त्रीति पेशलम् ॥२२॥

यत्र यस्यां लिङ्गान्तरे सत्यन्यस्मिन् सम्भवत्यपि लिङ्गे स्त्रीलिङ्गं प्रयुज्यते निबध्यते। अनेकलिङ्गत्वेऽपि पदार्थस्य स्त्रीलिङ्गविषयः प्रयोगः क्रियते। किमर्थम्—शोभानिष्पत्तये। कस्मात् कारणात्—यस्मान्नामैव स्त्रीति पेशलम्। स्त्रीत्वभिधानमेव हृदयहारि। विच्छित्त्यन्तरेण रसादियोजनयोग्यता[1]। उदाहरणं यथा

यथेयं योषोष्मव्यतिकरवती पाण्डुरभिदा
सुखोद्भिन्नस्नानानिलतरलवल्लीकिसलया[2]।
तटौ तारं ताम्यत्यतिशयितशोभः[3] कोऽपि जलद-
स्तथा भव्ये[4] भावी भुवनवलयाकालिसुभगः[5] ॥७८॥

अत्र विलिङ्गत्वे सत्यपि 'तट'-शब्दस्य, सौकुमार्यात् स्त्रीलिङ्गमेव प्रयुक्तम्। तेन विच्छित्त्यन्तरेण भावी नायकव्यवहारः[6] कथिदासूत्रित इत्यतीव रमणीयत्वादवक्रतामावहति[7]।

इदमपरमेतस्याः प्रकारान्तरं लक्षयति—

विशिष्टं योज्यते लिङ्गमन्यस्मिन् सम्भवत्यपि ।
यत्र विच्छित्तये सान्या वाच्यौचित्यानुसारतः ॥२३॥

(1) ०योग्यत्वात् B. (2) तरुण for तरल in B. (3) ०भिशयि for भिशयि in A. (4) भव्ये A. (5) कालि for कालि in A. (6) भाविनायिका० A. (7) अभिनवगुप्त (लोचन p. 160) says: तथा हि—'तटौ तारं ताम्यति' इत्यत्र तट शब्दस्य पुल्लमपुंसकले अनाहत्य स्त्रीलिंगविवक्षित एवदर्थः, 'स्त्रीति नामापि मधुरम्' इति न्यायात्। It is posible that this is a reminiscence of Kuntaka's कारिका and its Illustration.

सा चोक्तस्वरूपान्यापरा लिङ्गवक्रता विद्यते। यत्र यस्यां विशिष्टं योज्यते लिङ्गवयाणामेकतमं किमपि कविविवक्षया निबध्यते। कथम्—अन्यस्मिन् सम्भवत्यपि, लिङ्गान्तरे विद्यमानेऽपि। किमर्थम्—विच्छित्तये, शोभाये। कस्मात् कारणात्—वाच्यौचित्यानुसारतः। वाच्यस्य[1] वर्ण्यमानस्य वस्तुनो यदौचित्यमुचितभावस्तस्यानुसरणमनुसारस्तस्मात्। यदार्थौचित्यमनुरुध्येत्यर्थः। यथा

त्वं वत्सला भीरु यतोऽपनीता[2]
तं मार्गमेताः कुसुमैर्लता मे।
अदर्शयन् वक्त्रमशक्नुवन्त्यः
शाखाभिरावर्जितपल्लवाभिः[3] ॥ ८० ॥

अत्र सीतया सह रामः पुष्पचयावतरणस्थाः स्वयमेव[4] तद्विरहवैधुर्यमावेदयति—यत्त्वं रावणेन तथाविधक्रूरतरचेतसा मार्गे यस्मिन्नपनीता तत्र तदुपमर्दवशात्तथाविधसंस्थानयुक्तत्वं[5] लतानामुन्मुखत्वं[6] मम त्वन्मार्गानुसारस्य निमित्ततामापन्नमिति वस्तु विच्छित्तिकरेण रामेण[7] योज्यते; यथा—हे भीरु स्वाभाविकसौकुमार्यैकान्तरालःकरणे, रावणेन तथाविधक्रूरकर्मकारिणा यस्मिन्मार्गे त्वमपनीता तमेताः साक्षात्कारपरिदृश्यमानमूर्तयो लताः किल मामदर्शयन्निति। तन्मार्गप्रदर्शनं परमार्थतस्तासां निसर्गलतया न सम्भाव्यत इति प्रतीयमानवृत्तिरूपेचालङ्कारः कवेरभिप्रेतः। यथा—तव भीरुत्वं रावणस्य क्रौर्यं ममापि त्वत्परित्राणप्रयत्नपरतां पर्यालोच्य स्त्रीस्वभावादार्द्रहृदयत्वेन समुचितत्वविषयपक्षपातमाहात्म्यादेताः कुसुमैव[8] मम मार्गप्रदर्शनमकुर्वन्निति। केन कारणभूतेन[9]—शाखाभिरावर्जितपल्लवाभिः।

(1) lost in A. (2) ०तोऽपनीता० lost in A. (3) रघु० xiii, 24. (4) ०स्थाः स्व० lost in A. (5) पदस्थान for संस्थान in A. (6) उन्मुखत्व० omitted in B. (7) Omitted in A. (8) Omitted in A. (9) कारणभूतेन B.

यस्मादागन्तिव्यवर्जितत्वादकृत्रिमरूपत्वम्। यत्किल ये केचिदन्यस्तो मार्गप्रदर्शनं प्रकुर्वन्ति ते तदुपलक्षीभूतइङ्गितज्ञत्वेनैवंभूमिरिचेतदलीव युक्तियुक्तम्। तथा चात्रैव वाक्यान्तरमपि विद्यते

सख्यश्च दर्भाङ्कुरनिर्व्यपेक्षा-
स्त्वागतिघ्नं समबोधयन्ताम्।
व्यापारयन्त्यो दिशि दक्षिणस्या-
मुत्पक्ष्मराजीनि विलोचनानि[1] ॥ ८१ ॥

इत्यस्य मां समबोधयन्। कीदृशम्—त्वागतिघ्नम्, छलाप्रदर्शिन-मार्गमज्ञानघ्नम्। ततश्चाः[2] सम्यगबोधयन्निति, यतस्तास्तदपेक्षया किञ्चिदधुरा इति। तास्च कीदृश्यः—तथाविधवेशसन्दर्शनवशाद् दुःखितत्वेन परित्यक्तदृष्टयासाः। किं कुर्वाणाः—तस्यां दिशि नयनानि समर्पयन्त्यः। कीदृशानि—ऊर्ध्वोन्नतपक्ष्मपङ्क्तीनि। तदेवं तथाविधज्ञानकर्तृत्वेन दक्षिणां दिशमन्तरिक्षेण नीतेति संज्ञया निवेदयन्त्यः। अत्र हरिणादिषु लिङ्गान्तरेषु सम्भवत्स्वपि स्त्रीलिङ्ग-मेव पदार्थौचित्यानुसारेण चेतनचमत्कारकारितया कवेरभिप्रेतम्। तस्मात् कामपि वक्रतामावहति।

एवं प्रातिपदिकलक्षणस्य सुबन्तसम्बन्धिनः पदपूर्वार्धस्य यथासम्भवं वक्रभावं विचार्येदानीमुभयोरपि सुप्तिङन्तयोर्धातुस्वरूपः पूर्वभागो यः सम्भवति तस्य वक्रतां विचारयति। तस्य च क्रियावैचित्र्य-निबन्धनमेव वक्रत्वं विद्यते। तस्मात् क्रियावैचित्र्यस्यैव कीदृशाः कियन्तश्च[3] प्रकाराः सम्भवन्तीति तत्स्वरूपनिरूपणायेमाह—

कर्तुरत्यन्तरङ्गत्वं कर्मान्तरविचित्रता।
स्वविशेषणवैचित्र्यमुपचारमनोज्ञता ॥ २४ ॥

(1) रघु० xiii, 25. (2) तः omitted in A. (3) कियन्त० lost in A. B reads कियन्तो वा.

कर्मादिसंवृतिः पञ्च[1] प्रस्तुतौचित्यचारवः ।
क्रियावैचित्र्यवक्रत्वप्रकारास्तु इमे स्मृता ।[2] ॥२५॥

क्रियावैचित्र्यवक्रत्वप्रकारा धात्वर्थविचित्रभाववक्रतामेदास्तु इमे स्मृता वक्ष्यमाणलक्षणाः[3] कीर्तिताः । कियत्यः—पञ्च पञ्चसंख्याविशिष्टाः । कीदृशाः—प्रस्तुतौचित्यचारवः । प्रस्तुतं वक्ष्यमाणं वस्तु तस्य यदौचित्यमुचितभावस्तेन चारवो[4] रमणीयाः । तत्र प्रथमस्तावत् प्रकारो यः—कर्तुरत्यन्तरङ्गत्वं नाम । कर्तुः स्वतन्त्रतया मुख्यभूतस्य कारकस्य क्रियां[5] प्रति निर्वर्तयितुर्यदत्यन्तरङ्गत्वम् अत्यन्तमासन्नत्वम्[6] । यथा

चूडारत्ननिषक्तदुर्वहजगद्भारोद्यमत्कन्धरो
धत्तामुद्वृततामसो भगवतः शेषस्य मूर्धा परम् ।
खेदं संसृजतीषदप्यवनतिं यस्मिन् लुठन्त्यक्रमं[8]
शून्ये नूनमियत्ति नाम भुवनान्युद्दामकल्पोत्तरम् ॥८२॥

अत्रोद्वृतता धारणलक्षणक्रिया कर्तुः फणीश्वरमस्तकस्य प्रस्तुतौचित्यमाहात्म्यादत्यन्तभावं[9] यथा भजते[10] तथा नान्या काचिदिति क्रियावैचित्र्यवक्रतामावहति । यथा वा

किं शोभिताङ्गमनयेति पिनाकपाणेः
पृष्टस्य पातु परिचुम्बनमुत्तरं वः[11] ॥८३॥

अत्र चुम्बनव्यतिरेकेण भगवता तथाविधलोकोत्तरं गौरीशोभाति-

(1) A reads this पाद as नवोन्मेषविशिष्टाये०. (2) A transposes the lines of this कारिका. वक्रत्व lost in A. (3) इमे स्मृता ०० lost in A. (4) lost in A. (5) क्रिया: A. (6) ०रत्व० lost in A. (7) अवनतं A. (8) लुठति A (9) महात्म्यादत्वाद् A (10) भुञ्जते A. (11) See above p. 55. In the previous quotation, the reading is अथाङ्गगौरीः (for पिनाकपाणेः) which seems preferrable in the context.

शयाभिधानं न केनचित् क्रियान्तरेण कर्तुं पार्यत इति क्रियावैचित्र्यनिबन्धनं वक्रभावमावहति। यथा च

रुहस्स तइअणअणं पव्वइपरिचुम्बिअं जअइ[1] ॥ ८४ ॥

यथा वा

सिढिलिअचाओ जअइ[2] मअरद्धओ[3] ॥ ८५ ॥

एतयोर्वैचित्र्यं पूर्वमेव व्याख्यातम्।

अयमपरः क्रियावैचित्र्यवक्रतायाः प्रकारः—कर्त्रन्तरविचित्रता अन्यः कर्त्ता कर्त्रन्तरं तस्मादिचित्रता वैचित्र्यम्। प्रस्तुतत्वात् सजातीयत्वाच्च[4] कर्तुरेव। एतदेव च तस्य वैचित्र्यं यत् क्रियामेव कर्त्रन्तरापेक्षया विचित्रस्वरूपां सम्पादयति। यथा

नैकत्र यस्निविरतिः क्वचिदस्ति सर्वे
भावाः स्वभावपरिनिष्ठितसारतम्याः।
आकल्पमौर्वदहनेन निपीयमान[5]-
मम्भोधिमेकचुलुकेन पपावगस्त्यः[6] ॥ ८६ ॥

अत्रैकचुलुकेनाम्भोधिपानं सततोद्यवसायाभ्यासकाष्ठाधिरूढिप्रौढाहङ्कारवह्नेः किमपि क्रियावैचित्र्यमुद्वहत् कामपि वक्रतामुन्मीलयति

यथा वा

प्रपन्नार्तिच्छिदो नखाः[7] ॥ ८७ ॥

यथा वा

स दहतु दुरितं शार्ङ्गिणो वः शराग्निः[8] ॥ ८८ ॥

एतयोर्वैचित्र्यं पूर्वमेव प्रदर्शितम्।

(1) See above p. 36. (2) जअइ B. (3) See above p. 37. (4) विजातीय• A. (5) निपीयमान B. (6) सुभाषितावली no. 992. (7) See above p. 36, B reads चापन्नार्ति (8) See above p. 37.

अयमपरः क्रियावैचित्र्यवक्रतायाः प्रभेदः—स्वविशेषणवैचित्र्यम्। मुख्यतया प्रस्तुतत्वात् क्रियायाः स्वस्याश्रयो यद्[1] विशेषणं भेदकं तेन वैचित्र्येण विचित्रभावः। यथा

इत्युद्गते शशिनि पेशलकान्तिदूतो-
संलापसम्बलितलोचनमानसाभिः[2]।
अद्याहि मण्डनविधिर्विपरीतभूषा-
विन्यासहासितसखीजनमङ्गनाभिः[3] ॥ ८८ ॥

अत्र मण्डनविधिग्रहणलक्षणायाः क्रियायाः विपरीतभूषाविन्यास-हासितसखीजनमिति विशेषणेन किमपि सौकुमार्यमुन्मीलितम्। यस्मात्तयाविधादरोपरचितं[4] प्रसाधनं[5] यस्य व्यक्तकत्वेनोपात्तं मुख्य-तया वर्ण्यमानवृत्तेर्वक्रभानुरागस्य सोऽप्यनेन सुतरां समुत्तेजितः। यथा वा

मय्यासक्तव्यकितचकरिणीदृष्टिनिर्वर्त्तिभागः[6] ॥ ९० ॥

अस्य वैचित्र्यं पूर्वमेवोदितम्। एतच्च क्रियाविशेषणं द्वयोरपि क्रिया-कारकयोर्वक्रत्वमुल्लासयति[7]। यस्माद्विचित्रक्रियाकारित्वमेव कारक-वैचित्र्यम्।

इदमपरं क्रियावैचित्र्यवक्रतायाः प्रकारान्तरम्—उपचारमनोज्ञता। उपचारः सादृश्यादिसमन्वयं समाश्रित्य धर्मान्तराध्यारोप[8]-रूपेण मनोज्ञता वक्रत्वम्। यथा

तरन्नीवाङ्गानि स्खलदमललावण्यजलधौ
प्रथिम्नः प्रागल्भ्यं स्तनजघनमुद्भूयति च।

(1) Omitted in A. (2) सलापसबलितमानसाभिः A, contrary to metre. (3) Quoted in काव्यमीमांसा p. 70=दशरूपकावलोक (on II, 38)=रसार्णव-सुधाकर i, 272. (4) ॰दरोपचित A. (5) प्रसाधनविधानं A. (6) प्रभाग. B. See above p. 35. (7) ॰क्त्वमुल्ला॰ lost in A. (8) समाश्रित्य धर्मा॰ lost in A.

दृशोर्लीलारम्भाः स्फुटमपवदन्ते सरलता-
महो सारङ्गाक्ष्यास्तरुणिमनि गाढः परिचयः[1] ॥९१॥

अत्र खलदमललावण्यजलधौ समुल्लसदिमलसौन्दर्यसंभारसिन्धौ परिस्फुरन्त्यपि स्खन्दतया[2] प्लवमानत्वेन[3] लक्ष्यमाणानि पारप्राप्तिमासादयितुं व्यवस्यन्तीवेति[4] चेतनपदार्थसंभविसादृश्योपचारात्तारुण्यतरलतरुणीगात्राणां तरणमुल्लेखितम्। उल्लेखायाश्चोपचार एव भूयसा जीवितत्वेन[5] परिस्फुरतोल्लेखावसर एव विचारयिष्यते[6]। प्रथिम्नः प्रागल्भ्यं[7] स्तनजघनमुन्मुद्रयति च [इति]—अत्र स्तनजघनं कर्तृ प्रथिम्नः प्रागल्भ्यं महत्त्वस्य प्रौढिमुन्मुद्रयत्युन्मीलयति[8]। यथा कश्चिच्चेतनः[9] किमपि रत्नजातीयं वस्तु मुद्रयित्वा कमपि समयमवस्थाप्य समुचितोपयोगावसरे स्वयमुन्मुद्रयत्युद्घाटयति[10], तदेवं तत्कारित्वसाम्यात् स्तनजघनस्योन्मुद्रणमुपचरितम्। तदिदमुक्तं भवति—यत्[11] यदेव शैशवदशायां शस्त्रयात्मना निमीलितस्वरूपमनवस्थितमासीत्, तस्य प्रथिम्नः[12] प्रागल्भ्यस्य प्रथमतरतारुण्यावतारावसरसमुचितं प्रथनप्रसरं[13] समर्पयति। दृशोर्लीलारम्भाः स्फुटमपवदन्ते सरलताम् [इति]—अत्र शैशवप्रतिष्ठितां जडतां प्रकटमेवापसार्य दृशो-

(1) सदुक्तिकर्णामृत ii 11, p. 126 (राजशेखरस्य). But सूक्तिमुक्तावली attributes it to कुमुदक. Quoted anonymously by Hemacandra (p. 302) and वाग्भट (अलङ्कारतिलक) p. 62. माणिक्यचन्द्र refers (p. 25) to this criticism of the verse to the वक्रोक्तिजीवितकार (वक्रोक्तिजीवितकारोऽपि 'तरलीवाङ्गानि' इत्यत्र सादृश्योपचारमूचे।) (2) ०स्फुरत्परिस्खन्दतया A. (3) न of प्लवमान is lost in A, which reads ०लव for ०लेन. (4) व्यवस्यन्ति चेति A. (5) प्रचारप्रवय. वक्रोक्ति० A. (6) वक्ष्यते A. This is discussed in ch. iii. (7) A omits all the words from here up to प्रथिम्नः प्रागल्भ्यं in the next line. (8) व्यामीलयति A. (9) कश्चिन्नय A. (10) उत्पाटयति A. (11) Omitted in A (12) प्रथिम B (13) प्रथम० B

विलासोल्लासाः कमपि नवयौवनसमुचितं विभ्रममधिरोपयन्ति। यथा केचिच्चेतनाः कुत्रचिद्विषये कमपि व्यवहारं समासादितप्रसरमपसार्य किमपि स्वाभिप्रायाभिमतं परिस्पन्दान्तरं प्रतिष्ठापयन्तीति[1] तत्कारित्वसादृश्यात्तोलावतीलोचनविलासोल्लासानां सरलत्वापवदनमुपचरितम्। तदेवंविधेनोप[2]चारेणेतास्विक्षोऽपि क्रियाः कामपि वक्रतामधिरोपिताः। वाक्येऽस्मिन्नपरेऽपि वक्रताप्रकाराः प्रतिपदं सम्भवन्तोऽवसरान्तरे[3] विचार्यन्ते।

इदमपरं क्रियावैचित्र्यवक्रतायाः प्रकारान्तरम्—कर्मादिसंहृतिः। कर्मप्रभृतीनां कारकाणां संहृतिः संवरणम्, प्रस्तुतौचित्यानुसारेण सातिशयप्रतीतये समाच्छाद्याभिधा[4]। सा च क्रियावैचित्र्यकारित्वात् प्रकारत्वेनाभिधीयते[5]।

कारणे कार्योपचाराद् यथा

नेत्रान्तरे मधुरमर्पयतीव किञ्चित्
कर्णान्तिके[6] कथयतीव किमप्यपूर्वम्।
अन्तः समुल्लिखति किञ्चिदिवायताक्ष्या[7]
रागालसे मनसि रम्यपदार्थलक्ष्मीः॥ ८२॥

अत्र तदनुभवैकगोचरत्वादनाख्येयत्वेन किमपि सातिशयं प्रतिपदं कर्म सम्पादयन्त्यः क्रियाः स्वात्मनि कमपि वक्रभावमुद्भावयन्ति[8]। उपचारमनोज्ञतायाश्च विदधते। यस्मादर्पणकथनोल्लेखनाम्न्युपचारनिबन्धनान्येव, चेतनपदार्थधर्मत्वात्। यथा च

(1) इति omitted in B. (2) ०म्। तदेवंवि० lost in A. (3) ०न्तीत्येवमवसरान्तरे A. This is discussed below, p 132 (4) B reads समाच्छाद्याभिधा (?) (5) The whole of the paragraph is dropped in A. (6) कर्णान्तरे A. (7) ०दिवायताक्ष्या B. (8) ०मुत्पादयन्ति A

नृत्तारम्भाहितरभसस्त्रिष्ठ तावन्मुहुर्ते
यावन्मौलौ स्खलदचलतां भूषणं ते नयामि ।
इत्याख्याय प्रणयमधुरं कान्तया योज्यमाने
चूडाचन्द्रे जयति सुखिनः कोऽपि शर्वस्य गर्वः ॥९६॥

अत्र 'कोऽपि' इत्यनेन सर्वनामपदेन[1] तदनुभवैकगोचरत्वादव्यपदेश्यत्वेन सातिशयः शर्वस्य गर्व इति कर्तृसंवृतिः । जयति सर्वोत्कर्षेण वर्तत इति क्रियावैचित्र्यनिबन्धनम् ।

इत्ययं पदपूर्वार्धवक्रभावो व्यवस्थितः ।
दिङ्मात्रमेवमेतस्य[2] शिष्टं लक्ष्ये निरूप्यते ॥९४॥

इति संग्रहश्लोकः ।

तदेवं सुप्तिङन्तयोर्द्वयोरपि पदपूर्वार्धस्य[3] प्रातिपदिकस्य धातोश्च यथायुक्ति वक्रतां[4] विचार्येदानीं तयोरेव यथास्वमपरार्धस्य प्रत्यय[5]-लक्षणस्य वक्रतां विचारयति । तत्र क्रियावैचित्र्यवक्रतायाः समनन्तरसम्भविनः क्रमसमन्वितत्वात्[6] कालस्य वक्रत्वं पर्यालोच्यते, क्रियापरिच्छेदकत्वात्तस्य ।

औचित्यान्तरतम्येन[7] समयो रमणीयताम् ।
याति यत्र भवत्येषा कालवैचित्र्यवक्रता ॥२६॥

एषा प्रक्रान्तस्वरूपा भवत्यस्ति कालवैचित्र्यवक्रता[8] । कालो वैयाकरणादिप्रसिद्धो वर्तमानादिर्लट्प्रभृतिप्रत्ययवाच्यो यः पदार्थानामुदयतिरोधानविधायी[9], तस्य वैचित्र्ये विचित्रभावस्तथाविधत्वेनो-

(1) Omitted in A. (2) दिङ्मात्रमेव तदेतस्य A, दिङ्मात्रमेतदस्य B (both readings corrupt, because contrary to metre). (3) पद० omitted in A (4) वक्रभावं A. (5) ०स्य प्रत्यय० lost in A. (6) क्रिया for क्रम in B. (7) औचित्यान्त० lost in A. (8) All words from एषा up to this omitted in A (9) ०रास्तुदय० lost in A.

पनिबन्धस्तेन वक्रता वक्रत्वविच्छित्तिः। कीदृशी—यत्र यस्यां समयः कालाख्यो रमणीयतां याति रामणीयकं गच्छति। केन हेतुना—औचित्यान्तरतम्येन। प्रस्तुतत्वाव्यवहाराधिकृतस्य वस्तुनो यदौचित्यमुचितभावस्तस्यान्तरतम्येनान्तरङ्गत्वेन। तदतिशयोत्पादकत्वेनेत्यर्थः। यथा

समविसमणिब्बिसेसा समंतदो मंदमंदसंचारा।
अइरो होहिंति पहा मणोरहाणं पि दुल्लंघा[1] ॥९५॥

अत्र वल्लभाविरहवैधुर्यकातरान्तःकरणेन[2] भाविनः समयस्य सम्भावनानुमानमात्रात्मानमुल्लेख्य उद्दीपनविभावत्वविभवविलसितं तत्परिस्पन्दसौन्दर्यसन्दर्शनासहिष्णुना किमपि भयविसंष्ठुलत्वमनुभूय शङ्काकुलत्वेन केनचिदेतदभिधीयते—यदचिराद् भविष्यन्ति पन्थानो मनोरथानामप्यलङ्घनीया इति भविष्यत्कालाभिधायी प्रत्ययः कामप्यपरार्धवक्रतां[3] विकासयति। यथा वा

यावल्लिच्छिदपूर्वमार्द्रमनसामाविद्यन्तो नवाः
सौभाग्यातिशयस्य कामपि दृशां मन्तुं व्यवस्यन्त्यमी।
भावास्तावदनन्यजस्य[4] विधुरः कोऽप्युद्यमो[5] जृम्भते
पर्याप्ते मधुविभ्रमे तु किमयं कर्तेति कम्पामहे ॥९६॥

अत्र व्यवस्यन्ति जृम्भते कर्ता कम्पामहे चेति प्रत्ययाः प्रत्येकं प्रतिनियतकालाभिधायिनः कामपि पदपरार्धवक्रतां प्रख्यापयन्ति। तथा च—प्रथमतरावतीर्णमधुसमयसौकुमार्यसमुल्लसितसुन्दरपदार्थसार्थसमुन्मीषसमुद्दीपितसहजविभवविलसितत्वेन मकरकेतोर्मनाङ्नवभाव-

(1) गाथासप्तशतक 675 = quoted in ध्वन्यालोक p.158. The छाया would be

समविषमनिर्विशेषाः समन्ततो मन्दमन्दसञ्चाराः।
अचिराद्भविष्यन्ति पन्थानो मनोरथानामपि दुर्लङ्घ्याः॥

(2) °कातरा° omitted in A. (3) कामपि पदार्थ° B. (4) भावः A. (5) जृम्भ° A.

सानाथ्य[1]समुल्लसितातुलशक्तेः मरसहृदयविधुरताविधायो कोऽपि संरम्भः समुज्जृम्भते। तत्खादनेनानुमानेन परं परिपोषमधिरोहति। कुसुमाकरविभवविजृम्भे मानिनीमानदलनदुर्ललितसमुदितसहज सौकुमार्यसम्पत्संजनितसमुचितजिगीषावसरः[2] किमसौ विधास्यतीति विकल्पयन्तस्तत्कुसुमशरनिकरनिपातकातरान्तःकरणाः किमपि कम्यामहे चकितचेतसः सम्यग्धामह इति प्रियतमाविरहविधुरचेतसः सरसहृदयस्य कस्यचिदेतदभिधानम्।

एवं कालवक्रतां विचार्य क्रमसमुचितावसरां कारकवक्रतां विचारयति—

यच्च कारकसामान्यं प्राधान्येन निबध्यते।
तत्त्वा[3]ध्यारोपणान्मुख्यगुणभावाभिधानतः ॥२७॥
परिपोषयितुं काञ्चिद् भङ्गीभणितिरम्यताम्[4]।
कारकाणां विपर्यासः सोक्ता कारकवक्रता ॥२८॥

सोक्ता कारकवक्रता सा कारकवक्रत्वविच्छित्तिरभिहिता। कीदृशी—यस्यां कारकाणां विपर्यासः साधनानां विपरिवर्तनम्, गौणमुख्ययोरितरेतरत्वापत्तिः। कथम्—यत् कारकसामान्यं मुख्यापेक्षया[5] करणादि तत् प्राधान्येन मुख्यभावेन प्रयुज्यते। कया युक्त्या[6]—तत्त्वाध्यारोपणात्। तदिति मुख्यपरामर्शः, तस्य भावस्तत्त्वं तदध्यारोपणात् मुख्यभावसमर्पणात्[7]। तदेवं मुख्यस्य का व्यवस्थेत्याह[8]—मुख्यगुणभावाभिधानतः। मुख्यस्य यो गुणभावस्तदभिधानादमुख्यत्वे नोपनिबन्धादित्यर्थः। किमर्थम्—परिपोषयितुं[9] काञ्चिद् भङ्गीभणितिरम्यताम्[10]। काञ्चिदपूर्वां विच्छित्युत्तिरमणीयतामुल्लासयितुम्

(1) ०साम्यं B. (2) ०दुर्ललितसहजभावुर्वसम्पत्० A. (3) तस्या A. (4) रम्यता B; ०म्यतां A. (5) मुख्यगौणापेक्षया A. (6) ०क्त्या A (7) मुख्यभावसम० lost in A. (8) आयमस्या A. (9) पोषयितुं lost in A. (10) ०रम्यता B.

तदेवमचेतनस्यापि चेतनसम्भविस्वातन्त्र्यसमर्पणादमुख्यस्य[1] करणादेर्वा कर्तृत्वाध्यारोपणाद्यत्र[2] कारकविपर्यासचमत्कारकारी सम्पद्यते। यथा

याच्ञां दैन्यपरिग्रहप्रणयिनीं नेच्छाकवः शिक्षिताः
सेवासम्बलितः कदा रघुकुले[3] मौलौ निबद्धोऽञ्जलिः[4]।
सर्वं तद्विहितं तथाप्युदधिना नैवोपरोधः कृतः
पाणिः सम्प्रति मे हठात् किमपरं स्रष्टुं[5] धनुर्धावति[6] ॥ ९७ ॥

अत्र पाणिना धनुर्ग्रहीतुमिच्छामीति वक्तव्ये पाणेः करणभूतस्य कर्तृत्वाध्यारोपः कामपि कारकवक्रतां[7] प्रतिपद्यते। यथा वा

स्तनद्वन्द्वम्[8] इत्यादौ[9] ॥ ९८ ॥

यथा वा

निष्पर्यायनिवेशपेशलरसैरन्योन्यनिर्भेदिभि-
र्हृद्यैरद्भुतपल्लवितैर्दशभिर्वर्षैर्धृतं काङ्क्षितम्।
सख्यानां पुनरप्रयोयसि विधावस्मिन्[10] गुणारोपणे
मत्सेवाविदुषामहम्प्रथमिका काप्यध्वरे वर्तते[11] ॥ ९९ ॥

अत्र पूर्ववदेव कर्तृत्वाध्यारोपनिबन्धनं कारकवक्रत्वम्। यथा वा

बहुमन्ये इति[12]। १०० ॥

एवं कारकवक्रतां विचार्य क्रमसमन्वितां संख्यावक्रतां विचारयति, तत्परिच्छेदकत्वात् संख्यायाः[13]—

(1) °समर्पणमुख्यस्य A, after which करणादेर्वा lost. (2) कर्तृत्वारोप° A (3) कदा रघुकुले lost in A (4) निबद्धाञ्जलिः B. (5) स्रष्टं A. (6) धावति B. This verse occurs in महानाटक (मधुसूदन's version), ed. जीवानन्द iv, 78, p. 54 Quoted anonymously in सरस्वतीकण्ठा० p. 52. (7) कारक० omitted in B. (8) See above p. 38. (9) This illustration is omitted here in A. (10) विधावस्मिन् B (11) वर्तते i, 50 (p. 23). (12) See above p. 39. (13) तत्परि etc. omitted in A.

कुर्वन्ति काव्यवैचित्र्यविवक्षापरतन्त्रिताः ।
यत्र संख्याविपर्यासं तां संख्यावक्रतां विदुः ॥ २८ ॥

यत्र यस्यां कवयः काव्यवैचित्र्यविवक्षापरतन्त्रिताः स्वकर्मविचित्रभावाभिधित्सापरवशाः संख्याविपर्यासं वचनविपरिवर्तनं कुर्वन्ति विदधते तां संख्यावक्रतां विदुः, तद्वचनवक्रत्वं जानन्ति तद्विदः । तदयमत्रार्थः—यदेकवचने द्विवचने वा प्रयोक्तव्ये वैचित्र्यार्थं वचनान्तरं यत्र प्रयुज्यते, भिन्नवचनयोर्वा यत्र सामानाधिकरण्यं विधीयते । यथा

कपोले पत्रालीं करतलनिरोधेन रुदिता
निपीतो निश्वासैरयमसृतहृद्योऽधररसः ।
मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटीं
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम्[1] ॥१०१॥

अत्र 'न त्वहम्' इति वक्तव्ये, 'न तु वयम्' इत्यन्तरङ्गत्वप्रतिपादनार्थं तात्पर्यप्रतीतये बहुवचनं प्रयुक्तम् । यथा वा

वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती[2] ॥१०२॥

अत्रापि पूर्ववदेव तात्पर्यप्रतीतिः । यथा वा

फुल्लेन्दीवरकाननानि नयने प्राणो सरोजाकरः[3] ॥ १०३ ॥

अत्र द्विवचनबहुवचनयोः सामानाधिकरण्यलक्षणः संख्याविपर्यासः सहृदयहृदयहारितामावहति । यथा वा

शास्त्राणि चक्षुर्नवम्[4] इति ॥ १०४ ॥

अत्र पूर्ववदेवैकवचनबहुवचनयोः सामानाधिकरण्यं वैचित्र्यविधायि ।

(1) अमरुशतक no. 85 = सुभाषितावली no. 1627 (anon) = कवीन्द्रवचन no. 377 (anon) = सदुक्तिकर्णा० ii, 245 (anon) = ध्वन्यालोक p. 86 (anon) = सरस्वतीकण्ठा० p. 370. (2) अभिज्ञानशाकुन्तल i, 24. (3) See above p. 38. (4) बालरामायण i, 36. See above p. 90.

एवं संख्यावक्रतां[1] विचार्य तद्विषयत्वात् पुरुषाणां क्रमसमर्पितावसरां पुरुषवक्रतां विचारयति—

प्रत्यक्षा[2] परभावस्य विपर्यासेन योज्यते ।
यत्र विच्छित्तये सैषा ज्ञेया पुरुषवक्रता ॥ ३० ॥

यत्र यस्यां प्रत्यक्षा निजात्मभावः परभावस्य अन्यत्वमुभयमप्येतद्विपर्यासेन योज्यते विपरिवर्तनेन निबध्यते । किमर्थम्[3]—विच्छित्तये वैचित्र्याय । सैषा वर्णितस्वरूपा ज्ञेया ज्ञातव्या पुरुषवक्रता पुरुषवक्रत्वविच्छित्तिः । तदयमत्रार्थः—यदन्यस्मिन्नुत्तमे मध्यमे वा पुरुषे[4] प्रयोक्तव्ये वैचित्र्यायान्यः कदाचित् प्रथमः प्रयुज्यते । तस्माच्च पुरुषैकयोगक्षेमत्वादव्ययादेः प्रातिपदिकमात्रस्य च विपर्यासः पर्यवस्यति[5] । यथा

कीर्णाश्चौं परिभूय नः क्षपणकैर्विद्वेषिभिः स्त्रोक्षसां
जानाम्येव[6] तथा प्रमादपरतां पत्युर्नयद्वेषिणः ।
स्त्रीणां च प्रियविप्रयोगविधुरं चेतः सदैवात्र मे
वक्तुं नोत्सहते[7] मनः परमतो जानातु देवो स्वयम्[8] ॥ १०५ ॥

अत्र 'जानातु देवो स्वयम्' इति युष्मदि मध्यमपुरुषे प्रयोक्तव्ये प्रातिपदिकमात्रप्रयोगेण वक्तुस्तदशक्त्यानुष्ठानतां मन्यमानस्यौदासीन्यप्रतीतिः । तस्याश्च[9] प्रभुत्वात् स्वातन्त्र्येण हिताहितविचारपूर्वकं स्वयमेव कर्तव्यार्थप्रतिपत्तिः[10] कामपि वाक्यवक्रभावमावहति । यस्मादेतदेवास्य वाक्यस्य जीवितत्वेन परिस्फुरति ।

(1) •वैचित्र्यं for वक्रतां A. (2) प्रत्युक्ता A and B. In the वृत्ति, the word is the same in B, but प्रत्यक्षा in A. (3) •यते । किम• lost in A. (4) •यमे वा पु• lost in A (5) •सः पर्यवस्यति lost in A. (6) जानाम्येव B ; जानाम्यस्य A. (7) नोत्सहते A. (8) जानातु देवः स्वयम् (Berlin Ms i, 67 a). (9) चैव for च in A. (10) •प्रतीतिः A.

एवं पुरुषवक्रतां विचार्य पुरुषाश्रयत्वादात्मनेपदपरस्मैपदयोरुचितावसरां वक्रतां विचारयति। धातूनां लक्षणानुसारेण नियतपदाश्रयः प्रयोगः पूर्वाचार्याणाम् 'उपयच्छ'-शब्दाभिधेयतया प्रसिद्धः, तस्मात्तदभिधानेनैव व्यवहरति—

पदयोरुभयोरेकमौचित्याद्[1] विनियुज्यते।
शोभायै यत्र जल्पन्ति तामुपयच्छवक्रताम् ॥ २१ ॥

तामुक्तस्वरूपामुपयच्छवक्रतामुपयच्छवक्रत्वविच्छित्तिं जल्पन्ति कवयः कथयन्ति। कीदृशीं—यत्र यस्यां पदयोरुभयोर्मध्यादेकमात्मनेपदं परस्मैपदं वा विनियुज्यते विनिबध्यते नियमेन। कस्मात् कारणात्—औचित्यात्। वर्ण्यमानस्य वस्तुनो यदौचित्यमुचितभावस्तस्मात्, तं समाश्रित्येत्यर्थः। किमर्थम्—शोभायै, विच्छित्तये। यथा

तस्याःपरिष्वपि सृगीषु शरान्मुमुचोः
कर्णान्तमेत्य विमिदे निविडोऽपि मुष्टिः।
त्रासातिभारचटुलैः स्मरयन्तु नेत्रैः
प्रौढप्रियानयनविभ्रमचेष्टितानि[2] ॥ १०६ ॥

अत्र राज्ञः सुललितविलासवतीलोचनविलासेषु स्मरणगोचरमवतरत्सु तत्परायत्तचित्तवृत्तेराङ्गिकप्रयत्नपरिस्पन्दविनिवर्तमाना मुष्टिर्विमिदे[3] मिद्यते स्म। स्वयमेवेति कर्मकर्तृनिबन्धनमात्मनेपदमनोव चमत्कारकारिणी[5] कामपि वाक्यवक्रतामावहति।

एवमुपयच्छवक्रतां विचार्य तदनुसम्भविनीं प्रत्ययान्तरवक्रतां विचारयति—

(1) पदयोरेकमौचित्यादुभयोर् A. (2) २।७० IX, 58. (3) निवर्तमानमुष्टिः A. (4) कर्मकर्तृनि० A. (5) ०कारकारि A.

विहितः प्रत्ययादन्यः प्रत्ययः कमनीयताम् ।
यत्र कामपि पुष्णाति साऽन्या प्रत्ययवक्रता ॥ ३२ ॥

साऽन्या प्रत्ययवक्रता[1] सा सामान्यातरूपादन्यापरा[2] काचित् प्रत्ययवक्रत्वविच्छित्तिः । अस्तीति सम्बन्धः । यत्र यस्यां प्रत्ययः कामप्यपूर्वां कमनीयतां[3] रम्यतां पुष्णाति पुष्यति । कीदृशः—प्रत्ययात् तिङादेर्विहितः पदत्वेन विनिर्मितोऽन्यः[4] कविदिति । यथा

लोनं वस्तुनि येन सच्चसुभगं तत्त्वं गिरा[5] क्षुण्यते
निर्मातुं प्रभवेच्चनोहरमिदं वाचेव यो वा वहिः[6] ।
वन्दे द्वावपि तावहं कविवरौ वन्देतरां तं पुन-
र्यो विज्ञातपरिश्रमोऽयमनयोर्भारावतारक्षमः ॥ १०७ ॥

'वन्देतराम्' इत्यत्र[7] कापि प्रत्ययवक्रता कविवेतसि परिस्फुरति । ततएव 'पुनः'-शब्दः पूर्वस्मादिशेषाभिधायित्वेन[8] प्रयुक्तः ।

एवं नामाख्यातरूपयोः पदयोः प्रत्येकं प्रकृतिप्रत्ययविभागद्वारेण[9] यथासम्भवं वक्रत्वं[10] विचार्येदानीमुपसर्गनिपातयोरव्युत्पन्नत्वादसम्भवद्विभक्तिकत्वाच्च[11] निरस्तावयवत्वे सत्यविभक्तयोः[12] साकल्येन वक्रतां विचारयति—

रसादिद्योतनं यस्यामुपसर्गनिपातयोः ।
वाक्यैकजीवितत्वेन सापरा पदवक्रता ॥ ३३ ॥

सापरा पदवक्रता—सा समर्पितस्वरूपापरा पूर्वोक्तव्यतिरिक्ता

(1) This phrase is lost in A, but marked by no lacuna. (2) अपरा omitted in A (3) कमनी० lost in A. (4) परतोऽन्यः A. (5) गिरा A. (6) वाक्पतिः for वा वहिः in A. (7) वन्देतरामित्य० lost in A. (8) विशेषाभिधायी A (9) प्रकृत्या lost in A, which also omits विभाग. (10) वक्रभावं B. (11) निपातयोरपि उत्पन्नत्वादसम्भवादविहितभक्तिकत्वाच्च A. (12) सत्य lost in A.

पदवक्रत्वविच्छित्तिः। अस्तीति सम्बन्धः। कीदृशी—यस्यां वक्रतायामुपसर्गनिपातयोर्वैयाकरणप्रसिद्धाभिधानयो रसादिद्योतनं शृङ्गारप्रभृतिप्रकाशनम्। कथम्—वाक्यैकजीवितत्वेन। वाक्यस्य श्लोकादेरेकजीवितं वाक्यैकजीवितं तस्य भावस्तत्त्वं तेन। तदिदमुक्तं भवति—यद्वाक्यस्यैकस्फुरितभावेन परिस्फुरति यो रसादिस्तस्याकाशनेनेत्यर्थः। यथा

वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव[1] ॥ १०८ ॥

अत्र रघुपतेस्तत्कालज्वलितोद्दीपनविभावसम्पत्समुल्लासितः सध्रमो निश्चिन्तजनितजानकीविपत्तिसम्भावनस्तत्परित्राणकरणोत्साहकारणतां प्रतिपद्यमानस्तदेकार्थतोल्लिखितसाक्षात्कारस्तदाकारतया[2] विप्रकृतविप्रकर्षः प्रत्यग्ररसपरिस्पन्दसुन्दरो निपातपरम्परा प्रतिपद्यमानवृत्तिर्वाक्यैकजीवितत्वेन प्रतिभासमानः कामपि[3] वाक्यवक्रतां[3] समुन्मीलयति। 'तु'-शब्दस्य च वक्रभावः पूर्वमेव व्याख्यातः। यथा वा

अयमेकपदे तया वियोगः
प्रियया चोपनतः सुदुःसहो मे।
नववारिधरोदयादहो भि-
र्भवितव्यं च निरातपत्वरम्यैः[4] ॥ १०९ ॥

अत्र द्वयोः परस्परं सुदुःसहत्वोद्दीपनसामर्थ्यसमेतयोः[5] प्रियाविरहवर्षाकालयोस्तुल्यकालत्वप्रतिपादनपरं 'च'-शब्दद्वितयं समसमयसमुल्लसितवल्लिदाहदक्षदक्षिणवातव्यजनसमानतां[6] समर्थयत् कामपि वाक्यवक्रतां समुद्दीपयति[7]। 'सु'-'दुः'-शब्दाभ्यां च प्रियाविरहस्याग्रह्यप्रतीकारता प्रतीयते। यथा च

(1) See above p. 89. (2) साक्षात्कारतदाकार° B. (3) Omitted in A. (4) निरातपत्व B विक्रमोर्वशी iv, 3 = अभिज्ञानशाकुन्तल p. 156 = काव्यप्रकाश p. 690. (5) °सामर्थ्यसमेतयोः A. (6) B omits च and reads व्यजन for व्यजन. (7) समुन्मीलयति A.

मृदुरङ्गुलिसंहृताधरोष्ठं
प्रतिषेधाक्षरविह्वलाभिरामम् ।
मुखमंसविवर्ति यच्छलाक्ष्याः
कथमप्युत्तमितं न चुम्बितं तु[1] ॥ ११० ॥

अत्र नायकस्य प्रथमाभिलाषविवशहृत्तेरनुभवस्मृतिसमुल्लिखिततत्काल-समुचिततदर्शनौन्मुख्यस्य पूर्वपरिचुम्बनस्खलितसमुद्दीपितपश्चात्ताप-वशाविर्भवद्द्योतनपरः[2] 'तु'-शब्दः कामपि वाक्यवक्रतामुज्जृम्भयति ।

एतदुत्तरत्र प्रत्ययवक्रत्वमेवंविधप्रत्ययान्तरवक्रभावाक्षमभूतत्वात् पृथक्त्वेन नोक्तमिति[3] स्वयमेवोन्नेतव्यम् । यथा[4]

येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते ।
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः[5] ॥ १११ ॥

अत्र 'अतितराम्' इत्यतीव चमत्कारकारि । एवमन्येषामपि सजातीय-लक्षणद्वारेण लक्षणनिष्पत्तिः स्वयमनुसर्तव्या । तदेवमियमनेकाकारा वक्रत्वविच्छित्तिस्त्रिविधपदविषया वाक्यैकदेशजीवितत्वेनापि[6] परि-स्फुरन्ती सकलवाक्यवैचित्र्यनिबन्धनतामुपयाति ।

वक्रतायाः प्रकाराणामेकोऽपि कविकर्मणः ।
तद्विदाह्लादकारित्वहेतुतां प्रतिपद्यते ॥ ११२ ॥

इत्यन्तरश्लोकः[7] ।

यद्येवमेकस्यापि[8] वक्रताप्रकारस्य यदेवंविधो महिमा तदेते बहवः सम्पतिताः[9] सन्तः किं सम्पादयन्तीत्याह—

परस्परस्य शोभाये बहवः पतिताः क्वचित् ।
प्रकारा जनयन्त्येतां[10] चित्रच्छायामनोहराम् ॥२४॥

(1) अभिज्ञानशाकुन्तल iii, 78 = ध्वन्यालोक p. 156. (2) ०नस्मात्तापदैन्य० B, which also reads पूर्वमपरिचुम्बन०. (3) ०ण नो० lost in A. (4) Omitted in A. (5) सेतुबन्ध 15. (6) जीवितत्वेना० lost in A. (7) Omitted in A. (8) एकस्या० lost in A. (9) सम्पादिता. A. (10) ०यन्त्ये० lost in A.

क्वचिदेकस्मिन् पदभावे वाक्ये वा वक्रताप्रकारा वक्रत्वप्रभेदा बहवः प्रभूताः कविप्रतिभामाहात्म्यसमुल्लसिताः। किमर्थम्—परस्परस्य शोभायै, अन्योन्यस्य विच्छित्तये। एतामेव चित्रच्छायामनोहरामनेकाकारकान्तिरमणीयां वक्रतां जनयन्त्युत्पादयन्ति। यथा[1]

तरन्तौव इति ॥ २१३ ॥

अत्र क्रियापदानां त्रयाणामपि प्रत्येकं त्रिप्रकारं वैचित्र्यं परिस्फुरति—क्रियावैचित्र्यं कारकवैचित्र्यं कालवैचित्र्यं च। प्रथिम-स्तन-जघन-तरुणिम्नां त्रयाणामपि वृत्तिवैचित्र्यम्। लावण्य-जलधि-प्रागल्भ्य-सरलता-परिचय-शब्दानामुपचारवैचित्र्यम्। तदेवमेते बहवो वक्रताप्रकारा एकस्मिन् पदे वाक्ये वा सम्पतिताश्चित्रच्छायामनोहरामेतामेव चेतनचमत्कारकारिणीं वाक्यवक्रतामावहन्ति।

एवं नामाख्यातोपसर्गनिपातलक्षणस्य चतुर्विधस्यापि पदस्य यथासम्भवं वक्रताप्रकारान् विचार्येदानीं प्रकरणमुपसंहृत्यान्यदवतारयति—

वाग्वल्ल्याः पदपल्लवास्पदतया या वक्रतोल्लासिनी
विच्छित्तिः सरसत्वसम्पदुचिता काप्युज्ज्वला जृम्भते[2]।
तामालोच्य[3] विदग्धषट्पदगणैर्वाक्यप्रसूनाश्रयं[4]
स्फारामोदमनोहरं मधु नवोत्कण्ठाकुलं पीयताम् ॥३[5]

वागेव वल्ली वाग्वल्ली लता तस्याः काप्यलौकिको विच्छित्तिर्जृम्भते शोभा समुल्लसति। कथम्—पदपल्लवास्पदतया। पदान्येव पल्लवानि[5] सुप्तिङन्तान्येव पत्राणि तदास्पदतया तदाश्रयत्वेन। कोदृशी

(1) omitted in A. For this quotation, see above p. 119. (2) B reads वाग्वल्याः सरसत्वसम्पदुचिता in the first and विच्छित्तिः पदपल्लवास्पदतया in the second line. (3) तामाला° A. (4) °नाथयि A and B. (5) पल्लवा A.

विच्छित्तिः—सरसत्वसम्यगुचिता, रसवत्त्वातिशयोपपन्ना[1]। किंविशिष्टा च—वक्रतया वक्रभावेनोल्लासते भ्राजते या सा तथोक्ता। कौट्यौ—उज्ज्वला, छायातिशयरमणीया। तामेवंविधामालोच्य विचार्य विदग्धषट्पदगणैर्विबुधषट्चरणचक्रैर्मधु पीयतां मकरन्द आस्वाद्यताम्। कौट्यम्—वाक्यप्रसूनाश्रयम्। वाक्यान्येव पदसमुदायरूपाणि प्रसूनानि पुष्पाण्याश्रयः स्थानं यस्य तत्तथोक्तम्। अन्यच्च कौट्यम्—स्फारामोदमनोहरम्। स्फारः स्फीतो योऽसावामोदस्तद्वद्विशेषरूपेण[2] मनोहरं हृदयहारि। कथमास्वाद्यताम्—नवोल्लेखाकुलं नूतनोल्लिकाव्ययम्। मधुकरसमूहाः खलु वसन्तात् प्रथमोल्लसितयत्किञ्चिल्लेखमालोच्य प्रतीतचेतसः समनन्तरोद्भिन्नसुकुमारकुसुममकरन्दपानमहोत्सवमनुभवन्ति[3]। तद्वदेव सहृदयाः पदात्पदां कामपि वक्रताविच्छित्तिमालोच्य नवोल्लिकाकलितचेतसो वाक्यास्वाद्यं किमपि वक्रताजीवितसर्वस्वं विचारयन्त्वीति तात्पर्यार्थः। अत्रैकत्र सरसत्वं स्वसमयसम्भवि रसाद्यत्वम्, अन्यत्र[4] शृङ्गारादिव्यञ्जकत्वम्। वक्रतैकत्र बालेन्दुसुन्दरसंस्थानयुक्तत्वम्, इतरत्रोक्त्यादिवैचित्र्यम्। विच्छित्तिरेकत्र सुविभक्तपदत्वम्, अन्यच्च कविकौशलकमनीयता[5]। उज्ज्वलत्वमेकत्र वर्णच्छायायुक्तत्वम्, अपरत्र[6] सन्निवेशसौन्दर्यसमुदयः। आमोदः पुष्पेषु सौरभम्, वाक्येषु तद्विदाह्लादकारिता[7]। मधु कुसुमेषु मकरन्दः, वाक्येषु सकलकाव्यकारणसम्यक्समुदय इति।

इति श्रीमत्[8] कुन्तकविरचिते[9]
वक्रोक्तिजीविते द्वितीय उन्मेषः॥

(1) सरसत्वातिशयी० A. (2) तद्वत् omitted in A (3) B adds वस्तु before सुकुमार. (4) ०सम्भविरस० lost in A, which reads after the lacuna ०ट्टत्वम् (probably रसाट्टत्वम्.) (5) ०कौशलक० lost in A. (6) वर्ण for पर्ण in B. (7) ०मधुमेषु मक० lost in A. (8) Omitted in B. (9) ०कुन्तकविर० A.

तृतीयोन्मेषः ।

एवं पूर्वस्मिन् प्रकरणे वाक्यावयवानां पदानां यथासम्भवं वक्रभावं विचारयन्[1] वाचकवक्रतावैचित्र्यप्रकाराणां[2] दिङ्मात्रप्रदर्शनं विहितवान्। इदानीं वाक्यवक्रतावैचित्र्यमासूचयितुं वाच्यस्य वर्णनीयतया प्रस्तावाधिकृतस्य वस्तुनो वक्रतास्वरूपं निरूपयति, पदार्थावबोधपूर्वकत्वाद्[3] वाक्यार्थावसितेः,—

उदारस्वपरिस्पन्दसुन्दरत्वेन वर्णनम् ।

वस्तुनो वक्रशब्दैकगोचरत्वेन वक्रता[4] ॥ १ ॥

वस्तुनो वर्णनीयतया प्रस्तावितस्य[5] पदार्थस्य यदेवंविधत्वेन वर्णनं सा तस्य वक्रता वक्रत्वविच्छित्तिः। किंविधत्वेनेत्याह—उदारस्वपरिस्पन्दसुन्दरत्वेन[6]। उदारः सोत्कर्षः सर्वातिशायी यः स्वपरिस्पन्दः स्वभावमहिमा तस्य सुन्दरत्वं सौकुमार्यातिशयत्वेन, अत्यन्तरमणीयस्वाभाविकधर्मयुक्तत्वेन। वर्णनं प्रतिपादनम्। कथम्—वक्रशब्दैकगोचरत्वेन। वक्रो योऽसौ नानाविधवक्रताविशिष्टः शब्दः कश्चिदेव वाचकविशेषो विवक्षितार्थसमर्पणसमर्थस्तस्यैकस्य केवलस्य[7] गोचरत्वेन प्रतिपाद्यतया विषयत्वेन[8]। वाच्यत्वेनेति नोक्तम्, व्यङ्ग्यत्वेनापि प्रतिपादनसम्भवात्। तदिदमुक्तं भवति—यदेवंविधे भावस्वभावसौकुमार्यवर्णनप्रस्तावे[9] भूयसा[10] न वाच्यालङ्काराणामुपमादीनामुपयोगयोग्यता सम्भवति, स्वभावसौकुमार्यातिशयस्यानताप्रसङ्गात्।

(1) Omitted in A (2) A reads वाच्यवाचकवक्रता० (3) ०बोधकत्वाद् B. (4) The कारिका is missing in A; but this is marked by the words उदारेत्यादि instead, at the beginning of the वृत्ति. (5) प्रस्तावितस्य A. (6) स्व dropped in A. (7) Omitted in B. (8) विशेषत्वेन A. (9) ०सौकुमार्यवर्णनप्रस्तावादि A. (10) बहुधा (?) A.

ननु च सेषा सहृदयाह्लादकारिणी स्वभावोक्तिरलङ्कारतया समाम्नाता, तस्मात् किं तद्दूषणदुर्व्यसनप्रयासेन ? यतस्तेषां सामान्यवस्तुधर्ममात्रमलङ्कार्यम्[1], सातिशयस्वभावसौन्दर्यपरिपोषणमलङ्कारः प्रतिभासते। तेन स्वभावोक्तेरलङ्कारत्वमेव[2] युक्तियुक्तमिति ये मन्यन्ते तान् प्रति[3] समाधीयते—यदेतन्नातिचतुरस्रम्। यस्माद् गतिकगतिन्यायेन काव्यकरणं न[4] यथाकथञ्चिदनुज्ञेयतामर्हति, तद्धि आह्लादकारिकाव्यलक्षणप्रस्तावात्[5]। किञ्च[6]—अनुत्कृष्टधर्मयुक्तस्य वर्णनीयस्यालङ्करणमप्यसमुचितभित्तिभागोल्लिखितालेख्यवत्[7] शोभातिशयकारितामावहति। यस्मादत्यन्तरमणीयस्वाभाविकधर्मयुक्तं वर्णनीयवस्तु परिग्रहणीयम्। तथाविधस्य तस्य यथायोगमौचित्यानुसारेण रूपकाद्यलङ्कार[8]योजनया भवितव्यम्। एतावांस्तु[9] विशेषो यत्-स्वाभाविकसौन्दर्यप्राधान्येन विवक्षितस्य न[10] भूयसा रूपकाद्यलङ्कार उपकाराय कल्प्यते, वस्तुस्वभावसौकुमार्यस्य[11] रसादिपरिपोषणस्य वा समाच्छादनप्रसङ्गात्। तथा चेतस्मिन्[12] विषये सर्वाकारमलङ्कार्यं विलासवतीव पुनरपि स्नानसमय[13]-विरचितपरिग्रह[14]-सुरतावसानादौ नात्यन्तमलङ्करणसहतां प्रतिपद्यते, स्वाभाविकसौकुमार्यस्यैव रसिकहृदयाह्लादकारित्वात्[15]। यथा

तां प्राङ्मुखीं तत्र निवेश्य तन्वीं
क्षणं व्यलम्बन्त[16] पुरो निषण्णाः।

(1) सामान्येन सुधर्ममात्रमलङ्कार्यं A. (2) ०वोक्तेरलङ्कार० B. (3) नातु-प्रीति A. (4) A repeats काव्यकरणं न. (5) ०मस्तावा A. (6) A adds a न before किञ्च. (7) ०वर्णं for ०वस्य A. (8) आदि omitted in B. (9) एतावत्ता स A. (10) Omitted in A. (11) व of वस्तु lost in A. (12) च कस्मिंश्चिद् B. (13) A is corrupt here and reads पुरिसानत. (14) ०वसपरि० lost in A. (15) रक्षित for रसिक in A. (16) Lost in A.

भूतार्थशोभाक्रियमाणनेवा:
प्रसाधने सन्निहितेऽपि नार्य:[1] ॥ १ ॥

अत्र तथाविधस्वाभाविकसौकुमार्यमनोहर: शोभातिशय: कवे: प्रतिपादयितुमभिप्रेत:[2] । अस्यालङ्करणकलापकलनं[3] सहजच्छायातिरोधानशङ्कास्पदत्वेन सम्भावितम् । यस्मात्[4] स्वाभाविकसौकुमार्यप्राधान्येन वर्ण्यमानस्योदारस्वपरिस्पन्दमहिम्न:[5] सहजच्छायातिरोधानविधायि[6] प्रतीत्यन्तरापेक्षमलङ्करणकल्पनं नोपकारितां प्रतिपद्यते। विशेषस्तु—रमणपरिशोषपेशलाया: प्रतीतिर्विभावानुभावव्यभिचार्यौचित्यव्यतिरेकेण प्रकारान्तरेण[7] प्रतिपत्ति: प्रस्तुतशोभापरिष्कारकारितामावहति। तथा च प्रथमतर[8]तरुणीतारुण्यावतारप्रभृतय: पदार्था: सुकुमारवपुर्लतादिसमयसमुन्मेषपरिशोषपरिसमाप्तिप्रभृतयश्च स्वप्रतिपादकवाक्यवक्रताव्यतिरेकेण[9] भूयसा न कस्यचिदलङ्करणान्तरस्य कविभिरलङ्करणीयतामुपनीयमाना:[10] परिदृश्यन्ते । यथा

स्मितं किञ्चिन्मुग्धं तरलमधुरो दृष्टिविभव:
परिस्पन्दो वाचामभिनवविलासोल्लिसरस:।
गतानामारम्भ: किसलयितलीलापरिमल:
स्फुरन्त्यास्तारुण्यं किमिव हि न रम्यं मृगदृश:[11] ॥ २ ॥

यथा वा

अव्युत्पन्नमनोभवा मधुरिमस्पर्शोल्लसन्मानसा[12]
भिक्षान्त:करणं दृशौ मुकुलयन्त्याघ्रातभूतोद्गमा:[13] ।

(1) कुमार० VII, 13. (2) ०वे: प्रतिपा० lost in A. (3) यस्य for अस्य in B. (4) तस्य ते B. (5) वर्ण्यमानपदार्थपरिस्पन्द० A. (6) विरोधिन for तिरोधान in A. (7) प्रकारान्तर B. (8) प्रथम B. (9) B drops स्व, and A adds पद before वाक्य. (10) B omits कविभि:. (11) Quoted in ध्वन्यालोक p. 234 (2200) (12) ०मानसौ A B drops ०रिम० (13) ०मीलयन्त्या० A and ०मुकुलय० B

रागेच्छां न[1] समापयन्ति मनसः खेदं विनैवालसा[2]
वृत्तान्तं न विदन्ति[3] यान्ति च वशं कान्ता[4] मनोजन्मनः[5] ॥३॥

यथा च

दोर्मूलावधि[6] इति ॥ ४ ॥

यथा वा

गर्भग्रन्थिषु वीरुधां सुमनसो मध्येऽङ्कुरं पल्लवा
वाञ्छामात्रपरिग्रहः[7] पिकवधूकण्ठोदरे पञ्चमः ।
किञ्च त्रीणि जगन्ति जिष्णु दिवसैर्द्वित्रैर्मनोजन्मनो
देवस्यापि चिरोज्झितं[8] यदि भवेदभ्यासवश्यं धनुः[9] ॥५॥

यथा वा

हंसानां निनदेषु[10] इति ॥ ६ ॥

यथा च

सज्जेइ सुरहिमासो ण दाव अप्पेइ जुअइअणलक्खमुहे ।
अहिणअसइआरमुहे णवपल्लवपल्लले अणंगस्स सरे[11] ॥७॥

एवंविधविषये स्वाभाविकसौकुमार्यप्राधान्येन वर्ण्यमानस्य वस्तुनस्तदा-

(1) ०च्छां न lost in A (2) विदीवलसा A. (3) वदन्ति A. (4) कन्या A. (5) मनोज मन. A. (6) दोर्मूलावधिरिति A. This verse is cited above, p. 75. (7) ०ग्रहः lost in A (8) चिरोल्लितं A. (9) विशालभञ्जिका i, 13 = कवीन्द्रवचन० no 68 = Hemacandra p. 134 (anon) = सदुक्तिकर्णा० II, 751. (10) See above p. 44. (11) The verse is corrupt in A. In B also, some of the readings are not clear. For ण दाव अप्पेइ, A reads ण अवयाभेइ, B आवयाभेइ, for जुअइअणलक्खमुहे, A reads जइसक्खसहे. In the second line, A reads अवधिय for अहिणव, and सइवासहे. The verse is quoted anonymously in ध्वन्यालोक p 106. The छाया would be

सज्जयति सुरभिमासो न तावदर्पयति युवतिजनलक्ष्यमुखान् ।
अभिनवसहकारमुखान् नवपल्लवानलक्ष्य शरान् ॥

च्छादनभयादेव[1] न भूयसा तत्कविशिरलङ्करणसुपनिबध्यते। यदि वा कदाचिदुपनिबध्यते[2] तत्तदेव स्वाभाविकं सौकुमार्यं सुतरां समुन्मीलयितुम्, न पुनरलङ्कारवैचित्र्योपपत्तये। यथा

धौताञ्जने[3] च नयने[4] स्फटिकाच्छकान्ति[5]-
र्गण्डस्थली विगतकृत्रिमरागमोष्ठम्[6]।
अङ्गानि दन्तिशिशुदन्तविनिर्मलानि
किं यत्र सुन्दरमभूत्तरुणीजनस्य ॥ ८ ॥

अत्र 'दन्तिशिशुदन्तविनिर्मलानि' इत्युपमया स्वाभाविकमेव सौन्दर्यमुन्मीलितम्। यथा वा

अकठोरकारुणवधूदन्ताङ्कुरस्पर्धिनः[7] इति ॥९॥

एतदेवातीव[8] युक्तियुक्तम्। यस्माच्चारुकवीनां प्रस्तुतौचित्यानुरोधेन कदाचित् स्वाभाविकमेव सौन्दर्यमेकराज्येन विजृम्भयितुमभिप्रेतं[9] भवति, कदाचिद् विविधरचनावैचित्र्ययुक्तमिति[10]। अत्र पूर्वस्मिन्[11] पक्षे, रूपकादिरलङ्करणकलापस्य न तादृक्[12] तत्त्वम्। अपरस्मिन् पुनः, स एव सुतरां समुज्जृम्भते। तच्चादनेन न्यायेन सर्वातिशायिनः स्वाभाविकसौन्दर्यलक्षणस्य पदार्थपरिस्पन्दस्यालङ्कार्यत्वमेव[13] युक्तियुक्ततामालम्बते[14]। न पुनरलङ्करणत्वम्। सातिशयत्वशून्यधर्मयुक्तस्य वस्तुनो विभूषितस्यापि पिशाचादेरिव[15] तद्विदाह्लादकारित्वविरहाद-

(1) ॰च्छादनतया वेदन B. (2) कथित for कदाचित् B. (3) कैताञ्जने A. (4) वचने A. (5) स्फटिकास्फुरत्कान्ति॰ B. (6) रागसौष्ठवः A. (7) स्पर्धिन॰ lost in A. The full verse is already quoted at p. 44 (हंसानां निनदेषु) above (8) अनादेयीय A. (9) ॰जृम्भयितुं lost in A, which repeats स्वाभाविकमेव सौन्दर्यमेकराज्येन after this word. (10) ॰युक्तम् for ॰युक्तम् in A. (11) पूर्वं ··स्मिन् A. (12) नाहत्वाद् for न तादृक् B. (13) अलङ्कार॰ lost in A. (14) युक्तियुक्तितां A (15) पिपासादेरिव वट A.

नुपादेयत्वमेवेत्यलमतिप्रसङ्गेन[1]। यदि वा प्रस्तुतौचित्यमाहात्म्यान्मुख्यस्य तथा[2] भावस्वभावः सातिशयत्वेन वर्ण्यमानः स्वमहिम्ना[3] भूषणान्तरासहिष्णुः स्वयमेव शोभातिशयशालित्वादलङ्कार्यो[4]ऽप्यनङ्कारमित्यभिधीयते तदयमात्माकौन[5] एव पक्षः। तदतिरिक्तवृत्तेरलङ्कारान्तरस्य[6] अलङ्कारतात्पर्येणाभिधानाच[7] वयं विवदामहे।

एवमेषैव वर्ण्यमानस्य वस्तुनो वक्रतेत्युक्त्वा कांचिदस्तौत्याह—

अपरा सहजाहार्यकविकौशलशालिनी।
निर्मितिर्नूतनोल्लेखलोकातिक्रान्तगोचरा[8] ॥ २ ॥

अपरा द्वितीया वर्ण्यमानवृत्तेः[9] पदार्थस्य निर्मितिः सृष्टिः। वक्रतेति सम्बन्धः। कीदृशी—सहजाहार्यकविकौशलशालिनी। सहजं स्वाभाविकमाहार्यं शिक्षाभ्यासससुल्लासितं च शक्तिव्युत्पत्तिपरिपाकप्रौढं यत् कविकौशलं निर्माणनैपुण्यं तेन शालते श्राजते या सा तथोक्ता। अन्यच्च कीदृशी—नूतनोल्लेखलोकातिक्रान्तगोचरा। नूतनस्तथमो योऽसावुल्लिख्यते इत्युल्लेखस्तत्कालसमुल्लिख्यमानोऽतिशयः, तेन लोकातिक्रान्तः प्रसिद्धव्यापारातीतः[10] कोऽपि सर्वातिशायी गोचरो विषयो[11] यस्याः सा तथोक्तेति विग्रहः[12]। तस्यामिर्मितिस्तेन रूपेण

(1) ०दनुपादेय० lost in A, and अधर्मप्रसङ्गेन for अलमतिप्रसङ्गेन A. (2) माहात्म्यात् A. (3) स for स्व A. (4) शोभातिशयशालित्वा० corrupt in A, some letters being lost. (5) तदयमनाद्याकौन B. (6) तदतिरिक्तवृत्ते० lost partially in A, which reads only प्रवृत्ते०. (7) ०त्वाच lost in A. B reads तिरस्कारतात्पर्येण (8) This कारिका is missing in A, but it is marked by the word [अ]परेत्यादि at the beginning of the वृत्ति. (9) वर्ण्यमानाद्यावृत्तेः A. (10) ०व्यवहारादितः A. (11) Omitted in B. (12) सपत्तेति सविग्रहः A (for इति विग्रहः).

विच्छित्तिरित्यर्थः। तदिदमत्र तात्पर्यम्—यच्च[1] वर्ण्यमानस्वरूपाः पदार्थाः कविभिरभूताः सन्तः क्रियन्ते, केवलं[2] सत्तामात्रेण परिस्फुरत' चेषां[3] तथाविधः कोऽप्यतिशयः पुनराधीयते, येन[4] कामपि सहृदय-हृदयहारिणीं रमणीयतामधिरोप्यते। तदिदमुक्तम्

लोनं वस्तुनि[5] इत्यादि ॥ १० ॥

तदेवं सत्तामात्रेणैव परिस्फुरतः पदार्थस्य कोऽप्यलौकिकः शोभाति-शयविधायी[6] विच्छित्तिविशेषोऽभिधीयते, येन नूतनच्छायामनोहारिणा वास्तवस्थितितिरोधानप्रवणेन निजाद्भासोल्लासिततत्स्वरूपेण तत्कालोल्लिखित इव वर्णनीयपदार्थपरिस्पन्दमहिमा प्रतिभासते, येन विधातव्यपदेशपात्रतां प्रतिपद्यन्ते कवयः। तदिदमुक्तम्

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै[7] रोचते विश्वं तथेदं[8] परिवर्तते[9] ॥ ११ ॥

सैषा सहजाहार्यभेदभिन्ना वर्ण्यनीयस्य वस्तुनो द्विप्रकारा वक्रता। तदेवमाहार्या येयं सा प्रस्तुतविच्छित्तिविशे[10]षालङ्कारव्यतिरेकेण नान्या काचिदुपपद्यते। तस्माद् बहुविधनव्यलंकारभेदहारिणात्यन्तवित-तव्यवहाराः[11] पदार्थाः[12] परिस्पन्दन्ते। यथा

अस्याः सर्गविधौ प्रजापतिरभूच्चन्दो नु कान्तद्युतिः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।

(1) यत्तु न A, यदि न B. (2) B has dropped all the sentences from here up to the end of the first line of the श्लो० 11 below, but supplies it wrongly later on after रसवत्तमसा on p. 141, l 4 from (3) नेषां B. (4) Omitted in A. (5) See above p. 129. (6) ०विधायी omitted in A (7) यथा अस्मै B. (8) तदिदं B. (9) अग्निपुराण ch. 338, 10=quoted in ध्वन्यालोक p. 222. (10) विषया A, which drops अपि. (11) पीत for विस्तृत in A. (12) Omitted in B.

वेदाभ्यासजडः कथं[1] नु विषयव्याहृत्तकौतूहलो
निर्मातुं प्रभवेन्नवोत्तरमिदं रूपं पुराणो मुनिः[2] ॥ १२ ॥

अत्र कान्तायाः कान्तिमत्त्वमसौभगविलाससम्पदां पदं[3] च रसवत्त्व-मसा[4]मान्यसौष्ठवं च सौकुमार्ये प्रतिपादयितुं प्रत्येकं तत्परिस्पन्द-प्राधान्यसमुचितसम्भावनानुमानमाहात्म्यात्[5] पृथक् पृथगपूर्वमेव निर्माणमुत्प्रेक्षितम्। तथा च[6] कारणचित्तयस्याप्येतस्य सर्वेषां विशेष-णानां 'स्वयम्' इति सम्बध्यमानमेतदेव सुतरां समुद्दीपयति[7]। यः किल[8] स्वयमेव कान्तद्युतिस्तस्य सौजन्यसमुचितादरोचकित्वात्[9] कान्तिमत्कार्यकरणकौशलमेवोपपन्नम्[10]। यश्च स्वयमेव शृङ्गारैक-रसस्तस्य रसिकत्वादेव रसवद्वस्तुविधानवैदग्ध्यमौचित्यं[11] भजते। यश्च स्वयमेव पुष्पाकरस्तस्याभिजात्यादेव[12] तथाविधः सुकुमार एव सर्गः समुचितः। तथा चोत्तरार्धे व्यतिरेकमुखेन[13] चयस्याप्येतस्य कान्ति-मत्त्वादेर्विशेषणैरन्यथानुपपत्तिरुपपादिता[14]। यस्माद् वेदाभ्यास-जडत्वात् कान्तिमद्वस्तुविधानानभिज्ञत्वम्, व्याहृत्तकौतुकत्वाद् रस-वत्पदार्थे[15] विहितवैमुख्यम्, पुराणत्वात् सौकुमार्यसरसभावविरच-नैरस्यं प्रजापतेः प्रतीयते। तदेवमुत्प्रेक्षालक्षणोऽयमलङ्कारः कविना

(1) Omitted in B. (2) विक्रमोर्वशीय 1, 8 = सुभाषितावली 1467 = शार्ङ्गधर-पद्धति 3268 = दशरूपकावलोक *ad* iv, 2 (anon) = सरस्वतीकण्ठा० p 175 (anon) = साहित्यदर्पण p. 516 (anon) = काव्यादर्श *ad* x, 6 (anon) etc. (3) सम्पदास्पद A. (4) After ०रसवत्त्व०, B introduces the passage dropped on p. 140, l. 2, after केवलं (5) ०समुचितं B ; ०प्राधान्ये A. A reads ०सामान्यमाहात्म्यपूर्वमेव dropping पृथक् पृथक्. (6) lost in A. (7) समुद्दीपनं A. (8) किञ्च A. (9) ०समुचितादरोचकित्वात् B ; ०न्यसमुचित lost in A, which reads सौज० for सौज० (10) काव्यकरण for कार्यकरण in A. (11) ०मौचित्यं lost in A. (12) अभिजात्या० for आभिजात्या० in A. (13) ०मुखं A. (14) ०विशे० lost in A. (15) ०त् र० lost in A.

वर्णनीयवस्तुन. काम्यलौकिकलेखविलक्षणमतिशयमाधातुं[1] निबद्धः। स च स्वभावसौन्दर्यमहिम्ना स्वयमेव तत्साधयसम्पदा[2] सह अर्थमहनीयतामोहमानः[3] सन्देहसंसर्गमङ्गीकरोतीति तेनोपहसितः। तस्मान्नीकोत्तरनिर्माणनिमित्तत्वं[4] नाम नूतनः कोऽप्यतिशयः पदार्थस्य वर्ण्यमानहृत्तेर्नायिकास्वरूपसौन्दर्यलक्षणस्यात्र निर्मितः कविना, येन तदेव तथ्यमुत्पादितमिव प्रतिभाति।

यत्राप्युत्पाद्यं वस्तु प्रबन्धार्थपूर्वतया[5] वाक्यार्थस्तत्कालमुल्लिख्यते कविभिः, तस्मिन् स्वसत्तासमन्वयेन स्वयमेव परिस्फुरतां पदार्थानां तथाविधपरस्परान्वयलक्षणसम्बन्धोपनिबन्धनं नाम नवीनमतिशयमात्रमेव[6] निर्मितिविषयतां नीयते, न पुनः स्वरूपम्। यथा

कस्त्वं भो दिवि मालिको[7] ऽहमिह किं पुष्पार्थमभ्यागतः
किं ते सूनमह[8] क्रयो यदि[9] महच्चित्रं तदाकर्ण्यताम्।
सङ्ग्रामेष्वलभा[10]भिधाननृपतौ दिव्याङ्गनाभिः सृजः
प्रोज्झन्तीभिरविद्यमानकुसुमं[11] यस्मात्कृतं नन्दनम्॥ १२॥

तदेवंविधे विषये वर्णनीयवस्तुविशिष्टातिशयविधायी विभूषणविन्यासो विधेयतां प्रतिपद्यते। तथा च—प्रकृतमिदमुदाहरणमलङ्करणकल्पनं विना सम्यङ्न[12] कथञ्चिदपि वाक्यार्थसङ्गतिं[13] भजते। यस्मात्

(1) आधारतं for आधातुं in B (2) साहाय्य for सहाय in A. (3) महार्घाहनीयतामोहमानः A. (4) लोकोत्तरं निर्मातुं A. (5) यत्राप्युत्पाद्यवस्तुप्रबन्धार्थपूर्वतया B. (6) The word नवीन is corrupt in A and reads नविनि. (7) The verse is very corrupt in A. The beginning reads रसं वोधिसी. (8) किं ते सूनमहले B, contrary to metre. A reads किं तेरसु महान् missing one metrical syllable. (9) तथीयदि A. (10) The name is lost in A. B reads ०मेदमप्रभ contrary to metre. (11) ०मुज्झन्० lost in A. (12) अपष्ट B (13) वाक्यार्थः सङ्गतिं B.

प्रत्यक्षादिप्रमाणोपपत्तिनिश्चयाभावात् स्वाभाविकं वस्तु धर्मितया व्यवस्थापनां न सहते, तत्स्वादिदम्पर्यकविप्रतिभोल्लिखितालङ्करणगोचरत्वेनैव सहृदयहृदयाह्लादमादधाति। तथा च, दुःसहस्मरसमयसमुचितशौर्यातिशयश्लाघयाप्रस्तुतमरनाथविषयि[1] यत्नभङ्गाभरभसोल्लसितसुरसुन्दरीसमूहसंघट्टमाणमन्दारादिकुसुमदामसङ्कसम्भावानुमाना[2]नन्दनोद्यानपादपप्रसूनसङ्घविध्वंसभावसिद्धिः[3] समुल्लेखिता। यस्मादुल्लेखविषयं वस्तु कवयस्तादृदेवेति तदेवेति वा द्विविधमुपनिबध्नन्तौल्लेख[त्त]क्षणावसर एव विचारयिष्यामः। तदेवमियमुत्प्रेक्षा पूर्वार्धविहिता[4] प्रस्तुतप्रशंसोपनिबन्धबन्धुराप्रकृतयार्थिवव्रतापातिशयपरिपोषप्रवणतया[5] भृशतरां समुल्लासमाना तद्विदावर्जनं जनयति। सातिशयत्वम्

उत्प्रेक्षातिशयान्विता[6] ॥ १४ ॥

इत्यस्याः, स्वलक्षणानुप्रवेश इत्यतिशयोक्तेश्च[7],

कोऽलङ्कारोऽनया विना[8] ॥ १५ ॥

इति सकलालङ्करणानुग्राहकत्वम्। तस्मात् पृथगतिशयोक्तिरेवेयं मुख्यतयेत्युच्यमानेऽपि[9] न किञ्चिदतिरिच्यते[10]। कविप्रतिभोल्लेखितत्वेन चात्यन्तमसम्भाव्यमप्युपनिबध्यमानमनयैव[11] युक्त्या समञ्जसतां[12] गाहते। न पुनः स्वातन्त्र्येण। यदा कारणतो लोकातिक्रान्तगोचरत्वेन[13] वचसः सैवेयमित्यस्तु, तथापि प्रस्तुतातिशयविधानव्यतिरेकेण न किञ्चिदपूर्वमत्रास्ति।

(1) ऽतरसाध० A (2) ०मप० for दाम, समर्थनाय for सङ्घसमाध, and ०सम्भावनात् नन्दनोद्यान० in A, ०सम्भावनानुमानानना: B. (3) ०प्रध्वंस० B. (4) पूर्वमविहिता (5) ०पवती (for ०प्रशंसो०), बन्धुरो, प्रकृतिप प्रव्ययातिशय A: बन्धुरी B. (6) आमह ii, 91. (7) आमह ii, 85. (8) ०मुप्रवेश · श्रीक्ष्य A. (9) मुख्येन मुख्यमाने A. (10) किञ्चिदिति A. (11) ०सम्भाव्यमुपपत्तिवध्यमानमनयैव A. (12) समुल्लासतां A. (13) ०क्रान्तगोच० lost in A.

तदेवमभिधानस्य पूर्वमभिधेयस्य[1] चेष्ट वक्तासमभिधावेदानीं वाक्यस्य वक्रत्वमभिधातुमुपक्रमते[2] —

मार्गस्थवक्रशब्दार्थगुणालङ्कारसम्पदः ।
अन्यूनाक्यस्य वक्रत्वं तथाभिहितिजीवितम् ॥३॥
मनोज्ञफलकोल्लेखवर्णच्छायाश्रियः पृथक् ।
चित्रस्येव मनोहारि कर्तुः किमपि कौशलम्[3] ॥४॥

अन्यूनाक्यस्य वक्रत्वम्—वाक्यस्य परस्परान्वितवृत्तेः पदसमुदायस्यान्यदपूर्वं व्यतिरिक्तमेव वक्रत्वं वक्रभावः[4] । भवतोति सम्बन्ध, क्रियान्तराभावात्[5] । कुतः—मार्गस्थवक्रशब्दार्थगुणालङ्कारसम्पदः । मार्गाः सुकुमारादयस्तत्रस्थाः केचिदेव वक्राः प्रसिद्धव्यवहारव्यतिरेकिणो ये शब्दार्थगुणालङ्कारास्तेषां सम्पत्[6] काप्युपशोभा[7] तस्याः । पृथग्भूतं किमपि वक्रत्वान्तरमेव[8] । कीदृशम्—तथाभिहितिजीवितम् । तथ तेन प्रकारेण केनाप्यव्यपदेश्येन याभिहितिः[9] काव्यपूर्वैवाभिधा[10] सैव जीवितं सर्वस्वं यस्य तत्तथोक्तम् । किंस्वरूपमित्याह—कर्तुः किमपि कौशलम् । कर्तुर्निर्मातुः[11] किमप्यलौकिकं यत्कौशलं नैपुणं तदेव वाक्यस्य वक्रत्वमित्यर्थः[12] । कथञ्चिद्—चित्रस्येव[13], आलेख्यस्य यथा । मनोहारि हृदयरञ्जकं[14] प्रक्रमोपकरणव्यतिरेकि कर्तुरेव कौशलं किमपि पृथग्भूतं व्यतिरिक्तम् । कुत इत्याह—मनोज्ञफलको-

(1) पूर्वाभिधेयस्य A. (2) A is exceedingly corrupt here and reads वक्रतासमिधा ··भिधायास्तासमिधातुमुपक्रमते. (3) These two कारिकाs are missing in A, but marked by मार्गस्थेत्यादि instead at the beginning of the वृत्ति. (4) ०त्व प० lost in A. (5) धीमात् for भावात् in A. (6) संपत्त B. (7) काव्य च शोभमूत किमपि A (8) तत्त्वान्तरमेव B. (9) ०भिहिते A (10) काव्यपूर्वो भिधास्येव A. (11) विधातुः for निर्मातुः B. (12) तत्त्वमित्यर्थः B. (13) तस्येव A. (14) हृदयाह्लादकः A.

लेखवर्णच्छायाश्रियः। मनोज्ञाः कांश्चिदेव हृदयहारिणो याः फलकोल्लेखवर्णच्छायास्तासां श्रीरपशोभा सम्पद्यते। पृथक्पृथं किमपि तत्त्वान्तरमेवेत्यर्थः। फलकमालेख्याधारभूता भित्तिः, उल्लेखखचितसूत्रप्रमाणोपपन्नं रेखाविन्यसनमात्रम्, वर्णा रञ्जकद्रव्यविशेषाः, छाया कान्तिः। तदिदमत्र तात्पर्यम्—यथा चित्रस्य किमपि[1] फलकाद्युपकरणकलापव्यतिरेकि सकलप्रकृतपदार्थजीवितायमानं चित्रकरकौशलं पृथक्त्वेन[2] मुख्यतयोल्लसति[3], तथैव वाक्यस्य मार्गादिप्रकृतपदार्थसार्थव्यतिरेकि कविकौशललक्षणं किमपि सहृदयसंवेद्यं सकलप्रस्तुतपदार्थस्फुरितभूतं वक्रत्वमुल्लसति[4]।

तथा च, भावस्वभावमौकुमार्यवर्णने शृङ्गारादिरसरूपसमुज्ज्वलेन वा विविधविभूषणविन्यास[5]विच्छित्तिविरचने च परः परिपोषातिशयस्तद्विदाह्लादकारितायाः कारणम्। पदवाक्यैकदेशवृत्तिर्वा[6] यः कविप्रक्रमप्रकारस्तस्य कविकौशलमेव निबन्धनतया व्यवतिष्ठते। यस्मादाकल्पमेवैषां तावन्मात्रस्वरूपनियतनिष्ठतया व्यवस्थितानां स्वभावोल्लेखणवक्रताप्रकाराणां नवनवोल्लेखविलक्षणं चेतनचमत्कारकारि किमपि स्वरूपान्तरमेतस्मादेव समुज्जृम्भते। तेनेदमभिधीयते[7]—

आसंसारं कइपुंगवेहि पडिदिअहगहिअसारो[8] वि।
अज्जवि अभिनवमुहो व्व जअइ वाआ परिप्फंदो[9] ॥ १६ ॥

(1) Repeated in A. (2) पृथक् केन A. (3) मुख्यतया भासते A. (4) °मुल्लसते A. (5) The whole passage from here to the beginning of the word विलासमुद्रा of the verse तेषां गोपथ° next is lost in A. (6) इति वा B. (7) येन for तेन in B. (8) तद्दिवस° B, our conjectural emendation is from the इति below, where प्रतिदिवस is used twice, as well as from राजशेखर's sankritisation of this verse. (9) This verse occurs in Sanskrit in राजशेखर's काव्यमीमांसा (p. 54), as follows:

अत्र सर्गारम्भात् प्रभृति कविप्रधानैः प्रातिस्विकप्रतिभापरिस्पन्द-माहात्म्यात् प्रतिदिवसगृहीतसर्वस्वोऽप्यद्यापि[1] नवनवप्रतिभासानन्त्य-विजृम्भणादनुद्घाटितप्राय इव यो वाक्यपरिस्पन्दः स जयति सर्वोत्कर्षेण वर्तते इत्येवमस्मिन् सुसङ्गतेऽपि वाक्यार्थे कविकौशलस्य विलसितं किमप्यलौकिकमेव परिस्फुरति। यस्मात् स्वाभिमानध्वनिप्राधान्येन तेनैतदभिहितम् यथा—आसंसारं कविपुङ्गवैः प्रतिदिवसगृहीतसारोऽप्यद्याप्यभिनवमुद्रः[2] इवायम्; एवमपरिज्ञाततत्त्वतया न केनचित् किमप्येतस्याद् गृहीतमिति मत्यतिभोद्घाटितपरमार्थस्येदानीमेव मुद्रा-बन्धोद्भेदो भविष्यतीति लोकोत्तरस्यपरिस्पन्दसाफल्यापत्तेर्वाक्यपरिस्पन्दो जयतीति सम्बन्धः।

यद्यपि रसस्वभावालङ्काराणां सर्वेषां कविकौशलमेव जीवितम्, तथाप्यलङ्कारस्य विशेषतस्तदनुग्रहं विना वर्ण्यनाविषयवस्तुनो भूषणा-भिधायित्वेनाभिमतस्य स्वरूपमात्रेण परिस्फुरतो यथार्थत्वेन निबध्य-मानस्य तद्विदाह्लादविधानानुपपत्तेर्मनाङ्मात्रमपि न वैचित्र्यमु-त्प्रेक्षामहे, प्रचुरप्रवाहपतितेतरपदार्थसामान्येन प्रतिभासनात्। यथा

दूर्वाकाण्डमिव श्यामा तन्वी श्यामालता यथा[3] ॥ १७ ॥

इत्यत्र[4] नूतनोल्लेखमनोहारिणः पुनरेतस्य लोकोत्तरविन्यसनविच्छित्ति-विशेषितशोभातिशयस्य किमपि तद्विदाह्लादकारित्वमुल्लिख्यते। यथा

अस्याः सर्गविधौ[5] इति ॥ १८ ॥

यथा

किं तारुण्यतरोः[6] इति ॥ १९ ॥

आसंसारकुदारैः कविभिः प्रतिदिनगृहीतसारोऽपि।
यथाभिनवमुद्रो विभाति काव्यं परिस्पन्दः ॥

(1) °सर्वस्वोऽपीदं B. (2) सारोऽयमभिनवमुद्रा B. (3) तथा B. (4) °मिति च B. (5) See above p. 140. (6) See above p. 60.

तदेवं पृथग्भावेनापि भवतोऽस्य कविकौशलायत्तवृत्तिलक्षणवाक्यवक्रतात्मभाव एव युक्तिमुक्ततामवगाहते। तदिदमुक्तम्

वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति[1] ॥ २० ॥

स्वभावोदाहरणं यथा

तेषां गोपवधूविलाससुहृदां[2] राधारहःसाक्षिणां
चेमं भद्र कलिन्दशैलतनयातीरे[3] लतावेश्मनाम्।
विच्छित्तेः स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना[4]
ते[5] जाने जरठीभवन्ति विगलच्छैवालबिम्बाः पल्लवाः[6] ॥ २१ ॥

अत्र यद्यपि स्वहृदयसंवेद्यं वस्तुसर्वस्वं स्वभावमात्रमेव वर्णितम्, तथाप्यमुत्तानतया व्यवस्थितस्यास्य विरलविदग्धहृदयैकगोचरं किमपि नूतनोल्लेखमनोहारि पदार्थान्तरलीनवृत्ति[7] सूक्ष्मसुभगं तादृक् स्वरूपसुधोल्लिखितं येन वाक्यवक्रतात्मनः कविकौशलस्य काचिदेव काष्ठाधिरूढिरुपपद्यते[8]। यस्मात्तदतिरिक्तवृत्तिरर्थोऽतिशयो न कश्चिल्लभ्यते।

रसोदाहरणं यथा

लोको याद्दशमाह साहसधनं तं[9] क्षत्रियापुत्रकं
स्यात्सत्येन[10] स ताद्दगेव[11] न भवेदार्त्तो विसंवादिनी[12]।
एकां कामपि कालविप्लवममी शौर्योष्मकण्डूव्यथा[13]
व्यथाः स्थविरविस्तृतामरचमूडिम्बाहवा बाहवः ॥ २२ ॥

(1) This is कारिका 1, 20. (2) तेषां गोपवधू० lost in A (3) कलिन्द lost in A. (4) सुर for स्मर A. (5) Lost in A. B reads तेजा only. (6) Quoted in ध्वन्यालोक p. 87 (anon) (7) पदार्थांतरलीनवृत्ति B. (8) रूढीपलभ्यते A. (9) सं A. (10) स्यात्सत्येन B. (11) ०दृगेव० lost in A. (12) वार्त्तापि संवादिनी A. (13) कन्द for कण्डू A. The last two lines of this verse have been already quoted above p. 33.

वक्रोक्त्याह्वाभिधानः स्थायिभावः[1] समुचितालम्बनविभावलक्षणविषय[2]-सौन्दर्यातिशयश्लाघाव्याकुलतया विजिगीषोर्वैदग्ध्यभङ्गीभणितिवैचित्र्येण परां परिपोषपदवीमधिरोपितः सन् रसतामानीयमानः[3] किमपि[4] वाक्यवक्रभावस्वभावं कविकौशलमावेदयति। अन्येषां पूर्वप्रकरणोदाहरणानां प्रत्येकं तथाभिधितिजीवितलक्षणं वक्रत्वं स्वयमेव[5] सहृदयैर्विचारणीयम्।

वक्रतायाः प्रकाराणामौचित्यसुखशालिनाम्[6]।
एतदुन्मेजनायालं[7] सस्यन्दमहतामपि ॥ २३ ॥
रसस्वभावालङ्कारा आसंसारमपि स्थिताः[8];
अनेन नवतां[9] यान्ति तद्विदाह्लाददायिनीम्[10] ॥ २४ ॥

इत्यन्तरश्लोकौ[11]।

एवमभिधानाभिधेयाभिधालक्षणस्य काव्यस्य[12] योगिनश्चितयश्च स्वरूपमुक्त्वा वर्णनीयस्य[13] वस्तुनो विषयविभागं विदधाति—

भावानामपरिस्पन्दसुभगौचित्यसुन्दरम्।
चेतनानां जडानां च स्वरूपं द्विविधं स्मृतम्[14] ॥५॥

भावानां वर्ण्यमानवस्तूनां स्वरूपं परिस्पन्दः। कौदृशम्—द्विविधम्। द्वे विधे प्रकारौ यस्य तत्तथोक्तम्। स्मृतं[15] सूरिभिराम्नातम्[16]। केषां

(1) भाव lost in A; so also the next letter व. (2) ०लक्षण for लम्बन A (3) सम्बलतां B; स व रसता A. (4) ०मानीयमानः कि० lost in A. (5) ०वक्रत्वं स्वय० lost in A. (6) ०यानिनी A. (7) ते···दुन्मेजनायाल A. (8) ०ताः lost in A. (9) वक्रतां A (10) ०ह्लादकारिणीं A. (11) अन्तरश्लोकौ A. (12) The word is corrupt in A—काद्यो. (13) वर्णनी० lost in A. (14) This कारिका is missing in A, but marked by भावानामित्यादि instead at the outset of the वृत्ति. (15) Omitted in B. (16) सूरिभिराम्नां A.

भावानाम्—चेतनानां जडानां च। चेतनानां संविदां[1] प्राणिनामिति यावत्; जडानां तद्व्यतिरेकिणां चैतन्यशून्यानाम्। एतदेव च धर्मिद्वैविध्यं धर्मद्वैविध्यस्य[2] निबन्धनम्। कौदृक्स्वरूपम्—अपरिम्लान-स्वभावौचित्यसुन्दरम्[3]। अपरिम्लानः प्रत्यग्रः परिशोषपेशलो यः स्वभावः पारमार्थिको धर्मस्तस्य यदौचित्यमुचितभावः प्रस्तावोपयोग्यदोषदुष्टत्वं तेन सुन्दरं सुकुमारं[4] तद्विदाह्लादकमित्यर्थः।

एतदेव द्वैविध्यं विभज्य[5] विचारयति—

तत्र पूर्वं प्रकाराभ्यां द्वाभ्यामेव विभिद्यते।
सुरादिसिंहप्रभृतिप्राधान्येतरयोगतः[6] ॥ ६ ॥

तत्र द्वयोः स्वरूपयोर्मध्यात् पूर्वं यत्प्रथमं चेतनपदार्थसंज्ञम्[7] तद् द्वाभ्यामेव राशन्तराभावात् प्रकाराभ्यां विभिद्यते भेदमासादयति, द्विविधमेव सम्पद्यते। कस्मात्—सुरादिसिंहप्रभृतिप्राधान्येतर-योगतः[8]। सुरादिः त्रिदशप्रभृतयो ये चेतनाः सुरासुरसिद्धविद्याधर-गन्धर्वप्रभृतयः, ये चान्ये सिंहप्रभृतयः केसरिप्रमुखास्तेषां यत्प्राधान्यं मुख्यत्वमितरदप्राधान्यं[9] च ताभ्यां यथासंख्येन प्रत्येकं यो योगः सम्बन्धस्तस्मात् कारणात्।

तदेवं सुरादीनां मुख्यचेतनानां स्वरूपमेकं ऋषीणां वर्णनास्पदम्। सिंहादीनाममुख्यचेतनानां पशुस्वगपक्षिमरीसृपाणां स्वरूपं द्वितीय-मित्येतदेव विशेषेणोन्मीलयति—

(1) संविदानां B (2) This passage is exceedingly corrupt in A. (3) Omitted in B. (4) Omitted in B; but A repeats this word. (5) द्वैविध्यविभक्त A. (6) This कारिका is missing in A, but marked by तदेवादि instead. (7) A adds चचेतनपदार्थसंज्ञम् after this. (8) Omitted in B. (9) अतरत्प्राधान्य A.

मुख्यमक्लिष्टरत्यादिपरिपोषमनोहरम् ।
स्वजात्युचितहेवाकसमुल्लेखोज्ज्वलं परम्[1] ॥७॥

मुख्यं यत्प्राधान्यं चेतनसुरासुरादिसम्बन्धिस्वरूपं[2] तदेवंविधं सत्कवीनां वर्णनास्पदं भवति स्वव्यापारगोचरतां प्रतिपद्यते। कीदृशम्—अक्लिष्टरत्यादिपरिपोषमनोहरम्। अक्लिष्टः कदर्थनाविरहितः प्रत्यग्रतामनोहरो[3] यो रत्यादिः स्थायिभावस्तस्य परिपोषः शृङ्गारप्रभृतिरसत्वापादनम्—स्थाय्येव तु रसो भवेदिति न्यायात्—तेन मनोहरं हृदयहारि। अत्रोदाहरणानि विप्रलम्भशृङ्गारे चतुर्थेऽङ्के विक्रमोर्वश्यामुन्मत्तस्य पुरूरवसः प्रलपितानि। यथा

तिष्ठेत्कोपवशात्प्रभावयिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः।
तां हृत्वा विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः[4] ॥ २५ ॥

अत्र राज्ञो वल्लभाविरहवैधुर्यदशावेशविवशहृत्ते[5] स्तादृसंप्राप्तिनिमित्तमनधिगच्छतः[6] प्रथमतरमेव स्वाभाविकसौकुमार्यसंभाव्यमानम्[7] अनन्तरोचितविचारापसार्यमाणोपपत्ति[8] किमपि तात्कालिकविकल्पोल्लिख्यमानमनवलोकनकारणमुत्प्रेक्ष्यमाणस्य तदास्वादन[9]समन्वयासंभवाद्वैराग्यनिश्चयविमूढमानसतया रस परां परिपोषपदवीमधिरोपितः। तथा चैतदेव वाक्यान्तरेणोपपादितं यथा

(1) This कारिका is missing in A, but marked by मुख्यमित्यादि instead. (2) •सुरासुरादिसम्बन्धिस्वरूपं B. (3) प्रत्ययो नाम A. (4) विक्रमोर्वश्यां IV, 2. (5) A is corrupt after •दशा (6) •मदधिगच्छतः A. (7) •मार्द्रसम्भाव्य• lost in A. (8) •विचारापसार्यमाणो• B; •पपत्तिः A. (9) A is corrupt here and some letters appear to have been lost before नैराश्य.

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री
मेघाभिवृष्टसिकतासु वनस्थलीषु ।
पश्चात्रता गुरुनितम्बतया ततोऽस्या
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का[1] ॥ २६ ॥

अत्र पद्भ्यां वसुमतीं[2] कदाचित् स्पृशेदित्याशंसया तत्प्राप्तिः सम्भाव्येत । यस्माज्जलधरसलिलसेकसुकुमारसिकतासु वनस्थलीषु गुरुनितम्बतया तस्याः पश्चात्तत्वेन नितरां मुद्रितसंस्थाना रागोपरक्ततया[3] रमणीय-हस्तिश्वरणविन्यासपरम्परा दृश्येत, तस्मात्तैराश्यनिश्चितिरेव[4] सुतरां समुज्जृम्भिता, या तदुत्तरवाक्योन्मत्तविलपितानां निमित्ततामभजत्[5] ।

करुणरसोदाहरणानि तापसवत्सराजे द्वितीयेऽङ्के वत्सराजस्य परिदेवितानि । यथा

धारावेश्म विलोक्य दीनवदनो भान्त्वा च लीलागृहा[6]-
न्विश्रम्यायतमाशु केसरलतावीथीषु कृत्वा दृशः[7] ।
किं मे पार्श्वमुपैषि पुत्रक कृतैः किं चाटुभिः क्रूरया
मात्वा त्वं परिवर्जितः सख मया यास्यात्तिदीर्घां भुवम्[8] ॥ २७ ॥

अत्र रसपरिपोषनिबन्धनं विभावादिसम्यक्समुदयः कविना सुतरां समुज्जृम्भितः । तथा चास्यैव वाक्यस्यावतारकं विदूषकवाक्यमेवं प्रयुक्तम्—

पमादो[9] एसो क्खु देवीए[10] पुत्तकिदको[11] हरिणपोदो अत्तभवंतं[12] अणुसरदि[13] ॥ २८ ॥

(1) चित्रलेखीय iv, 6. (2) A adds यदि before कदाचित्. (3) चामी० for रागी० in A. (4) नैराश्य for नैराश्य in A. (5) A is corrupt here. (6) लीलया गृहान् B. (7) दिशः A. (8) तापसवत्सराज ii, 71 a (Berlin Ms). (9) अही A. (10) दावेव A. (11) किदसु A. (12) पुवलभवदं (!) A. (13) तापसवत्सराज०, loc. cit.

एतेन करुणरसोद्दीपनविभावता हरिणपोतकधारागृहप्रभृतीनां सुतरां समुत्पद्यते[1] । तथा चायमपरः क्षते क्षारावसेप[2] इति क्रमखण्डचनादनन्तरमेतत्परत्वेनैव[3] वाक्यान्तरमुपनिबद्धम्, यथा

कर्णान्तस्थितपद्मरागकलिकां भूयः समाकर्षता[4]
चञ्चा दाडिमबीजमित्यभिहता[5] पादेन गण्डस्थली ।
येनासौ तव तस्य नर्मसुहृदः[6] खेदान्मुहुः क्रन्दतो
निःशङ्कं[7] न शुकस्य किं प्रतिवचो देवि त्वया दीयते[8] ॥ २६ ॥

अत्र शुकस्यैवंविधदुर्ललितयुक्तत्वं वाल्लभ्य[9]प्रतिपादनपरत्वेनोपात्तम् । 'असौ' इति कपोलस्थस्याः स्वानुभवस्वदमानसौकुमार्योत्कर्षपरामर्शः । एवमेवोद्दीपनविभावैकजीवितत्वेन करुणरसः काष्ठाधिरूढिरमणीयता मनीयत ।

एवं विप्रलम्भशृङ्गारकरुणयोः सौकुमार्योदाहरणप्रदर्शनं विहितम् । रसान्तराणामपि स्वयमेवोत्प्रेक्षणीयम् ।

एवं द्वितीयमप्रधानचेतनसंहारादिसम्बन्धि[10] यत्स्वरूपं तदित्थं कवीनां[11] वर्णनास्पदं सम्पद्यते । कीदृशम्—स्वजात्युचितहेवाक-समुल्लेखोज्ज्वलम् । स्वा प्रत्येकमात्मीया सामान्यलक्षणवस्तुस्वरूपा[12] या जातिस्तस्याः समुचितो यो हेवाकः[13] स्वभावानुसारी परिस्पन्दस्तस्य समुल्लेखः सम्यगुल्लेखनं[14] वास्तवेन रूपेणोपनिबन्धस्तेनोज्ज्वलं भ्राजिष्णु[15], तद्विदाह्लादकारीति यावत् । यथा

(1) सङ्गीयते A. (2) ०वसेक A. (3) अनन्तरम् for अनन्तरम् in B. (4) समाकर्षंता B; समाकर्षतान् A. (5) ०भिहिता A. (6) नर्मसुहृदः B. (7) निःशङ्के A; निःशङ्के B (8) तापसवत्सराज ii, 72 b (Berlin Ms.) (9) सलभ्य A. (10) सम्बन्धि B; सम्बंधी A. (11) Omitted in B. (12) ०स्वरू० lost in A. (13) ०स्तैकवाक्यः A. (14) सम्यगुल्लिखनं B. (15) उज्ज्वल भा० lost in A.

कदाचिदेतेन च पारियात्र[1]-
गुहाग्रहे मीलितलोचनेन ।
व्यत्यस्त हस्तद्वितयोपविष्ट[2]-
दंष्ट्राङ्कुराक्रान्तचिबुकं प्रसुप्तम्[3] ॥ २० ॥

अत्र गिरिगुहागोहान्तरे[4] निद्रामनुभवतः केसरिणः स्वजातिसमुचितं स्थानकमुल्लिखितम् । यथा वा

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
शष्पैरर्धावलीढैः श्रमविततमुखभ्रंसिभिः[5] कीर्णवर्त्मा
पश्योदग्रे[6] प्लुतत्वादियति बहुतरं स्तोकमुर्व्यां प्रयाति[7] ॥ २१ ॥

एतदेव[8] प्रकारान्तरेणोन्मीलयति—

रसोद्दीपनसामर्थ्यविनिबन्धनबन्धुरम् ।
चेतनानाममुख्यानां जडानां चापि भूयसा[9] ॥७॥

चेतनानां प्राणिनाममुख्यानामप्रधानभूतानां यत्स्वरूपं तदेवंविधं तदर्थनीयतां प्रतियदति प्रसुप्ताङ्गतयोपयुज्यमानम्[10] । कीदृशम्—रसोद्दीपनसामर्थ्यविनिबन्धनबन्धुरम् । रसाः शृङ्गारादयस्तेषामुद्दीपनमुल्लासनं परिपोषस्तस्मिन् सामर्थ्यं शक्तिस्तया विनिबन्धनं निवेशस्तेन बन्धुरं हृदयहारि । यथा

चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं[11] चुचूज ।

(1) पारि repeated in A. (2) ०व्यस्तद्विकद्वयोपविष्टं A. (3) ०प्तम् lost in A. (4) गिरि lost in A. (5) विलत for विलत in B. (6) ०ग्र्य A. (7) श्रमिश्रमजलुप्तत्व 1. 7. (8) तदेव A. (9) This कारिका is missing in A, but marked by रसोद्दीपनेत्यादि instead. (10) A is corrupt and reads: प्रसुप्ताङ्गयोगयुज्यमानं. (11) ०कोकिलोऽयं मधुरं A.

मनस्विनोमानविघातदक्षं
तदेव जातं वचनं स्मरस्य[1] ॥ ३२ ॥

जडानां चापि भूयसा। जडानामचेतनानां सलिलतरङ्गकुसुमसमट प्रभृतीनामेवंविधं स्वरूपं रसोद्दीपनसामर्थ्यविनिबन्धनबन्धुरं वर्णनीय तामवगाहते। यथा

इदमसुलभवस्तुप्रार्थनादुर्निवारं
प्रथममपि मनो मे पङ्कजाक्षः[2] क्षिणोति।
किमुत मलयवातोन्मूलितापाण्डुपत्रै-
रुपवनसङ्कल्पैर्दीपितेष्वङ्कुरेषु[3] ॥ ३३ ॥

यथा वा

उद्भेदाभिमुखाङ्कुराः कुरवकाः शैवालजालाकुल-
प्रान्तं भान्ति सरांसि फेनपटलैः सीमन्तिताः[4] सिन्धवः।
किञ्चास्मिन् समये लताश्च विलसत्कन्दर्पकोदण्डिका-
क्रीडाभाञ्जि भवन्ति सन्ततलताकोर्णान्यरण्यान्यपि ॥ ३४ ॥

एवं स्वाभाविकसुन्दरपरिस्पन्दनिबन्धनं पदार्थस्वरूपमभिधाय तदेवोपसंहरति—

शरीरमिदमर्थस्य रामणीयकनिर्भरम्।
उपादेयतया ज्ञेयं कवीनां वर्णनास्पदम्[5] ॥८॥

अर्थस्य वर्णनीयस्य वस्तुनः शरीरमिदम् उपादेयतया ज्ञेयं[6] ग्राह्यत्वेन बोद्धव्यम्। कीदृशं सत्—रामणीकनिर्भरम्। सौन्दर्यपरिपूर्णम्, औपहत्यरहितत्वेन तद्विदाह्लादकमिति यावत्। कवीनामेत-

(1) कुमार० iii, 32. (2) पार्श्वनाथः B. (3) विक्रमोर्वशी iv, 6 = सरस्वतीकण्ठा० p. 304. (4) फेनपटलीकलिताः A. प्रान्ता भान्ति B; आता भान्ति A. (5) This कारिका is missing in A, but marked by शरीरमित्यादि instead. (6) B here repeats ग्राह्यतया ज्ञेयं.

देव यस्मादर्थनास्यदमभिधाव्यापारगोचरम्। एवंविधस्यास्य स्वरूपशोभातिशयस्याजिघृक्षोर्विभूषणान्यूपशोभान्तरमारभते[1]।

एतदेव प्रकारान्तरेण विचारयति—

धर्मादिसाधनोपायपरिस्पन्दनिबन्धनम्।
व्यवहारोचितं चान्यल्लभते वर्णनीयताम्[2] ॥६॥

व्यवहारोचितं चान्यत्। अपरं पदार्थानां चेतनाचेतनानां स्वरूपमेवंविधं वर्णनीयतां[3] लभते कविव्यापारविषयतां[4] प्रतिपद्यते। कौदृशम्—व्यवहारोचितम्, लोकवृत्तयोग्यम्। कौदृशं सत्—धर्मादिसाधनोपायपरिस्पन्दनिबन्धनम्। धर्मादिचतुर्वर्गस्य साधने यस्यादृशे उपायभूतो यः परिस्पन्दः स्वविलसितं तदेव निबन्धनं यस्य तत्तथोक्तम्। तदिदमुक्तं भवति—यत् काव्ये वर्ण्यमानवृत्तयः प्रधानचेतनप्रभृतयः सर्वे पदार्थाश्चतुर्वर्गसाधनोपायपरिस्पन्दप्राधान्येन वर्णनीयाः, यैऽप्यप्रधानचेतनस्वरूपाः पदार्थास्तेऽपि[5] धर्मार्थोपायभूतस्वविलासप्राधान्येन कवीनां वर्णनीयतामवतरन्ति। तथा च राज्ञां शूद्रकप्रभृतीनां मन्त्रिणां च शुकनासमुख्यानां चतुर्वर्गानुष्ठानोपदेशपरत्वेनैव चरितानि[6] वर्ण्यन्ते[7]। अप्रधानचेतनानां हस्तिहरिणप्रभृतीनां संग्रामसङ्गमाद्यङ्गतया परिस्पन्दसुन्दरं स्वरूपं लक्ष्ये वर्ण्यमानतया परिदृश्यते। तस्मादेव च तथाविधस्वरूपोल्लेखप्राधान्येन[8]

(1) विभूषणं प्रस्तुतशोभा॰ and आरभते A. (2) This कारिका is missing in A, but marked by धर्मादीत्यादि instead. (3) स्ववर्णनीयतां A. (4) अथापि विषयतां A. (5) A. omits all words from चतुर्वर्गसाधनो॰ to ॰चेतनस्वरूपाः पदार्थाः. (6) चरिता A. (7) In कादम्बरी. (8) हस्तिहरि॰ lost in A. (9) ॰त्वेन lost in A.

काव्यकाव्योपकरणकवीनां[1] चित्रचित्रोपकरणचित्रकरैः साम्यं प्रथम मेव प्रतिपादितम्। तदेवंविधं स्वभावप्राधान्येन रसप्राधान्येन द्विप्रकारं[2] सहज सौकुमार्यसरसं स्वरूपं[3] वर्णनाविषयवस्तुनः शरीरमेवालङ्कार्यः तामेवार्हति।

तत्र स्वाभाविकं पदार्थस्वरूपमलङ्करणं यथा न भवति[4] तद् प्रथममेव[5] प्रतिपादितम्। इदानीं रसात्मनः प्रधानचेतनपरिस्पन्द-वर्ण्यमानवृत्तेरलङ्कारकारान्तरा[6]भिमतामलङ्कारतां निराकरोति—

अलङ्कारो न रसवत् परस्याप्रतिभासनात्।
स्वरूपादतिरिक्तस्य शब्दार्थासङ्गतेरपि[7] ॥१०॥

अलङ्कारो न रसवत्। रसवदिति[8] योऽयमुत्प्रादितप्रतीतिर्नामालङ्कारस्तस्य विभूषणत्वं[9] नोपपद्यते इत्यर्थः। कस्मात् कारणात्—स्वरूपादतिरिक्तस्य परस्याप्रतिभासनात्। वर्ण्यमानस्य वस्तुनो यत् स्वरूपमात्मीयः परिस्पन्द[10] स्तस्मादतिरिक्तस्यात्यधिकस्य[11] परस्याप्रतिभासनाद्[12] अनवबोधनात्। तदिदमत्र तात्पर्यम्—यत् सर्वेषामेवालङ्कृतीनां सत्कविवाक्यानामिदमलङ्कार्यमिदमलङ्करणम् इत्यपोद्धारविधिरो विविक्तभावः सर्वस्य कस्यचित् प्रमातृ[13]चेतसि परि-

(1) काव्योप० lost in A (2. विप्रक…A. (3) Lost in A. (4) सौकुमार्यं रसस्वरूपं A. (5) यथा न भवति lost in A. (6) प्रथमे A. (7) अलङ्कारान्तर० instead of अलङ्कारकारान्तर in A. On the figure *rasavat*, see my *Sanskrit Poetics* pp. 244-5. (8) This कारिका is missing in A, but marked by अलङ्कार इत्यादि instead. (9) B omits all words from here up to ०प्रतिभासनात् next (both inclusive). (10) विभूषणस्य A. (11) काव्योप परिस्पन्दे A. (12) अभ्यधिकस्य for अत्यधिकस्य in A. (13) प्रतिभासनात् repeated in A. (14) प्रमातृ० A.

स्फुरति। रसवदलङ्कारवदिति[1] वाक्ये पुनरवहितचेतसोऽपि[2] न किञ्चिदेतदेव[3] बुध्यामहे।

तथा च—यदि शृङ्गारादिरेव प्राधान्येन वर्ण्यमानोऽलङ्कार्यस्तदन्येन केनचिदलङ्करणेन भवितव्यम्। यदि वा तत्स्वरूपमेव तद्विदाह्लादनिबन्धनत्वादलङ्करणमित्युच्यते तथापि तद्व्यतिरिक्तमन्यदलङ्कार्यं तथा प्रकाशनीयम्। तदेवंविधो न कश्चिदपि विवेकचिरन्तनालङ्कारकाराभिमते[4] रसवदलङ्कारलक्षणोदाहरणमार्गे मनागपि विभाव्यते। यथा च

रसवद्दर्शितस्पष्टशृङ्गारादि[5] ॥ २५ ॥

[वृत्ति] रसवल्लक्षणम्[6]। अत्र दर्शिताः स्पष्टाः स्पष्टं वा शृङ्गारादयो यत्रेति व्याख्याने काव्य[7]व्यतिरिक्तो न कश्चिदन्यः[8] समासार्थभूतः संलक्ष्यते। योऽसावलङ्कारः काव्यमेवेति चेत्, तदपि न सुस्पष्टसौष्ठवम्। यस्मात् काव्यैकदेशयोः शब्दार्थयोः पृथक् पृथगलङ्काराः सम्प्रतीत्युपक्रम्येदानीं काव्यमेवालङ्करणमित्युपक्रमोपसंहारवैषम्यदुष्टत्वमायाति। यदि वा दर्शिताः स्पष्टं शृङ्गारादयो यैरिति समासः, तथापि[9] वक्तव्यमेव—कोऽसाविति? प्रतिपादनवैचित्र्यमेवेति चेत्, तदपि[10] न सम्यक् समर्थनार्हम्। यस्मात् प्रतिपाद्यमानादन्यदेव तदुपशोभानिबन्धनं प्रतिपादनवैचित्र्यम्, न पुनः प्रतिपाद्यमेव[11]। स्पष्टतया दर्शितं रसानां प्रतिपादनवैचित्र्यं यद्यभिधीयते, तदपि न[12] सुप्रतिपादनम्। स्पष्टतया दर्शने शृङ्गारादीनां स्वरूपपरिनिष्पत्तिरेव

(1) तदलङ्कारवदिति A. (2) आहित for अवहित in A. (3) किञ्चिदेव तदेव A. (4) ऽभिमतो B. (5) भासश्च m, 6. (6) रसवद्दर्शितलक्षणं A. (7) काव्यस्य B. (8) अन्यत् B. (9) तथापि B. (10) A omits all words from here to न पुनः. (11) प्रतिपादनमेव A. (12) Lost in A.

पर्यवस्यति। किञ्च, रसवतः काव्यस्यालङ्कार इति तथाविधस्य सतस्तस्यासाविति न किञ्चिदनेन तस्याभिधेयं[1] स्यात्। अथवा तेनैवालङ्कारेण रसवत्त्वं तस्याधीयते, तदेवं तर्ह्यसौ न रसवतोऽलङ्कारः[2] प्रत्युत रसवानलङ्कार[3] इत्यायाति, तस्माद्दाल्भ्यात् काव्यमपि रसवत् सम्पद्यते। यदि वा तेनैवाहितरससम्बन्धस्य रसवतः[4] काव्यस्यालङ्कार इति तत्परादृसवदलङ्कारव्यपदेशमासादयति—यथाग्निष्टोमयाज्यस्य पुत्रो भवितेत्युच्यते[5]—तदपि न सुप्रतिबद्धसमाधानम्। यस्माद् 'अग्निष्टोमयाजि'-शब्दः प्रथमं[6] भूतलक्षणे विषयान्तरे निष्प्रतिपत्ततया समासादितप्रसिद्धिः पश्चाद्[7] भविष्यति वाक्यार्थसम्बन्धलक्षणयोग्यतया तमनुभवितुं शक्नोति। न पुनरत्रैवं प्रसज्यते। यस्माद्रसवतः काव्यस्यालङ्कार इति तत्सम्बन्धितयैवास्य[8] स्वरूपलब्धिरेव। तत्सम्बन्धिनिबन्धनश्च काव्यस्य रसवत्त्वमित्येवमितरेतराश्रयलक्षणदोषः केनापसार्यते[9]। यदि वा रसो विद्यते यस्यासौ तदानलङ्कार एवास्तु इत्यभिधीयते, तथाप्यलङ्कारः काव्यं वा नान्यत् तृतीयं किञ्चिदवाप्नुयात्[10]। तत्सम्बन्धितयमपि प्रत्युक्तम्। उदाहरणं लक्षणैकयोगक्षेमत्वात् पृथङ् न विकल्प्यते। यथा

> स्तनेनि प्रेत्य सङ्कल्पं यया मे[11] भरणं स्मृतम्[12]।
> सैवावन्ती मया लब्धा कथमप्येव जन्मनि[13] ॥ ३६ ॥

(1) °भिधेयं lost in A. (2) तर्हि सोऽरसवतो रसालङ्कारः A, तर्ह्यसौ न रसवतोऽलङ्कारः (न रसवतोऽलङ्कारः?) B. (3) रसवालङ्कार B. (4) A adds सतः after this. (5) °मयाज्यस्य पुत्रो भवि° lost in A. (6) प्रथमे B. (7) °सिद्धिः पश्चा° lost in A (8) °ति तत्सं° lost in A. (9) केन वार्यते A. (10) अत्र omitted in B. (11) यया मे dropped in B. This श्लोक is too corrupt in A for its readings to be of any use. (12) मतम् in दण्डी. (13) दण्डी's काव्यादर्श ii, 180

अत्र रतिपरिपोषस्तच्चर्वणैकशरीरभूतायाश्चित्तवृत्तेरतिरिक्तमन्यद्विभक्तं वस्तु न किञ्चिद्विभाव्यते। तस्मादलङ्कार्यतैव[1] युक्तिमती। यदपि कैश्चित्

स्वशब्दस्थायिसञ्चारिविभावाभिनयास्पदम्[2] ॥ ३७ ॥

इत्यनेन पूर्वमेव लक्षणं विवेचितम्, तत्र स्वशब्दास्पदत्वं रसानामपरिगतपूर्वमस्माकम्। ततस्त्व एव रससर्वस्वसमाहितचेतसस्तत्परमार्थविदो विद्वांसः परं[3] प्रष्टव्याः—किं स्वशब्दास्पदत्वं[4] रसानामुत रसवत इति[5]। तत्र पूर्वस्मिन् पक्षे—रस्यन्त इति रसास्ते स्वशब्दास्पदास्तेषु तिष्ठन्तः शृङ्गारादिषु वर्तमानाः सन्तस्तज्ज्ञैरास्वाद्यन्ते। तदिदमुक्तं भवति—यत् स्वशब्दैरभिधीयमानाः श्रुतिपथमवतरन्तश्चेतनानां चर्वणचमत्कारं[6] कुर्वन्तीत्यनेन न्यायेन घृतपूरप्रभृतयः पदार्थाः स्वशब्दैरभिधीयमानास्तदास्वादसम्पदं सम्पादयन्तीत्येवं सर्वस्य कस्यचिदुपभोगसुखार्थिनस्तैस्तदास्वादचरितैरयत्नेनैव[7] तदभिधानमात्रादेव त्रैलोक्यराज्यसम्पल्लीलासमृद्धिः प्रतिपाद्यते[8] इति नमस्तेभ्यः।

रसवतस्तदास्पदत्वं नोपपद्यते, रसस्यैव स्वाद्यत्वात्[9] तदास्पदत्वाभावात्। किमुतास्वाद्यत्वेति। तदलङ्कारत्वं[10] च प्रथममेव प्रतिषिद्धम्। शिष्टं स्वाद्यादिलक्षणं पूर्वं व्याख्यातमेवेति[11] न पुनः पर्यालोच्यते। यदपि[12]

रसवद्रससंश्रयात् ॥ ३८ ॥

(1) तस्मादार्थकार्यतैव B. (2) सहट iv, 3. (3) एव A. (4) B omits स्व. (5) उतरव (corrupt) in A for उत रसवत. (6) B repeats चर्वण०; A has चेतनचर्वण०. (7) ०चरितैरत्नं तैनैव A. (8) प्रतिपादिता. (9) स्वभावत्वाच्चापि A. (10) अलङ्कारत्वं only in B. (11) स्वाद्यादिपूर्वलक्षणव्याख्यातमेवेति A. (12) B has dropped all words after this up to the beginning of रससंश्रयः next (p. 160, l. 2).

इति कैश्चिल्लक्षणमकारि तदपि न सम्यक् समाधीयतामितिष्ठति। तथा हि—रसः संश्रयो यस्यासौ रससंश्रयः, तस्मात् कारणादयं रसवदलङ्कारः सम्पद्यते। तथापि वक्तव्यमेव—कोऽसौ रसव्यतिरिक्तवृत्तिः पदार्थः। काव्यमेवेति चेत् तदपि पूर्वमेव प्रत्युक्तम्, तस्य स्वात्मनि क्रियाविरोधादलङ्कारत्वानुपपत्तेः। अथवा रसस्य[1] संश्रयो रसेन संश्रियते यस्मात्[2] रससंश्रयादिति। तथापि कोऽसाविति व्यतिरिक्तत्वेन वक्तव्यतामेवा(याति)। उदाहरणजातमप्यस्य लक्षणस्य पूर्वेण समानयोगक्षेमप्रायमिति [न] पृथक् पर्यालोच्यते।

रसपेशलम्[3] ॥ ३९ ॥

इति पाठे न किञ्चिदतिरिच्यते। अथ..... प्रतिपादकवाक्योपारूढपदार्थसार्थैस्वरूपमलङ्कार्यं रसस्वरूपानुप्रवेशेन विगलितस्वपरिस्पन्दानां द्रव्याणाम् इव[4].....कथमलङ्करणं भवतीत्येतदपि चिन्त्यमेव। किञ्च तथाभ्युपगमेऽपि[5] प्रधानगुणभावविपर्यासः पर्यवस्यतीति न किञ्चिदेतत्।

अत्रैव.....(उ)पक्रमते—शब्दार्थासङ्गतेरपि[6]। शब्दार्थयोरभिधानाभिधेययोरसमन्वयाच्च रसवदलङ्कारोपपत्तिर्नास्ति। अत्र[7] च रसो विद्यते (तिष्ठ)ति यस्येति मत्वर्थविहिते तस्यालङ्कार इति षष्ठीसमासः क्रियते। रसवांश्चासावलङ्कारश्चेति विशेषणसमासो वा। तत्र पूर्वस्मिन् पक्षे—र(सव्यतिरिक्तम्)न्यत् पदार्थान्तरं विद्यते यस्यासावलङ्कारः। काव्यमेवेति चेत्, तत्रापि तद्व्यतिरिक्तः कोऽसौ पदार्थो यत्र रसवदलङ्कारव्यपदेशः सावकाशतां[8] प्रतिपद्यते? विशेषातिरिक्तः

(1) रसस्य A. (2) Here B Ms. ends; the rest of the text follows A alone. It is given here to complete the topic under discussion. (3) दण्डी ii, 275. (4) A reads द्रव्याणा इवास: सम्पा .., which is evidently corrupt. (5) for स्वभावाभ्युपगमेऽपि A. (6) A is corrupt here and reads शब्दार्थसङ्गतेरसमरपि. (7) तत्र A. (8) A

पदार्थो न कश्चित् परिदृश्यते यस्तद्वालङ्कार इति व्यवस्थितिमास्कादयति। सदेवशुक्लवर्णे मार्गे[1] रसवदलङ्कारस्य शब्दार्थसङ्गतिर्न कदाचिदस्ति।

यदि वा निदर्शनान्तरविषयतया समासहितयोऽपि शब्दार्थसङ्गतियोजना विधीयते, यथा

तन्वी मेघजलार्द्रपल्लवतया[2] धौताधरेवाभ्रभिः
शून्येवाभरणैः स्वकालविरहाद् विश्रान्तपुष्पोद्गमा।
चिन्तामौनमिवाश्रिता मधुकृतां शब्दैर्विना लक्ष्यते
चण्डी मामवधूय पादपतितं जातानुतापेव सा[3] ॥ ४० ॥

यथा वा

तरङ्गभ्रूभङ्गा (क्षुभित)विहगश्रेणिरशना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम्।
यथाविद्वं याति स्खलितमभिसन्धाय बहुशो
नदीभावेनेयं ध्रुवमसहना सा परिणता[4] ॥ ४१ ॥

अत्र रसवदलङ्कारस्य प्रकटं प्रतिभासितं। तस्मात्र कथञ्चिदपि तद्विवेकस्य दुरवधानता। तेन रसवदलङ्कार इति षष्ठीसमासपदे शब्दार्थयोर्न किञ्चिदसङ्गतत्वम्, रसपरिपोषपरत्वादलङ्कारस्य तद्विबन्धनमेव रसवत्त्वम्[5]। रसवांश्चासावलङ्कारश्चेति विशेषणसमासपदे[6]। तथा चैतयोरुदाहरणयोर्लतायाः सरितश्चोद्दीपनविभावत्वेन वल्लभाभावितान्तःकरणतया नायकस्य तन्मयत्वेन (निश्चेतन ?)मेव पदार्थजातं सकलमवलोकयतः[7] तत्तात्पर्यसमारोपणं तद्धर्माध्या-

(1) °सदृशो मार्गो A. (2) वल्कलतया A. (3) विकर्षन्तीवोच्च iv, 38 = ध्वन्यालोक p. 76 (anon.). (4) विकर्षन्तीवोच्च iv, 28 = ध्वन्यालोक p. 76 (anon.). (5) रसवत्त्वमेव A. (6) A is corrupt here and reads °पदो यदिसदृर्थयोर्दि°. (7) °लोकयतं A.

रोपणं[1] चेत्युपमारूपकाद्यालङ्कारयोजनं विना न केनचित् प्रकारेण घटते, तल्लक्षणवाक्यत्वात्[2]। सत्यमेतत्, किन्तु 'अलङ्कार'-शब्दाभिधानं विना विशेषणसमा[सप]त्ते केवलस्य[3] रसवानिति [अस्य] प्रयोगः प्राप्नोति। रसवानलङ्कार[4] इति चेत् प्रतीतिरभ्युपगम्यते तदपि युक्ति-(युक्तां नार्हति)·····देरभावात्। रसवतोऽलङ्कार[5] इति षष्ठी-समासपक्षोऽपि न सुश्लिष्टसमन्वयः। यस्य कस्यचित् काव्यस्य रस-वत्त्वमेव। यस्यातिशयत्वनिबन्धनं तथाविधं[6] तद्विदाह्लादकारि काव्यं करणीयमिति तस्यालङ्कार इत्याश्रिते सर्वेषामेव रूपकादीनां रसवदल-ङ्कारत्वमेव न्यायोपपन्नतां प्रतिपद्यते। अलङ्का[रस्य य]स्य कस्य-चिद्रसत्वाद् विशेषणसमासेऽप्येषैव वार्ता[7]।

किञ्च, तदभ्युपगमे प्रत्येकमुत्सवलितलक्षणोल्लेखवि·····कृतपर-पोषतया[8] लब्धाभिधानालङ्काराणां प्रातिस्विकलक्षणाभिहितातिशय-व्यतिरिक्तमनेन किञ्चिदाधिक्यमाख्यायते। तस्मात्तल्ल(क्षण)करण-वैचित्र्यं प्रतिवारिप्रसरमेव परापतति। न चैवंविधविषये[9] रसवदल-ङ्कारव्यवहारः सावकाशः, तज्ज्ञैस्तथावगमात्, अलङ्काराणां च मुख्यतया व्यवस्थानात्।

अथवा, चेतनपदार्थगोचरतया रसवदलङ्कारस्य निश्चेतनवस्तुविषय-त्वेन चोपमादीनां विषयविभागो व्यवस्थाप्यते, तदपि न विदग्धजना-वर्जनं विदधाति। यस्मादचेतनानामपि रसोद्दीपनसामर्थ्यसमुचित-सत्काविसमुल्लिखितसौकुमार्यसरसत्वादुपमादीनां प्रविरलविषयता नि-

(1) तद्व्यारोपणं A. (2) ०वाक्यात्वा A. (3) A reads· सकेवलस्य. (4) रसवदलङ्कार A. (5) रसवदलङ्कार A. (6) तथाविधं वे A. (7) A is corrupt here and reads ०समासेऽप्येषा वार्ता कस्यचेव वार्ता. (8) The Ms A marks a *lacuna* after वि (9) विधिविषये A.

विषयत्वं वा स्यादिति शृङ्गारादिनिस्यन्दसुन्दरस्य सङ्कविप्रबन्धस्य च नीरसत्वं प्रसज्यत इति प्रतिपादितमेव पूर्वसूरिभिः[1]। यदि वा वैचित्र्यान्तरमनोहारितया रसवदलङ्कारः प्रतिपाद्यते, यथाभियुक्तैस्तैरेवाभ्यधायि—

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः[2] ॥ ४२ ॥

इति। यत्राप्यो वाक्यार्थः प्राधान्यादलङ्कार्यतया व्यवस्थितस्तस्मिन् तदङ्गतया विनिवेश्यमानः शृङ्गारादिरलङ्कारतां प्रतिपद्यते। यस्माद् गुणप्राधान्यं[3] भावाभिव्यक्तिपूर्वमेवंविधविषये विभूष्यते। भूषणविवेकव्यक्तिरुदाहृष्यते, यथा

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोऽशुकान्तं
गृह्णन् केशेष्वपास्तश्वरणनिपतितो नेक्षितः सम्भ्रमेण।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः[4] ॥४३॥

न च शब्दवाच्यत्वं नाम समानं कामिशराग्नित्रिलोचनयोः[5] सम्भवतीति न तावतैव तयोस्तथाविधविरुद्धधर्माध्यासादि विरुद्धस्वभावयोरैक्यं कथञ्चिदपि व्यवस्थापयितुं पार्यते, परमेश्वरप्रयत्नोऽपि स्वभावस्यान्यथाकर्तुमशक्यत्वात्। न च तथाविधशब्दवाच्यतामात्रादेव तद्विदां तदनुभवप्रतीतिरस्ति। 'गुडखण्ड' शब्दाभिधानादपि प्रतिविषादेस्तदास्वादप्रसङ्गात् तदनुभवप्रतीतौ सत्यां रसद्वय[6]समावेशदोषोऽप्यनिवार्यतामाचरति। यदि वा भगवत्प्रभावस्य मुख्यत्वे इयोरप्येतयोरङ्गत्वाद्

(1) See ध्वन्यालोक pp. 75-76 (2) ध्वन्यालोक iii. 5. (3) गुणप्रधानं A. (4) A part of the last line of this verse, which is discussed in ध्वन्यालोक in this connection as an example of the अङ्गार्पित variety of रसवदलङ्कार (p. 73), is already quoted before p. 38, which see for references. (5) The Ms A is corrupt here and reads त्रिनिशरक्षितेक्षणौ. 6) पुरुषद्वय A.

भूषणत्वमित्युच्यते[1] तदपि [न] स(मीचीनम्)। यस्मात् कारणस्य वास्तवत्वादिरेव स्यात्। निर्मूलत्वादेव तयोर्भावाभावयोरिव न कथञ्चिदपि मुख्योपपत्तिरित्यलमनु[2]चि(तविषय)चर्वणचातुर्यचापलेन।

यदि वा निदर्शनेऽस्मिन्नाश्रसतः समाम्नातलक्षणोदाहरणसङ्गतिं सम्यक् समीक्षमाणाः समर्षणा[3] उदाहरणान्तरवि(न्यासं ? रसव)दलङ्कारस्य व्याचक्ष्युः, यथा

किं क्ष्वास्येन मे प्रयास्यसि पुनः प्रायश्चिराद्दर्शनं
क्वेयं निष्करुण[4] प्रवासरुचिता केनासि दूरीकृतः।
स्वप्नान्तेष्विति[5] (ते वदन प्रियतम)व्यासक्तकण्ठग्रहो[6]
बुद्ध्वा (रोदि)ति रिक्तबाहुवलयस्तारं रिपुस्त्रीजनः[7] ॥४४॥

अत्र भ[ग्]र्तृनिहतबन्धो वैरिविलासिनीसमूहः शोकावेशाद[ग्र]णः करुणरसकाष्ठाधिरूढिविच्छित्तिमेवंविधवैशसमनुभवतीति तात्पर्यप्राधान्ये वाक्यार्थस्तदङ्गतया विनिबध्यमानः। प्रवासविप्रलम्भशृङ्गार(प्रतिभासन ?)परत्वमत्र परमार्थः परस्परान्वितपदार्थसार्थसमर्प्यमाणवृत्तिर्गुणभावेनावभासनादलङ्करणमित्युच्यते। तस्य च निर्विषयत्वाभावाद् रसवदालम्बनविभावादिस्वकारणसामग्रीविरहविच्छिता लक्षणानुपपत्तिर्न मन्यवलि। रसद्वयसमावेशदुष्टत्वमपि दूरमपास्तमेव। द्वयोरपि वास्तवस्वरूपस्य[8] विद्यमानत्वात्तदनुभवप्रतीतौ सत्यां नात्मविरोधः[9], स्पर्धित्वाभावात्। तेन तदपि तद्विदाह्लादविधानसामर्थ्यसुन्दरम्, करुणरसस्य निश्चायकप्रमाणाभावात्। प्रवासविप्रलम्भस्य स्वकारणभूतवाक्योपारूढालम्बनविभावादिसमर्प्यमाणत्वं स्वप्नान्तरसमर्प्यं च

(1) A is corrupt and reads भूषणत्वमित्युच्यते. (2) ०रित्येवम० A. (3) A appears to be corrupt here and reads समर्षणामुदाहरण०. (4) निष्करुण A. (5) ०ष्वेति A. (6) ०व्यासङ्ग० A. (7) Quoted and discussed as an example of the द्वय variety of रसवदलङ्कार in ध्वन्यालोक p. 72. (8) वास्तवस्य स्वरूपस्य A. (9) तथात्मविरोधः A.

तथाविधस्वं वृत्त्या सम्भवतस्तस्योभयसुपपद्यमिति प्रथमतरमेव कथमसौ समुद्भवतीति चे[त्त]दपि न समञ्जसमायम्। यस्माद्विषयमहाप्रुरुषप्रतापाक्रान्तिचकितचेतसामितस्ततः स्वैरिणां तस्करसोनाञ्च प्रकाशनेरपि (?) पृथगवस्थानं न युक्तिप्रयुक्ततामतिवर्तते। स्तमेव तदपि चतुरश्रम्। करुणरसस्य सत्वपि निश्चये, तथाविधपरिशोषदशाधाराधिरूढैरेकाग्रतालिमितमानसस्य तथाभ्यस्त[1]-रसवासनाधिवासितचेतसः[2] सुचिराद्भर्तृसादि[त]स्वप्नसमागमः पूर्वानुभूतश्चात्मसमुचितसमारब्धकान्तसंलापः कथमपि सम्प्रबुद्धः। प्रबोधसमनन्तर[3]समुल्लसितपूर्वपरानुसन्धानविच्छित्तिप्रस्तुतवस्तुविसंवादविदारितात्मा करुणो भवद्भिरिवासिनीसार्थो रोदितीति करुणस्यैव परिशोषपदवीमधिरोहः। तथाविधव्यभिचार्यौचित्यचारुत्वं तत्स्वरूपानुप्रवेशो वेति कुतः प्रवासविप्रलम्भस्य पृथग्व्यापारे रसगन्धोऽपि[4]। यदि वा प्रेयसः[5] प्राधान्ये तदङ्गत्वात् करुण[6]रसस्यालङ्करणत्वमित्यभिधीयते तदपि न[7] निरवद्यम्। यस्माद् द्वयोरप्येतयो[8]रुदाहरणयोर्मुख्यभूतो वाक्यार्थः करुणात्मनैव विवर्तमानस्थितिरुपनिबद्धः। पर्यायोक्तन्यायप्रदेशन्यायेन[9] वाच्यतार्थव्यतिरिक्तयोः प्रतीयमानतया न करुणस्य रसत्वाद् व्यङ्ग्यस्य सतो वाच्यत्वमुपपन्नम्। नापि गुणीभूतव्यङ्ग्यस्य विषयः, व्यङ्ग्यस्य क[रु]णात्मनैव प्रतिभासनात्। न च द्वयोरपि व्यङ्ग्यत्वम्, अङ्गाङ्गिभावस्यानुपपत्तेः। एतच्च[10] यथासम्भवमस्माभिर्विकल्पितम्। न पुनस्तत्त्वात्व.....ण।

(1) स्निग्धिसमागमसुखाभ्यास० A (2) ०व्यसनादिवासित० A. (3) समानतर A. (4) दशान्तरोऽपि A. (5) That is, the प्रेयस् अलंकार. (6) तदङ्गत्वादेव A. (7) A is corrupt and reads तदीपत्व. (8) ०तदीपत्व for द्वयोरपि A. (9) पर्यायोक्तन्यायप्रदेशन्यायेन A. (10) एतस्य A.

किञ्च, 'काव्ये सन्निवेशालङ्कारो रसादि[1] इति रस केवलः, न तु रसवदिति अत्यल्पयत्न जीवितम् न किञ्चिदभिहितं स्यात्। एवं सति शब्दार्थ.....दनस्यैव निष्ठतोक्तेस्तदपि न किञ्चित्।

[असमासोऽयमुद्योतः समाप्तश्च][2]

(1) Quoted from the ध्वन्यालोक see above p. 163. (2) A résumé of the rest of the work, of which the Ms material available to me is inadequate to permit of a critical edition, is given below,

A Resumé of the Contents of the Unedited Portion of the Text, with extracts.[1]

Unmesa III.

After discussing the figure *rasavat*, Kuntaka goes on to deal with the figure *preyas*[2], closely connected with *rasavat*, criticising in this connexion Bhāmaha's view of the matter. He refers to Dandin's definition (ii, 275) प्रेयः प्रियतराख्यानम्, and remarks that Bhāmaha (iii, 5) does not define the figure, but thinks that the illustration given would suffice (उदाहरणमात्रमेव लक्षणं मन्यमानः). Dandin quotes the same illustration with approval, adding another line (which makes the sentence complete and the figure clear) : कालेनैषा

The figure *preyas*

(1) This résumé, as we have already noted, is based upon one Ms only, viz. the hopelessly corrupt Devanagari transcript of the Madras Ms. These portions are entirely wanting in the Jesalmer Ms. With this imperfect material it is not possible to edit this part of the text properly ; but as no further Mss of the text are likely to be discovered, a résumé, however defecient, is attempted. I have, however, tried to give it in the author's own words as far as possible, presenting full extracts wherever the text is intelligible and capable of being reconstructed. The emendations, which had to be numerous on account of the corrupt nature of the Ms, are mostly conjectural and capable of improvement ; while the restoration of the missing Kārikās cannot be taken as final. The result obtained cannot be said to be very satisfactory, but I have spared no pains to present this part of the text, as far as it can be presented. (2) The Kārikā on the this point is lost and cannot be reconstructed from the commentary.

भवेत् प्रीतिस्तवैवागमनात् पुनः, so that the whole verse, which is cited by Kuntaka, stands thus :

प्रेयो मद्दा(गतं कृष्णमवादीद्) विदुरो यथा ।
अद्य या मम गोविन्द जाता त्वयि मद्दामते ।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः ॥

(Daṇḍin ii, 276)

But Kuntaka criticises : तदेवं न चोदचमतामर्हति । तथा च, कालेनैत्यच्यते तदेव वर्त्तमानविषयतया वस्तुनः स्वभावः (?)[1], तदेव लक्षणकरणमित्यलङ्कार्यं न किञ्चिदवशिष्यते । तस्यैवोभयमलङ्कार्यमलङ्करणत्वं चेत्ययुक्तियुक्तम् । एकक्रियाविषयं युगपदेकस्यैव वस्तुनः कर्मकरणत्वं नोपपद्यते । यदि दृश्यते तथाविधानि वाक्यानि येषामुभयमपि सम्भवति—

आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना क्षतिना च त्वमात्मन्येव प्रलीयसे ॥ (कुमार० २।१०)

इत्यभिधीयते, तदपि निःसमन्वयप्रायमेव । यस्मादत्र वास्तवेऽप्यभेदे काल्पनिकमुपचारसत्तानिबन्धनं विभागमाश्रित्य तद्व्यवहारः प्रवर्तते । किञ्च, विश्वमयत्वात् परमेश्वरस्य परमेश्वरमयत्वाद्वा विश्वस्य पारमार्थिकेऽप्यभेदे मायाजालप्रतिपादनार्थं प्रातिस्विकपरिस्पन्दविचित्रां जगदुपश्वरचनां प्रति सकलप्रमातृतासंवेद्यमानो भेदावबोधः स्फुटावकाशतां न कदाचिदप्यतिक्रामति । तस्मादत्र परमेश्वरस्यैव रूपस्य कस्यचित्तदाप्यमानत्वाद्देदनादेः क्रियायाः कर्मत्वम्, कस्यचिद्साधकतमत्वात् करणत्वमिति । उदाहरणे पुनरपोद्धारबुद्धिरिति[2] कल्पनयापि न कथञ्चिदपि विभागो विभाव्यते । तस्मात्

स्वरूपादतिरिक्तस्य परस्याप्रतिभासनात्[3] ।

(1) Ms. वरित. (2) धवि for इति in Ms. (3) See above p. 156 (III, 10)

इति दूषणमत्रापि सम्भवतीयम् ।·····पक्षे च यदेवालङ्कार्यं[1] तदेवालङ्करणमिति प्रेयसो रसवतश्च स्वात्मनि क्रियाविरोधात्

आत्मैव नात्मनः[2] स्कन्धं क्वचिदप्यधिरोहति[3] ।

इति स्थितमेव ।

After discussing another objection to the view that *preyas* is an *alaṃkāra*[4], Kuntaka points out that such cases cannot be regarded as instances of *saṃsṛṣṭi* and *saṅkara*. He cites the illustration

इन्दोर्लेखा त्रिपुरजयिनः कण्ठमूलं मुरारि-
र्दिङ्नागानां मदजल[6]मसीभाञ्जि गण्डस्थलानि ।
अद्याप्युर्वीवलयतिलक श्यामलिम्नानु(लिप्ता)-
(न्या)भासस्ते वद धवलितं किं यशोभिस्त्वदीयैः[7] ॥

and remarks : अत्र प्रेयोऽभिधितिरलङ्कार्या, आशंसास्तुतिरलङ्करणम् । न पुनरुभयोरलङ्कारप्रतिभासो येन तद्व्यपदेश्यः सङ्करव्यपदेशो आपद्येत, द्वितीयस्यालङ्कार्यतया वस्त्वन्तरस्याप्रतिभासनात् । He sums up the discussion by saying : अस्मिन् विषये प्रायो भणितिविविक्ते वर्णनीयान्तरे प्रेयसो विभूषणत्वादुपमादेरिवोपनिबन्धः प्राप्नोति [इति] न क्वचिदपि दृश्यते । तस्मादन्यत्रान्यदापि प्रेयसो न युक्तियुक्तमलङ्करणत्वम् । रसवतोऽपि तदेव, योगक्षेमत्वात् ।

(1) तदेव for यदेव in Ms. (2) Ms. आत्मनैवात्मनः. (3) See text. Kārikā 1, 13. (4) The passage is too corrupt and fragmentary. The Kārikā appears to be explained in part here. But as the verse is lost in the text, it is difficult to reconstruct it from the commentary. (5) The line is corrupt in Ms and reads दशोकण्ठलं मुरारि. (6) °मल for मद in Ms. (7) The verse is attributed to राजशेखर in सुभाषितावली 2563=anon. in Ruyyaka p. 115.

The figure *ūrjasvin*

Then he goes to deal with the figures ऊर्जस्वि and उदात्त in the same manner. The Kārikā on this is given in the text in a somewhat corrupt form, but may be reconstructed thus :

एवमलङ्करणानां प्रेयः प्रत्यादिष्वु वर्त्मनोयशरीरत्वात्तदेकरूपाणामन्येषां प्रत्यादिशति—

ऊर्जस्व्युदात्ताभिधान[1]पौर्वापर्यप्रणीतयोः[2] ।
अलङ्करणयोर्भूषणत्वं (तदत्र विद्यते) ॥

न विद्यते[3] न सम्भवति ॥ कथम्—तदत् । तदित्यनन्तरोक्तरसवदादिपरामर्शः ।.....[4] रसवदादिवदेव तयोर्विभूषणत्वं नास्ति ।

Then he criticises the definitions and examples of *ūrjasvin* given by Udbhata and Bhāmaha, quoting Udbhata iv, 5 (अनौचित्यप्रवृत्तानां) and 6 (तस्याः कामोऽस्य वृषभे and Bhāmaha iii, 7, with the remark that the latter considers the illustration to be enough for indicating the nature of the figure in question (केचिदुदाहरणमेव व्यक्तव्याख्यानं मन्यमानैस्तदेव प्रदर्शितम्). He cites another illustration :

अपहर्तास्मकीर्तिं हृदि ते मास्म भूदयम् ।
विमुखेषु न मे खड्गः प्रहर्तुं जातु वाञ्छति ॥

Taking Udbhata's definition, he points out that if

(1) °भिधात्वो: Ms, contrary to metre. (2) As we find them treated in काव्य iii, 7 and 10. (3) Ms. अविद्यते. (4) The passage is hopelessly corrupt.

the *bhāsa* is अनौचित्यप्रवृत्त. there would be a breach of *rasa* (रसभङ्ग) in accordance with the dictum अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्[1] : but in such illustrations as are cited समुचितोऽपि रसः परमसौन्दर्यमावहति, तत्र कथमनौचित्यपरिक्षामः कामादिकारणकलनोपसंहलक्षणरसालङ्कारता(यति)भासः प्रयास्यति He quotes *Kumāra*. vi, 95 (पशुपतिरपि तान्यहानि) and maintains against भरतनयनिपुणमानस's that the *rāsabhāsa* here is *alaṃkāra* (उदाहरणमेवोर्जितम्। तदेवमयं प्रधानचेतनलक्षणोपकलनीयवर्णितविषयविभिन्नरतिप्रेयस्वत्स्वभाव एव मुख्यतया वर्ण्यमानत्वादलङ्कार्यो न पुनरलङ्कारः), on grounds similar to those he has already expounded in the case of *rasavat* etc. (रसवदाद्यभिहितदूषणपरंपरामतिक्रामति. तदेतदुत्तरत्र योजनीयम्), Regarding *udātta*, he

The figure *udātta*

advances similar arguments against its being considered as an *alaṃkāra* : एवमुदात्तस्यौभयप्रकारस्याप्यलङ्कार्यतैव युक्तिमती, न पुनरलङ्करणत्वम्, and goes on to consider its two varieties in detail. Criticising Udbhata's definition of the first variety *viz.*, उदात्तसद्धिमद्वस्तु, he says · अत्र यद्वस्तु तदुदात्तम्, अलङ्करणं कौटस्थमित्याकाङ्क्षायाम् 'ऋद्धिमत्' इत्यनेन यदि विशेष्यते. तत्तदेव सम्पदुपेतं वस्तु वर्ण्यमा[नमलङ्का]र्यं तदेवालङ्करणमिति स्वात्मनि क्रियाविरोधलक्षणस्य दोषस्य दुर्निवारत्वात् स्वरूपातिरिक्तस्य वस्त्वन्तरस्याप्रतिभासनादुर्जस्विवत्।.....अथवा ऋद्धिमद्वस्तु यस्मिन्

(1) Quoted from ध्वन्यालोक p. 145. (2) उद्भट's definition is : अनौचित्यादृते नान्यद्रसभङ्गस्य कारणात्। सालंकारं च रसवत्काव्यमुर्जस्वि कथ्यते॥

यस्येत्यपि व्याख्यानं क्रियते, तथापि तदन्यपदार्थलक्षणं वस्तु व्यङ्ग्यमेव यङ्गमानार्थतामुपनीतम्[1]। तद्दि[2]मदस्तु यस्मिन् यस्य वेति तत्काव्यमेव तथाविधं भविष्यतीति चेत्, तदपि न किञ्चिदेव। यस्मात्काव्यस्यालङ्कार इति प्रसिद्धिः, न पुनः काव्यमेवालङ्करणमिति। यदि वा ऋद्धिमदस्तु यस्मिन् यस्य वेत्यसावलङ्कारः·····तथापि वर्णनीयालङ्करणमतिरिक्तमलङ्करणकल्पमन्यदत्र [किं]चिदेवोपलभ्यत इत्यभयथापि शब्दार्थासङ्गतिलक्षणदोषः सम्प्राप्तावसरः[3] सम्पद्यते। Regarding its second variety as given by Udbhata, he goes on to remark: द्वितीयस्याप्युदात्तप्रकारस्यालङ्कार्यत्वमेवोपपन्नम्, न पुनरलङ्कारभावः। तथा चैतस्य लक्षणं

चरितं च महात्मनाम्।
उपलक्षणतां प्राप्तं नेतिवृत्तत्वमागतम्॥ (Udbhata iv, 8)

इति। तत्र वाक्यार्थपरमार्थविद्भिरेवं पर्यालोच्यताम्—यन्नाम(नु) भावानां व्यवहारस्योपलक्षणमात्रवृत्तेरन्वयः प्रस्तुते वाक्यार्थे कश्चिदिष्यते वा न वेति। तत्र पूर्वस्मिन् पक्षे—तत्र तदलीनत्वात् पृथगभिधेयस्यापि पदार्थान्तरवत्तदवयवत्वेनैव व्यपदेशो न्याय्यः, पाण्यादेरिव शरीरे। न पुनरलङ्कारभावोऽपीति। अन्यस्मिन् पक्षे—तदन्वयाभावादेव वाक्यान्तरवर्तिपदार्थवत्तस्य तत्र सत्तैव न सम्भवति, किं पुनरलङ्करणत्वचर्चा। In this connexion he cites an illustrative verse, which is too corrupt and fragmentary in the Ms. to be properly restored.

Then he goes on to the figure *samāhita*, which he deals with in the same way, declaring:

The figure *samahita*

एवं समाहितस्याप्यलङ्कार्यत्वमेव न्याय्यम्, न पुन-

(1) ॰नुपमानोप Ms. (2) यमद्धि॰ Ms. (3) संप्राप्तोऽवसरः Ms.

रसालङ्कारभावः. The Kārikā on this point (as far as it can be reconstructed from the *vṛtti* is

तथा समाहितस्यापि प्रकारद्वयशोभिनः ।

(to be construed with the Kārikā, given above, on ऊर्जस्विन् and उदात्त). The Kārikā is explained thus : तथा तेनैव पूर्वोक्तेन प्रकारेण समाहिताभिधानस्य चालङ्कारस्य भूषणत्वं न विद्यते नास्तीत्यर्थः । Then he criticises Udbhata's definition (iv, 7) of the figure, which, according to Kuntaka, constitutes the first variety referred to in the Kārikā. The verse of Ubdhata however, is quoted with a reading slightly different from that of the printed texts :

रसभावतदाभासतत्प्रशान्त्यादिरक्रमः[1] ।
अन्यानुभावनिःशून्यरूपो यस्तत् समाहितम् ॥

Then he criticises its second variety, as defined by Dandin (ii, 298-99), whose definition and illustration are both quoted, in connexion with the explanation of the above Kārikā : यदपि कैश्चित् प्रकारान्तरेण समाहिताख्यमलङ्करणमाख्यातं तस्यापि तथैव भूषणत्वं न विद्यते ।

(1) Ms. ०प्रशान्तिरक्रमः, which is corrected from Mammata (p.84) who makes use of this line. The Nir. Sag Ed. reads ०तदाभासतत्वैः प्रशमक्रमम्, with which the reading of the Bombay Sansk. Ser. ed. agrees (with the exception of reading ०हृत्वे, for हृत्वैः). Jacob's text in *IRAS*, 1837, p. 840 agrees with Nir. Sag. ed. reading. In the next line, of course, all these texts read ०रूपं, यत्तत्.

तदभिधत्ते—प्रकारद्वयशोभिनः। पूर्वोक्तेन प्रकारेणानेन चापरेणेति द्वाभ्यां शोभमानस्य समाच्छिन्नस्यालङ्कारत्वं न सम्भवति। Of the first variety, the following illustrative verse is discussed :

अक्ष्णोः स्फुटाम्बु[1] कलुषोऽरुणिमाविलीनः
श्यामं च साधरमधरस्फुरणं भ्रुकुट्या।
भावान्तरस्य (तव) गण्डगतोऽपि कोपो
मोहाढवासनतया प्रसरं ददाति॥[2]

After this, Kuntaka proceeds to explain his own idea of *rasavat*, with some preliminary remarks : तदेवं चेतनाचेतनपदार्थभेदभिन्नं लोकाविकमौकुमार्यमनोहरं (व)स्तुनः स्वरूपं प्रतिपादितम्। इदानीं तदेव कविप्रतिभोल्लिखितलोकोत्तरातिशयशालितया नवनिर्मितं मनोज्ञतामुपनीयमानमालोच्यते। तथाविधभूषणविन्यासविच्छित्तिसौन्दर्यातिशयव्यतिरेकेण भूतत्वनिमित्तभूतं न तद्विदाह्लादकारितायाः कारणम्. Here he quotes two *antara-ślokas* and explains a Kārikā (beginning अभिधायाः प्रकारौ द्वौ), which are partially lost and corrupt in the Ms. Then comes the Kārikā on *rasavat*, which is missing in the text, but may be reconstructed as follows from the *vṛtti* :

Kuntaka's own idea of *rasavat*

यथा स रसवद्नाम सर्वालङ्कारजीवितम्।
काव्यैकसारतां याति तथेदानीं विवेच्यते॥

(1) अक्ष्णो स्फुटाम्बु. (2) This verse is quoted anonynously in Ruyyaka p. 189.

रसेन वर्तते तुल्यं रसवत्त्वविधानतः ।
योऽलङ्कारः स रसवत् तद्विदाह्लादनिर्मितेः ॥

The *Vṛtti* on these verses runs thus : यथेत्यादि । यथा स रसवदाम यथा येन प्रकारेण पूर्वप्रत्याख्यातसङ्ख्यातिरलङ्कारो रसवदभिधान(:) काव्यैकसारतां याति (काव्ये)कसर्वस्वतां प्रतिपद्यते, सर्वालङ्कारजीवितं सर्वेषामलङ्काराणामुपमादीनां जीवितं स्फुटीभूतं (।) सम्पद्यते, तथा तेन प्रकारेणेदानीमधुना विविच्यते विचार्यते लक्षणोदाहरणभेदेन वितन्यते । तमेव रसवदलङ्कारं लक्षयति—रसेनेत्यादि । 'योऽलङ्कारः स रसवत्' इत्यन्वयः[1] । यः किल एवंस्वरूपो रूपकादिः रसवदभिधीयते । किंस्वभावेन—रसेन वर्तते तुल्यम्[2] । रसेन शृङ्गारादिना तुल्यं[2] वर्तते, यथा ब्राह्मणवत् क्षत्रियस्तथैव । स रसवदलङ्कारः । कस्मात्[3]—रसवत्त्वविधानतः । रसोऽस्यास्तीति रसवत् काव्यम्, तस्य भावस्तत्त्वम् ततः, सरसत्वसम्पादनात् । तद्विदाह्लादनिर्मितेश्च । तत् काव्यं विदन्तीति तद्विदः, तज्ज्ञास्तेषामाह्लादनिर्मितेरानन्दनिष्पादनात् । तथा रसः काव्यस्य रसवत्तां तद्विदाह्लादं च विदधाति । एवमुपमादिरप्युभयं निष्पादयन् भिन्नो रसवदलङ्कारः सम्पद्यते । यथा

उपोढरागेण विलोलतारकं[4]
तथा गृहीतं शशिना निशामुखम् ।
यथा समस्तं तिमिरांशुकं तया
पुरोऽपि रागाज्ज्वलितं[5] न लक्षितम्[6] ॥

(1) Ms रसवदनुवयः. (2) Ms तुर्यं. (3) Ms तस्मात्. (4) Ms विलोलतोरे (corrupt). (5) तोरं for रागात् Ms. (6) This verse, attributed to पथिनि in सुभाषितावली 1969 and शार्ङ्गधर-पद्धति 3634, is quoted anonymously in काव्यालंकार p. 35 (=Rudrata p. 83, anon. = Hemacandra p. 274, anon. etc).

अत्र स्वावसरसमुचितसुकुमारस्वरूपयोर्निशाग्निनोर्वर्णनायां[1]..... रूपकालङ्कारः समारोपितकान्तवृत्तान्तः कविनोपनिबद्धः। स च श्लेषच्छायामनोज्ञविशेषवक्रभावाद् विशिष्टलिङ्गसामर्थ्याच्च..... काव्यस्य सरसतामुल्लासयंस्तदिदाह्लादमादधानः स्वयमेव रसवदलङ्कारतां समासादितवान्।

Then he cites another illustrative verse चलापाङ्गां दृष्टिं from *Abhijñāna-śakuntala* i, 24, and goes on to remark : अत्र परमार्थः—प्रधानवृत्तेः शृङ्गारस्य भ्रमरसमारोपितकान्तवृत्तान्तो रसवदलङ्कारः शोभातिशयमाधित्सवान्। यथा वा

कपोले पत्रालीं[2]

इत्यादौ। तदेवमनेन न्यायेन

क्षिप्तो हस्तावलग्नः[3]

इत्यत्र रसवदलङ्कारप्रत्याख्यानमयुक्तम्। सत्यमेतत्, किन्तु विप्रलम्भशृङ्गारता तत्र निवार्यते। श्लेषस्य पुनस्तत्तुल्यवृत्तान्ततया रसवदलङ्कारत्वमनिवार्यमेव। न चालङ्कारान्तरे सति रसवदपेक्षानिबन्धनः संसृष्टिसङ्करव्यपदेशप्रसङ्गः प्रत्याख्येयतां[4] प्रतिपद्यते। यथा

अङ्गलोभिरिव केशसञ्चयं सन्निगृह्य तिमिरं मरीचिभिः।
कुड्मलोकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी[5]॥

For full references, see काव्योद्वहन, p 52.

(1) वर्णनोचत् Ms. The passage after this has a *lacuna* and is corrupt. (2) Already quoted at p 126. (3) Already quoted at p 163. (4) संसृष्टि; सङ्करव्यपदेशप्रसङ्गप्रत्याख्येयतां Ms. (5) कुमार० ८।६१ = quoted in सुभाषितावली 1963 = सरस्वतीकण्ठा० p. 236.

अत्र रसवदलङ्कारस्य रूपकादीनां च सन्निपातः सुतरां न समुल्लासते। तत्र 'चुम्बतीव रजनीमुखं शशी' [इति] उत्प्रेक्षालक्षणस्य रसवदलङ्कारस्य प्राधान्येन निबन्धनम्, तदङ्गत्वेनोपमादीनां केवलस्य प्रस्तुतपरिपोषाय परिनिष्यन्दनम्। यथा

ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्घनाट्टैनखक्षतेन।
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार[1] ॥

'प्रसादयन्ती रवेरभ्यधिकं तापं शरच्चकार' इति समयसम्भवः पदार्थस्वभावस्वद्योतकः-'वारिद'-शब्दाभिधानं विना प्रतीयमानोत्प्रेक्षालक्षणेन रसवदलङ्कारेण कविना कामपि कमनीयतामधिरोपितः, प्रतीत्यन्तरमनोहारिणां 'सकलङ्क'दीनां वाचकादीनामुपनिबन्धनात्, 'पाण्डुपयोधरेणाट्टैनखक्षतेनाभमैन्द्रं धनुर्दधान'इति श्लेषोपमयोश्च तदानुगुण्येन विनिवेशनात्। एवं 'सकलङ्कमपि प्रसादयन्ती (शरत्) परस्याभ्यधिकं तापं चकार' इति रूपकालङ्कारनिबन्धनः प्रकटाङ्गनाङ्गसाम्यसमा(रोपः सु)तरां समन्वयं साद्दितवान्। अत्रापि प्रतीयमानहेतौ रसवदलङ्कारस्य प्राधान्यम्, तदङ्गत्वमुपमादीनामिति पूर्ववदेव सङ्गतिः। Then he cites *Kumāra*० iii, 30 (लग्नद्विरेफाञ्जनभक्तिचित्रं) as another illustration and concludes the topic with the remark : अयं रसवतां[2] सर्वालङ्काराणां चूडामणिरिवाभाति, quoting two *antara-ślokas* (fragmentary and corrupt in the Ms) in justification.

After this, Kuntaka takes up the figure *dīpaka*, and its three varieties thus : एवं नीरसानां पदार्थानां सरसतां समुल्लासयितुं रसवदलङ्कारं समाख्यादिनवान्। इदानीं

(1) Quoted in *Locana*, p. 37. (2) Ms. सरसवतां.

The figure *dīpaka*

स्वरूपमात्रेणैवावस्थितानां वस्तूनां कम[1]प्यतिशयमुद्दीपयितुं दीपकालङ्कारमुपक्रमते। तत्र पूर्वाचार्यैरादिदीपकं मध्यदीपकमन्तदीपकमिति दीप्यमानपदापेक्षया वाक्यस्यादौ मध्ये चान्ते च व्यवस्थितमिति क्रियापदमेव दीपकाख्यमलङ्करणमाख्यातम्। Then he cites the three instances of the three varieties as given by Bhāmaha ii, 27—29 (मदो जनयति प्रीतिं etc.). He severely criticises this definition and classification of *dīpaka*, remarking : अत्र क्रियापदानां दीपकत्वं प्रकाशकत्वम्, यस्मात् क्रियापदैरेव[2] प्रकाश्यन्ते स्वसम्बन्धितया ख्याप्यन्ते। तदेवं सर्वस्य कस्यचिद्दीपकव्यतिरिक्तिणोऽपि क्रियापदस्यैकरूपत्वाद्दीपकाद् हेतं प्रसज्यते। किं च शोभाकारित्वस्य युक्तिशून्यत्वादलङ्करणत्वानुपपत्तिः[3]। अन्यच्च, आस्तां तावत् क्रिया, एवं यस्य[4] कस्यचिद्वाक्यवर्तिनः पदस्य सम्बन्धितया पदान्तरद्योतनस्वभाव एव। परस्परान्वयसम्बन्धनिबन्धनाद्वाक्यार्थस्वरूपस्येति पुनरपि दीपकहेतमायातम्। आदौ मध्ये चान्ते वा व्यवस्थितं क्रियापदमतिशयमादधाति, येनालङ्कारतां प्रतिपद्यते। तेषां वाक्यादीनां परस्परं तत्राविधः कः स्वरूपातिरिकः सम्भवति ? क्रियापदप्रकारभेदनिबन्धनं वाक्यस्य यदादिमध्यान्तं तदेव[5] तदर्थवाचकेष्वपि[6] सम्भवतीत्येवं दीपकप्रकारानन्त्यप्रसङ्गः। दीपकालङ्कारविहितवाक्यान्तरवर्तिनः क्रियापदस्य भ्वादिव्यतिरिक्तमेव[7](?) काव्यान्तरव्यपदेश्यः[8]। यदि वा समानविभक्तानां बहूनां कारणानामेककक्रियापदं प्रकाशकं दीपकमित्युच्यते, तत्रापि काव्यच्छायातिशयकारितायाः किं निबन्धनमिति

(1) कं Ms. (2) कारणैरेव (?) Ms. (3) ॰रत्वलमुपपत्तिः Ms. (4) The phrase कस्यचिद्वाक्य॰ up to सम्बन्धितया is repeated in the Ms. (5) ॰सम्बन्धनादेव Ms. (6) तदर्थे वादेष्वपि Ms. (7) ॰पदस्याभादि Ms. (8) काव्यान्तरमलङ्कारेऽस्त Ms.

वक्तव्यमेव। Rejecting this definition, he thinks that the exposition of Udbhata, whom he calls अभियुक्ततर, is better : प्रस्तुताप्रस्तुतविधर्मसामर्थ्यसम्भवितप्रतीयमानहृत्तिसाम्यमेव नान्यत् किञ्चिदित्यभियुक्ततरैः प्रतिपादितमेव, and quotes Udbhata I, 14.

The illustrative Prakrit verse quoted by Kantaka in the course of his discussion, is corrupt in the Ms[1] and difficult to reconstruct. Restored, it would possibly run thus :—

चंकमन्ति करीन्द्रा दिसामअमअगन्धहारिअहिअआ।
दुक्खं वणे च कइणो भणिइविसमम्मि कइसग्गे॥

He maintains, with Udbhata, that there would be no *dīpaka* if there is no प्रतीयमानहृत्तिसाम्य of the प्रस्तुत and the अप्रस्तुत, and approves of the addition of the qualification अन्तर्गतोपमाधर्म. Then he proceeds to define the figure. The *kārikā* on this may be reconstructed from the *vṛtti* thus :

(1) Most of the Prakrit verses, as usual in South Indian Mss, are in a hopeless state of corruption ; and I have not been able to restore most of them properly. The छाया would be :

चङ्क्रमन्ते करीन्द्रा दिग्गजमदगन्धहारितहृदयाः।
दुःखं वने च कवयो भणितिविषममहाकविमार्गे॥

The readings in the Ms are दिसाअनअगअीवगन्धहारिअहिअआ and दुक्खं वणे गइन्दा कइअक भणिइ॰ but the छाया explains : यथा दिक्कुञ्जरमदामोदहारितमानसाः करीन्द्राः, कानने कथमपि दुःखं चङ्क्रम्यन्ते, तथा भणितिविषमे सकोक्तिविषमे महाकविमार्गे ···· कवय इति 'च'-शब्दार्थः।

औचित्यावहमम्लानं तद्विदाह्लादकारणम् ।
अन्यत् धर्मेमर्थानां दीपयद्वस्तुदीपकम् ॥

Thus explained : तदिदानीं दीपकमलङ्कारान्तरकारणं कलयन् कामपि काव्यकमनीयतां कल्पयितुं प्रकारान्तरेण[1] प्रक्रमते—औचित्यावहमित्यादि। वस्तुदीपकं वस्तुसिद्धयमलङ्करणं भवतीति सम्बन्धः, क्रियान्तराश्रवणात्। तदेवं सर्वस्य क्वचिदस्तुनः सद्भावापत्तिरित्याह—दीपयत्[2] प्रकाशयदलङ्करणं सम्पद्यते। किं कथेत्यभिधत्ते—धर्मे[3] परिस्पन्दविशेषमर्थानां वर्णनीयानाम्। कीदृशम्—अग्लानम् अप्रकटम्, तेनैव प्रकाश्यमानत्वात्। किंस्वरूपं च—औचित्यावहम्। औचित्यमौदार्यम् (!) आवहति यः स तथोक्तः। अन्यच्च किंविधम्—अम्लानम्, प्रत्ययम्। अनालोढमिति यावत्। एवंस्वरूपत्वात्—तद्विदाह्लादकारणम्, काव्यविदानन्दनिमित्तम्।

Owing to the defective nature of our Ms, it is difficult to make out precisely Kuntaka's classification of *dīpaka*; but the *kārikā* may be provisionally reconstructed thus :

Kuntaka's classification of dīpaka

एकं प्रकाशकं सन्ति भूयांसि भूयसां क्वचित् ।
केवलं पङ्क्तिसंस्थं वा द्विविधं परिदृश्यते ॥

which is explained in this way : यस्यैव प्रकारान्निरूपयति—द्विविधं परिदृश्यते। द्विप्रकारमवलोक्यते, लक्ष्ये विभाव्यते। कथम्—केवलमसहायम्, पङ्क्तिसंस्थं[4] वा पङ्क्तौ[5] व्यवस्थितं तत्तुल्यकक्ष्या-

(1) But no other कारिका on दीपक is to be found in the text previous to it. (2) दीपयत् Ms (3) The Ms omits the अनुस्वार (4) पङ्क्तिसंस्थ्या Ms. (5) पङ्क्तौ Ms.

(यां)[1] सङ्घायान्तरोपरचितायां[2] वर्तमानम्। कथम्—एकं बहूनां पदार्थानामेकं प्रकाशकं दीपकं केवलमित्युच्यते। यथा—

असारं संसारम्[3]

इत्यादि। अत्र 'विधातुं व्यवसितः' कर्ता संसारादीनामसारत्वप्रभृतीन् धर्मानुद्द्योतयन् दीपकालङ्कारतामासादयन्। षड्विधसंख्यम्—भूयांसि बहूनि वस्तूनि दीपकानि भूयसां प्रभूतानां वर्षीयसां सन्ति[4] वा क्वचिद् भवन्ति या कस्मिंश्चिद्विषये। As an instance of this he cites two Prakrit verses, one of which चन्दनमअणहिं is quoted in *Dhvanyāloka* p. 109 and by Hemacandra p. 254. The first of these verses may be conjecturally restored as follows :

कइकेसरी वअणाण मोत्तिअरअणाण आइवेअडिक्कः।
ठाणाठाणं जाणइ कुसुमाण अ जोव्वणमालारो[5] ॥

With regard to the subdivision of षड्विधसंख्य variety (which would correspond to मालादीपक of later writers), the passage is not clear ; but it appears to have been subdivided again into three kinds (त्रिप्रकारम्). The *kārikā* on this point cannot be restored, but it is explained in the *vṛtti* in this way : यदपरं षड्विधसंख्यं

(1) Ms. reads : कलुअअरं०. The emendation is conjectural. (2) सङ्घालरी पोरचिताया० Ms. (3) Already cited at p. 12 from मालतीमाधव. (4) वसि Ms. (5) The कारा would be :

कविकेसरी वअणाण मौक्तिकरत्नानां आदिवैकटिक.।
स्थानास्थानं जानाति कुसुमानां च यौवनमालाकारः ॥

The reading of the Ms is :

कविकेसरा एकाण मौक्तिरअणाण आइवेअडि।
जाणिठ्ठीणं जाणाइ कुसुमाण अ जोव्वणमालारीउ ॥

नाम·····कारणात् त्रिप्रकारम्। त्रयः प्रकाराः प्रभेदा यस्येति विग्रहः। तत्र प्रथमस्तावदनन्तरोक्तो 'भूयांसि भूयसां क्वचिद् भवन्ति' इति। द्वितीयो—दीपकं दीपयत्यन्यत्रान्यदिति, (अ)न्यस्यातिशयोत्पादकत्वेन दीपकम्। यद्दीपितं[1] तत्कर्मभूतमन्यत् कर्तृभूतं दीपयति प्रकाशयति तदप्यन्यद्दीपयतीति। As an instance of the second variety (which was probably named दीपकदीपक as distinguished from the third variety दीपितदीपक), he cites :

द्वितीयदीपकप्रकारो यथा—

क्षोणीमण्डलमण्डनं नृपतयस्तेषां स्त्रियो भूषणं
ताः शोभां गमयत्यलंचयलमिदं प्रागल्भ्यतो राजते।
तद्भृत्यं[2] नयवर्त्मनस्तदपि च क्षीयैक्रियालङ्कृतं
बिभ्राणं यदियत्तया त्रिभुवनं क्षेत्तुं व्यवस्येदपि॥

अत्रोत्तरोत्तराणि पूर्वपूर्वपददीपकानि मालायां[3] कविनोपनिबद्धानीति[4]। यथा वा—

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः॥ (*Kirāta*° ii,32

यथा च—

चारुता वपुरभूषयदासाम् (*Śiśupāla*° x, 33)[5]

इत्यादि। तृतीयप्रकारोऽत्रैव श्लोकार्धे[6] 'दीपक'-स्थाने 'दीपित'मिति

(1) यद्दिष्टं Ms. (2) The Ms reads तद्दूष्यं and यदियत्तदा. Inspite of the emendations, the last two lines of this verse are still somewhat obscure in sense. Should we read चक्षोर्यक्रियाः ? In this case, we can retain तदा in यदियत्तदा. (3) मालतायां Ms. (4) कवितायमिवस्थेति Ms. (5) Already quoted above, i, 24. (6) i e in the कारिका. This makes it probable that this third variety of यद्दिष्टसंख्य दीपक was called दीपितदीपक as distinguished from the second variety which was probably called दीपकदीपक

पाठान्तरं विधाय व्याख्येयः। तदयमत्रार्थः—यद्दीपितं यदन्येन केनचिदुत्पादितातिशयं सम्पादितं वस्तु तत्कर्तृभूतमन्यद्दीपयदुत्तेजयति ……। यथा—

मदो जनयति प्रीतिम् (Bhāmaha ii 27) इत्यादि।

Kuntaka has already criticised this illustration of Bhāmaha; how is it that he cites it himself again? He answers the objection thus: ननु पूर्वाचार्यैश्चैतदेव पूर्वमुदाहृतं तदेव प्रथमं प्रत्याख्यायेदानीं समाहितमित्यभिप्रायो व्याख्यातव्यः। सत्यमुक्तम्। तदयं व्याख्यायते—क्रियापदमेकमेव[1] दीपकमिति तेषां तात्पर्यम्, अस्माकं पुनः कर्तृपदादिनिबन्धनानि दीपकानि बहूनि सम्भवन्तीति[2]।

Kuntaka concludes with a *kārikā* which can only be partially restored from the *vṛtti*:

यथायोगिक्रियापदं[3] मनःसंवादि तद्विदाम्।
वर्णनीयस्य विच्छित्तेः कारणं [वस्तुदीपकम्?]॥

The commentary on this is as follows: इदानीमेतदेवोपसंहरति—यथायोगिक्रियापदम् [इत्यादि]। यथा येन प्रकारेण युज्यते इति यथायोगि क्रियापदं यस्य तत्तथोक्तम्। तेन यथा सम्बन्धमनुभवितुं शक्नोति तथा दीपके क्रिया। तद्विदां काव्यज्ञानां मनसि संवदति चेतसि प्रतिफलति यत्तत्तथोक्तम्। तस्मादेव सहृदयहृदयसंवादमाहात्म्यात्[4] 'सुखमिन्दुः' इत्यादौ न केवल रूपकं [इति] यावत्।

(1) रूपापर० Ms. (2) Later writers, however, would probably regard Kuntaka's केवलदीपक as nothing more than कारकदीपक; and the first variety of पदिवस्थ as क्रियादीपक. (3) The metre here is defective. (4) ०संवादे० Ms

किं तारुण्यतरोः[1]

इत्येवमाद्यपि। तस्मादेव च सूक्ष्ममतिरिक्तं वा न किञ्चिदुपमानात् साम्यं तस्य निमित्तमिति सचेतसः प्रमाणम्। अन्यच्च कौट्टशम्—वर्णनीयस्य विच्छित्तेः कारणम्। वर्णनीयस्य प्रस्तावाधिकृतस्य पदार्थस्य विच्छित्तेरुपशोभायाः कारणं निमित्तभूतम्। न पुनर्जयत्व(?) प्रमेयत्वादि सामान्यम्। यस्मात् पूर्वोक्तलक्षणेन साम्येन वर्णनीयं सहृदयहारितामवतरति।

After this, Kuntaka proceeds to the treatment of *rūpaka*. In ii, 14 (यस्मूला सरसोल्लेखा) he has already indicated that *upacāra-vakratā* lies at the very root of this figure (यस्मादुपचारवक्रताजीवितमेतदलङ्करणं प्रथममेव समाख्यातम्—यस्मूला सरसोल्लेखा रूपकादिरलङ्कृतिरिति) ; but now he intends to deal with its varieties (एवं च रूपकादिसामान्यलक्षणमुल्लिख्य प्रकारपर्यालोचनेन तमेवोन्मीलयति) He accepts Bhāmaha's classification of the figure (ii, 22) into समस्तवस्तुविषय and एकदेशविवर्ति. The definition of *rūpaka* itself is not given here, but appears later after the treatment of *paryāyôkta*[2], although this should occur in the

The figure *rūpaka*

(1) Already cited above p. 60 (i, 92). (2) After the treatment of पर्यायोक्त, यत्पात: is marked in the Ms. After this comes रूपक. Possibly the leaves of the original Ms got displaced. There seems to be another lacuna after रूपक, as व्याजस्तुति which is taken up next, is not defined · and the illustration cited there applies to the latter figure (and not to the former)

present context[1]. The *kārikā* on *rūpaka*, given there, may be provisionally restored from the *vṛtti* thus :

उपचारैकसर्वस्वं [यत्र तत् ?] साम्यमुद्वहत् ।
यदपैयति रूपं स्वं वस्तु तद्रूपकं विदुः ॥

on which the commentary runs : रूपकं विविनक्ति—उपचारेत्यादि । वस्तु तद्रूपकं विदुः तद्वस्तु पदार्थस्वरूपं रूपकाख्यमलङ्कारं विदुः, जना इति [शेषः] । कीदृशम्—यदपैयतीत्या(दि यत्) कर्तृभूतमपैयति विच्यवयति । (किम्—स्व)मात्मीयं रूपम्, वा[क्य]स्य वाचकात्मकं परिस्पन्दम्, अलङ्कारप्रस्तावादलङ्कारस्यैव स्वसम्बन्धित्वात् । किं कुर्वत्[2]—साम्यमुद्व(हत्) समत्वं धारयत्[3] । उपचारैकसर्वस्वम्—उपचारस्तत्त्वाध्यारोपस्तस्यैकं सर्वस्वं केवलमेव जीवितम्, तन्निबन्धनत्वाद् उपचारैः प्रवृत्तेः । The commentary then adds : अन्यच्च किंरूपम्—मनःसंवादि तद्विदाम् । This phrase belongs really to the previous concluding *kārikā* on *dīpaka*[4]. The term साम्य must be qualified by उपचारैकसर्वस्व and mean from the context प्रतीयमानहृत्तिसाम्य (as in *dīpaka*).

The next half-*kārikā* probably reads :

समस्तवस्तुविषयमेकदेशविवर्ति च ।

(1) The author himself says : एकदेशवृत्तित्वमनेकदेशवृत्तित्वं च रूपकस्य दीपकेन सकाशाल्लक्ष्यतीति तदनन्तरमस्योपन्यासः कृतः, which explains the object of this particular order of treatment (2) कुर्वन् Ms. (3) धारयन् Ms. (4) It is probable that the folios of the original Ms got disarranged, causing this confusion to the scribe See above p. 184, foot-note 2.

which reproduces Bhāmaha ii, 22a. The first of these two varieties of *rūpaka* is thus explained : समस्तवस्तु विषयो यस्य तत्तथोक्तम् । तदयमत्रार्थः[1]—यत् सर्वाण्येव प्राधान्येन वाच्यतया सकलवाक्योपारूढान्यभिधेयान्यालङ्कार्यतया सुन्दरसपरिस्पन्दसमर्पणेन रूपान्तरापादनं गोचरो यस्येति । Illustration :

Its classification

मृदुतनुलतावसन्तः सुन्दरवदनेन्दुबिम्बसितपक्षः ।
मन्मथमातङ्गमदो जयत्यहो[2] तरुणतारुण्यः ॥

With regard to *ekadeśa-vivarti*, Kuntaka explains : अत्र पूर्वाचार्यैर्व्याख्यातम्—यथा यदेकदेशेन विवर्तते विघटते विशेषेण वा वर्तते तथोक्तम् इत्युभयथाप्येतदयुक्तं भवति । यदाक्यस्य यत्किंञ्चिदेव स्थाने स्वपरिस्पन्दसमर्पणात्मकरूपणमादधाति क्वचिदेवेति सदेकदेशविवर्तिरूपकम् । यथा—

तडिदलयकच्छाणां[3] बलाकामालभारिणाम्[4] ।
पयोमुचां ध्वनिर्धीरो[5] दुनोति मम तां प्रियाम्[6] ॥

अत्र विद्युदलयस्य कक्ष्यात्वेन, बलाकानां तन्मालात्वेन रूपणं विद्यते । पयोमुचां पुनर्दन्तिभावो नास्तीत्येक[देश]विवर्तिरूपकमल(ङ्कारः) । तदत्यर्थयुक्तियुक्तम्, यस्मादलङ्करणस्यालङ्कार्यशोभातिशयोत्पादनमेव प्रयोजनम्, नान्यत्किञ्चित् । यदुक्तम्—रूपकापेक्षया किञ्चिद्विलक्षणमेतेन यदि भण्यते तदेतस्य रूपकप्रकारान्तरतोपपत्तिः[7] स्यात्, तदेतदास्तां तावत् । प्रत्युत, कक्ष्यादिनिमित्तरूपणोचितमुख्यवस्तु-

(1) ०मत्रार्थो (corrupt) Ms. (2) जयति परीक्षकवरा० (corrupt) Ms. (3) तदिल्लयकच्चणां (corrupt) Ms. (4) बलोकामालतामालतारीणाम् Ms. (5) ०नारो धुनाति कमतां प्रियः Ms. (6) The verse is corrupt in Ms. It is quoted from भामह ii, 24. (7) ०क्षरसुपपत्तिः Ms.

विषये विघटमानत्वादलङ्कारदोषत्वं दुर्निवारतामवलम्बते। तस्मादन्यत्रैवैतदस्मात् समाधीयते। रूपकालङ्कारस्य परमार्थस्तावदयम्—यत् प्रसिद्धसौन्दर्यातिशयपदार्थसौकुमार्यनिबन्धनं वर्णनीयस्य वस्तुनः साम्यसमुल्लिखितं स्वरूपसमर्पणग्रहणसामर्थ्यमविसंवादि। तेन 'मुखमिन्दुः' इत्यत्र मुखमेव दुःसम्पाद्यते (१), तेन रूपेण विवर्तते। तदेवमयमलङ्कारः। As further instances he cites

हिमाचलसुतावक्त्रिगाढालि(ङ्गित)मूर्तये।
संसारमरुमार्गैककल्पद्रुभाय ते नमः[1] ॥

Also उपोद्बलेन already cited above (p. 175). As an instance of प्रतीयमानरूपक, is cited the verse लावण्यकान्तिपरिपूरित०, which Ānandavardhana (p. 110) quotes as his own. The topic appears to be concluded with the *kārikā* (restored conjecturally) :

नयन्ति कवयः काञ्चिदक्रमावरहस्यताम्।
अलङ्कारान्तरोल्लेखसहायं प्रतिभावशात् ॥

The commentary from which this is reconstructed is : तदेव विच्छिद्यान्तरेण विशिनष्टि—एतदेव रूपकाख्यमलङ्करणं काञ्चिदलौकिकीं वक्रभावरहस्यतां वक्रत्वपरमार्थतां नयन्ति प्रापयन्ति। तथोपनिबद्धानि यथा वक्रतां विच्छित्ति[2]···दिरूढिरमणीय तया तदेव तत्त्वं परं प्रतिभासते। कीदृशम्—अलङ्कारा(न्तरो)ल्लेखसहायम्। अलङ्कारान्तरस्यान्यस्य ससन्देहोल्लेखाप्रथतेः[3] उल्लेखः समुल्लेदः सहायः काव्यशोभातिशयोत्पादने सहकारो यस्य (तत्तथोक्तम्। का)व्यायन्ति—प्रतिभावशात् स्वशक्तेरायत्तत्वात्। तथाविधे

(१) ०इन्दा यथा मस Ms., also मर्तये for मूर्तये and संसारमरु० for संसारमरु० in Ms. (२) विच्छित्तिवैचित्र्यादिरूढि (३) ०अप्रथे Ms

लोककाव्यिकाव्यिगोचरे विषये तस्योपनिबन्धो[1] विधीयते। यत्र तथाप्रसिद्धाभावात् सिद्धव्यवहारावतरणं साङ्गसिकमिवावभासते विभूषणान्तरसङ्गायस्य पुनरुल्लेखत्वेन[2] विधीयमानत्वात् सङ्कदयहृदयसंवादसुन्दरो परा प्रौढिरुत्पद्यते। The verse किं तारुण्यतरोः (already cited above i, 92) and another half-verse (too corrupt in the text) are cited as illustrations.

Then comes the figure *aprastuta-praśaṃsā*, of which the *kārikā*, reconstructed, would be as follows :

अप्रस्तुतोऽपि विच्छित्तिं प्रस्तुतस्यावतारयन्।
यत्र तत्साम्यमाश्रित्य सम्बन्धान्तरमेव वा॥
वाक्यार्थोऽसत्यभूतो वा प्राप्यते वर्णनीयताम्।
अप्रस्तुतप्रशंसेति कथितासावलङ्कृतिः (?)॥

The *vṛtti* runs thus . एवं रूपकं विचार्य तदृशेन(?)सम्यग्विबन्धना[3]मप्रस्तुतप्रशंसां प्रस्तौति—अप्रस्तुतोऽपीत्यादि। अप्रस्तुतप्रशंसेति (कथिता साव)लङ्कृतिः—अप्रस्तुतप्रशंसेति नाम्ना[4] सा कथिता·····(अ)लङ्कारविच्छिरलङ्कृतिः। कीदृशो—यत्र यस्यामप्रस्तुतोऽप्यविवक्षितः पदार्थो वर्णनो(यतां) प्रति[5] प्राप्यते वर्णनाविषयः सम्पाद्यते। किं कुर्वन्—प्रस्तुतस्य विवक्षितार्थस्य विच्छित्तिसुषमाभमवतारयन् समुल्लासयन्। द्विविधो हि प्रस्तुतः पदार्थः सम्भवति—वाक्यान्तर्भूतपदमात्रनिबद्धः, सकलवाक्यव्यापककार्यो विविधरसपरिस्पन्दातिशयविधिष्टप्राधान्येन वर्तमानः [च]। तदुभयरूपमपि प्रस्तुतं प्रतीयमानतया चेतसि विधाय पदार्थान्तरम-

(1) ०निबन्धो Ms. (2) Ms is corrupt here and reads पुनरुल्लेदयेन (?). (3) ०निबन्धनाम० Ms. (4) नामा Ms. Or is it प्रमाणा ? (5) This word seems to be redundant.

प्रस्तुतं तद्दिच्छित्तिसम्पत्तये वर्णनीयतामस्यामलङ्कृतौ कवयः प्रापयन्ति। किं कृत्वा—तस्यास्यमाश्रित्य। तदनन्तरोक्तं रूपकालङ्कारोपकारि साम्यं समत्वं निमित्तीकृत्य। सम्बन्धान्तरमेव वा[1] निमित्तभावादि संश्रित्य। वाक्यार्थोऽसत्य(भू)तो वा—परस्परान्वयपदसमुदायलक्षणवाक्यार्थो[2] [ऽसत्य?]भूतः। साम्यं सम्बन्धान्तरं वा समाश्रित्याप्रस्तुतं प्रस्तुतशोभाये वर्णनीयतां यत्र नयन्तीति।

As an instance of साम्यसमाश्रयणाद्वाक्यान्तर्भूतप्रस्तुतपदार्थप्रशंसा he cites लावण्यसिन्धुरपरैव, already quoted in *Dhvanyāloka* p. 205. As to साम्यश्रयणात् सकलवाक्यव्यापकप्रस्तुतपदार्थप्रशंसा, which constitutes the second variety, the following illustration is given (= *Subhāṣitāvali* 821) :

छाया नाम्न एव या कथमसावस्यास्य (निग्र)ग्रहा
यौष्मोष्मापदि शीतलस्खलभुवि स्वर्गोऽनिलादेः कृतः।
वार्ता वर्षशतैरनेकलवलं[3] भावीति वार्तैव सा
द्राघिम्णा मुषिताः कियच्चिरमहो तालेन बाला वयम्॥

With regard to two such varieties due to सम्बन्धान्तराश्रयण, the example of वाक्यान्तर्भूतप्रस्तुतपदार्थप्रशंसा is the verse दृन्दुलिप्त द्वाक्षनेन from *Bāla-rāmāyaṇa* i, 42. The example of सकलवाक्यव्यापकप्रस्तुतप्रशंसा under this head is as follows :

(1) These three words are repeated in Ms. (2) The Ms. reads वलक्षणवाक्यकार्थभूत, which is not intelligible in the context (3) The सुभाषितावलि reads वर्षशते गते किल फलं But the word लवल may here mean 'the fruit of the लवली creeper'. The emendation लवनं (= mowing) is easy, but does not appear to be necessary.

परावृत्यति सायकं क्षिपति लोचनं[1] कार्मुके
विलोकयति वल्लभां स्मितसुधार्द्रवक्त्रां खरः[2] ।
मधोः किमपि भाषते भुवननिर्जयाय[3] प्रभावनिं
गतोऽहमिति (हर्षितः) स्पृशति गोपलेखामहो ॥

Here, the *vṛtti* explains, the अप्रस्तुत is मन्मथचेष्टातिशय, while the प्रस्तुत refers to तरुणीतारुण्यावतार. For the example of असत्यभूतवाक्यार्थतात्पर्यात्प्रस्तुतप्रशंसा, a Prakrit verse is cited, which, however, is too corrupt in the Ms to be properly restored. Kuntaka concludes this topic with the remark : तदेवमयमप्रस्तुतप्रशंसाव्यवहारः कवीनामतिविततप्रपञ्चः परिदृश्यते । तस्मात् सहृदयेन स्वयमेवोन्नेयः । प्रशंसाशब्दोऽत्र अर्थप्रकाशादिवद्(?) विपरीतलक्षणया वर्तते ।

Then the figure *paryāyôkta* is introduced. The *kārikā* reconstructed would be as follows :

The figure *paryayokta*

यदाक्यान्तरवक्तव्यं तदन्येन समर्प्यते ।
येनोपशोभानिष्पत्त्यै पर्यायोक्तं तदुच्यते ॥

This is explained thus : एवमप्रस्तुतप्रशंसां विचार्य विवक्षितार्थप्रतिपादनाय प्रकारान्तराभिधानत्वादनयैव समानप्रायं पर्यायोक्तं विचारयति—यदाक्यान्तरेत्यादि । पर्यायोक्तं तदुच्यते—पर्यायोक्ताभिधानमलङ्करणं तदभिधीयते । कीदृशम्—यदाक्यान्तरवक्तव्यं वस्तु वाक्यार्थलक्षणं पदसमुदायान्तराभिधेयं तदन्येन वाक्यान्तरेण येन समर्प्यते प्रतिपाद्यते । किमर्थम्—उपशोभानिष्पत्त्यै विच्छित्तिसम्प-

(1) लोभनं Ms. (2) खरम् Ms. (3) ०निर्जयायावनिं Ms.

त्तये। तत्पर्यायोक्तमित्यर्थः। तदेवं पर्यायवक्रत्वात् किमतिरिच्यते? पर्यायवक्रत्वस्य पदार्थमात्रं वाच्यतया विषयः, पर्यायोक्तस्य वाक्यार्थोऽप्यङ्गतयेति तस्मात् पृथगभिधीयते। उदाहरणं यथा (quoted also in *Dhvanyāloka* p. 89) :

चक्राभिघातप्रसभाज्ञयेव चकार यो राहुवधूजनस्य।
आलिङ्गनोद्दामविलासव(न्धं रनोत्सवं चुम्बनमात्रशेषम्)॥

After this, there is a gap in the Ms marked with अत्र ग्रन्थपातः। This is followed by the treatment of *rūpaka*, which we have already quoted above. The verse which follows this is, however, not an instance of *rūpaka* but of *vyājastuti*, the treatment of which is thus also apparently lost in the Ms (though not marked as such in the Ms). The verse is as follow :

भूभारोद्वहनाय शेषशिरसां सार्थेन[1] सञ्चारतः
विश्वस्य स्थितये स्वयं स भगवान् जागर्ति देवो हरिः।
अद्याप्यत्र च नाभिमानमसमं राजंस्त्वया तन्वता[2]
विश्रान्तिः[3] क्षणमेकमेव न तयोर्जातेति कोऽयं क्रमः॥

Other examples cited are इन्दोर्लेखा (already quoted p.169), हे हेलाजित (cited at p. 59 ; i, 90) and नामान्यतरोः (already cited p 59 ; i, 91).

This is followed by the treatment of *utprekṣā*, on which the three *kārikās*, would read as follows, when reconstructed :

The figure *utprekṣā*

(1) सार्थेन Ms. (2) नत्वता Ms. (3) The विसर्ग is omitted in the Ms.

सम्भावनानुमानेन सादृश्येनोभयेन वा ।
निबेर्ध्यातिशयोद्रेकप्रतिपादनवाञ्छया ॥
वाच्यवाचकसामर्थ्यक्षिप्तस्यार्थस्यादिभिः ।
तदिवेति तदेवेति वादिभिर्वाचकं विना[1] (१) ॥
समुल्लिखितवाक्यार्थव्यतिरिक्तार्थयोजनम् ।
उत्प्रेक्षा ॥

The commentary explains : सम्भावनेत्यादि । समुल्लिखितवाक्यार्थव्यतिरिक्तार्थयोजनम् उत्प्रेक्षा । समुल्लिखितः सम्यगुल्लिखितः स्वाभाविकत्वेन समर्पयितुं प्रस्तावितो[2] वाक्यार्थः पदसमुदायोऽभिधेयवस्तु तस्माद् व्यतिरिक्तस्यार्थस्य वाक्यान्तरतात्पर्यलक्षणस्य योजनमुपपादं उत्प्रेक्षाभिधानमलङ्करणम् । उत्प्रेक्षणमुत्प्रेक्षेति विग्रहीते । किं[3] साधनेनेत्याह—सम्भावनानुमानेन[4] । सम्भावनया यदनुमानं सम्भाव्यमानस्य.....तेन । Then it proceeds : प्रकारान्तरेणाप्येषा सम्भवतीत्याह—सादृश्येनेति । सादृश्येन साम्येनापि हेतुना समुल्लिखितवाक्यार्थव्यतिरिक्तार्थयोजनमुत्प्रेक्षैव । द्विविधं सादृश्यं सम्भवति—वास्तवं काल्पनिकं च । तच्च वास्तवमुपमादिविषयम् । काल्पनिकमिहाश्रीयते । Then it goes on after a few corrupt lines : प्रकारान्तरमस्याः प्रतिपादयति—उभयेन वा ।

(१) This line does not appear to be explained in the following वृत्ति ; but its presence in the कारिका is indicated in the course of the discussion on वस्तालङ्कार० given below and by the वृत्ति on the next कारिका, which quotes this line The restoration of the कारिका is not satisfactory, as the वृत्ति has many *lacunae* and corrupt lines. The word उत्प्रेक्षा ought to have occurred in the कारिका, as it is explained in the वृत्ति, but possibly one whole line of the कारिका is missing.

(२) Ms. 3) न Ms. (4 एवम्भावनानुमानेन Ms.

सम्भावनानुमानेन सादृश्यलक्षणेनोभयेन वा कारणद्वितयेन संबलित-वृत्तिना प्रस्तुतव्यक्ति(क्रियार्थी)न्तरयोजनम्। उत्प्रेक्षाप्रकार[स्य] तृतीय-स्याप्यस्य केनाभिप्रायेणोपनिबन्धनमित्याह—निर्वर्ण्यातिशयोद्रेकप्रति-पादनवा(ञ्छ)या वर्ण्यनीयोत्कर्षी(क्रोष)समर्पणाकाङ्क्षया। कथम्—तदिवेति तदेवेति वा द्वाभ्यां प्रकाराभ्याम्। तदिव अप्रस्तुतमिव, तद-तिशयप्रतिपादनाय प्रस्तुतसादृश्योपनिबन्धः। तदेवेत्यप्रस्तुत[मेवेति] तत्स्वरूपप्रसारणपूर्वकं प्रस्तुतस्वरूपसमारोपः। प्रस्तुतोत्कर्षधाराधि-रोहप्रतिपत्तये तात्पर्यान्तरयोजनम्। कैर्वाक्यैरुत्प्रेक्षा प्रकाश्यते [इ]त्याह—इवादिभिः। इवप्रभृतिभिः शब्दैर्यथायोगं प्रयुज्यमानै-रित्यर्थः। न चेदिति पक्षान्तरमभिधत्ते—वाच्यवाचकसामर्थ्यक्षिप्त-स्वार्थैः। तैरेव प्रयुज्यमानैः, प्रतीयमानवृत्तिभिर्वा। Example of सम्भावनानुमानोत्प्रेक्षा—

आपीडलोभादुपकर्णमेत्य प्रत्याहितः[1] पांशुयुतैर्हरिद्भैः।
अस्यास्यमानेव(?)[2] महीपतीनां सम्मोहमन्त्रो[3] मकरध्वजेन॥

काल्पनिकसादृश्योदाहरणम्, यथा

राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः (*Meghadūta* 58

यथा वा

निर्मोकमुक्तिरिव [या] गगनोरगस्य॥ इत्यादि।

The वास्तवसादृश्योदाहरण is a Prakrit verse which can not be reconstructed from the Ms. So is the Prakrit verse given as उभयोदाहरण. The following verse is also quoted as an example of वास्तवसादृश्योत्प्रेक्षा—

(1) प्रत्याहितो Ms. (2) अस्यास्यमानेव would be a conjectural emendation: but it is not clear whether the kind of उत्प्रेक्षा illustrated by Kuntaka requires a वाचक like इव or not. The difficulty would perhaps be removed by reading अस्यमानेव. (3) °मन्त्र Ms.

उत्फुल्लचारुकुसुमस्तवकेन नम्रा[1]
येयं धृता रुचिरचूतलता मृगाक्षी ।
शङ्के न वा विरहिणीमृदुमर्दनस्य
मारस्य तर्जितमिदं प्रतिपुष्प चापम् ॥

Then : तदेवैलक्षण्य वादिभिर्विनोदाहरणम्, यथा

चन्दनासक्तभुजगनिःश्वासानिलमूर्छितः ।
मूर्छयत्येष[2] पथिकान् मधौ[3] मलयमारुतः[4] ॥

यथा वा—देवि त्वन्मुखपङ्कजेन (from *Ratnāvalī*, already cited above p. 99) इत्यादि । यथा वा—त्वं रक्षसा भीरु[5] (from *Raghu*°, already cited above p. 115) । तदेवैलक्षण्य वाचकं विनोदाहरणम्, यथा—एकैकं दलम् (already cited from *Bāla-rāmā*° vii, at p. 66, no. 102, above).

Then the author goes on to deal with another variety of उत्प्रेक्षा, the *kārikā* on which may be reconstructed as follows :

प्रतिभासात्तथा बोद्धुः स्वस्यन्दमहिमोचितम् ।
वस्तुनो निष्क्रियस्यापि क्रियायां कर्तृतार्पणम् ॥

explained as : तदिदमपरमुत्प्रेक्षायाः प्रकारान्तरं परिदृश्यते—प्रतिभासादित्यादि । क्रियायां साध्यस्वरूपायां कर्तृतारोपणं स्वतन्त्रत्व-समारोपणम् । कस्य—वस्तुनः पदार्थस्य निष्क्रियस्य क्रियाविरहित-स्यापि । कीदृशम्—स्वस्यन्दमहिमोचितम् । तस्य पदार्थस्य यः स्वस्यन्द-महिमा स्वभावोत्कर्षस्तस्योचितमनुरूपम् । कस्मात्—बोद्धुरनुभवितु-

(1) The Ms reads पुम which is corrupt and contrary to metre. (2) मूर्छयत्येष Ms. (3) पथिकानमधौ Ms. (4) The verse is quoted anonymously in ध्वन्यालोक p 113 (5) सं रक्षसाभीरु Ms.

स्तथा तेन प्रकारेण प्रतिभासादवबोधात्[1] । 'निर्वर्ण्यातिशयोद्रेकप्रतिपादनवाञ्छया' 'तदिवेति तदेवेति वादिभि[र्वाचकं] विना' इति[2] पूर्ववदिहापि सम्बन्धनीये । उदाहरणं यथा—

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः । (Dandin ii, 226)[3]

यथा वा—तरङ्गैरिवाङ्गानि सखलदमललावण्यजलधो (already quoted above p. 119). The third example is corrupt and fragmentary in the Ms. Regarding this variety, Kuntaka goes on to remark : अत्र दण्डिना विच्छित्तिमिति न पुनर्विधीयते. Here a concluding *antara-śloka* is quoted :

अयद्दत्यान्यालङ्कारलावण्यातिशयश्रियः ।
उक्ते चा प्रथमोन्मेषजीवितत्वेन जृम्भते । इत्यन्तरश्लोकः ।

The *atiśayokti* is then taken up. The *kārikā*, reconstructed, appears to be as follows :

The figure *atiśayokti*

यस्यामतिशयः कोऽपि विच्छित्त्या प्रतिपाद्यते ।
वर्ण्यमानस्य धर्माणां तद्विदाह्लाददायिनाम् ॥

on which the commentary runs thus : एवमुक्त्वा व्याख्याय सातिशयत्वसादृश्यसमुल्लसितावसरामतिशयोक्तिं प्रस्तौति—यस्यामित्यादि ;.....सातिशयोक्तिरलङ्कृतिरभिधीयते । कीदृशी—यस्यामतिशयः प्रकर्षैकाग्र्याधिरोहः कोऽप्यतिक्रान्तप्रसिद्धव्यवहारसरणिः[4] विच्छित्त्या प्रतिपाद्यते वैदग्ध्याभङ्ग्या समर्प्यते । कस्य—वर्ण-

(1) प्रतिभासना० Ms. (2) वाचेति for विनेति Ms. (3) This verse occurs also in सरस्वतीकण्ठाभरण (ed. Nir. Sag. Press., 1916. i, 34), भावप्रकाश (i, 19) and भावविलास (i, 15). Also quoted in सुभाषितावलि 1890 and शार्ङ्गधरपद्धति 3603 and attributed therein to विक्रमादित्य and भर्तृमेण्ठ. (4) ०पथिव्यवहार० Ms.

नीयस्य धर्मिणाम्, प्रस्तावाधिकृतस्य वस्तुनः[1] स्वभावानुसम्बन्धिनां परिस्पन्दानाम्। कौटस्थानाम्—तद्विदाह्लाददायिनाम्, काव्यविदानन्दकारिणाम्। यश्चास्यहृदयह्लादकारि स्वस्पन्दसुन्दरत्वमेव वाक्यार्थः, तत्स्वदतिशयपरिपोषिकायामतिशयोक्तावलङ्कारकृतः कृतादराः।

As instances, five verses are quoted and discussed, among which occur Bhāmaha ii, 82 :

स्वपुष्पच्छविहारिस्वचन्द्रहासा तिरोहिताः।
अन्वमीयत भृङ्गालीवाचा मत्तच्छदद्रुमाः॥

and *Kumāra*[9] viii, 62 (शक्यमोषधिपतेर्नवोदयाः). Of the other two verses, one may be restored thus :

यस्य प्रोच्छ्वसति[2] प्रतापपवने तेजस्विनोमित्यलं[3]
लोकालोकधराधरावलि यशःशीतांशुबिम्बे[4] प्रथा[5]।
त्रैलोक्यप्रथितावदानमहिमश्रोणीशवंशोद्भवौ[6]
सूर्याचन्द्रमसौ स्वयं तु[7] कुशलच्छायां[8] समारोहतः॥

The figure *upamā*

After this, Kuntaka proceeds to deal in detail with *upamā*, which is one of the most important poetic figures of the Sanskrit theorists : but unfortunately the Ms in this part is hopelessly corrupt and imperfect, and it is not possible to follow his treatment properly or

(1) Ms reads सम्बन्धिनां after वस्तुनः and before स्वभावानुसम्बन्धिनां. (2) यस्य प्रकाशति in Ms, contrary to metre. (3) तेजस्विनोमित्यलं Ms. (4) यशः for यश. in Ms. (5) यथा Ms. (6) ॰प्रथितावदानमहिमा Ms. (7) स्वरम Ms. (8) For the sense सकलच्छायां would be better reading.

give consistent extracts. It is difficult to reconstruct the missing *kārikā*, but it may tentatively be put as follows :

विवक्षितपरिस्पन्दमनोहारित्वसिद्धये ।
वस्तुनः केनचित् साम्यं तदुत्कर्षवतोपमा ॥
तां साधारणधर्मोक्तौ वाक्यार्थे वा तदन्वयात् ।
इवादिरपि विच्छिद्य यत्र वक्ति क्रियापदम् ॥

So much of the commentary as can be restored may be given here : इदानीं साम्यसमुल्लासिनो विभूषणवर्गस्य विन्यासविच्छित्तिं विचारयति—विवक्षितेत्यादि । यत्र यस्य(१) वस्तुनः प्रस्तावाधिकृतस्य केनचिदप्रस्तुतेन पदार्थान्तरेण साम्यं सादृश्यं सोपमा उपमालङ्कृतिरूपमित्युच्यते[1] । किमर्थमप्रस्तुतेन साम्यमित्याह—विवक्षितपरिस्पन्दमनोहारित्वसिद्धये । विवक्षितो वक्तुमभिप्रेतो योऽसौ परिस्पन्दः क्वचिदेव धर्मविशेषस्तस्य मनोहारित्वं हृदयरञ्जकत्वं तस्य सिद्धिर्निष्पत्तिस्तदर्थम् । कीदृशेन पदार्थान्तरेण[2]—तदुत्कर्षवता । तदिति मनोहारित्वं परामृश्यते । तस्योत्कर्षः सातिशयत्वं नाम तदुत्कर्षः, स विद्यते यस्य स तथोक्तस्तेन तदुत्कर्षवता । तदिदमत्र तात्पर्यम्—वर्णनीयस्य विवक्षितधर्मसौन्दर्यसिद्ध्यर्थं प्रस्तुतपदार्थधर्मिणो[3] वा साम्यं युक्तियुक्ततामर्हति । धर्मेणेति नोक्तं केवलस्य तस्यासम्भवात् । तदेवमयं धर्मद्वारको धर्मिणोरुपमानोपमेयलक्षणयोः फलतः साम्यसमुच्चयः पर्यवस्यति । अस्याम् (?) एवंविधामुपमां वः प्रतिपादयतीत्याह—क्रियापदमित्यादि[4] । क्रियापदं धात्वर्थः । वाच्यवाचकसामान्यमात्रमत्राभिप्रेतम्, न पुनराख्यातपदमेव । यस्मादमुख्यभावे-

(१) सोपा० (for उपमा) in Ms. (२) कीदृशो नवमर्थान्तरेण in Ms. (३) प्रस्तुं in Ms. (४) ०त्यादौ Ms.

नापि[1] यत्र क्रिया वर्तते तदप्युपमावाचकमेव।·····तदेवमुभयरूपमपि क्रियापरिस्पन्द(:)[2]·····तामुपमां वस्त्वभिधत्ते। कथम्—विच्छित्त्या, वैदग्ध्यभङ्ग्या। विच्छित्तिविरहेणाभिधानेन तद्विदाह्लादकत्वं न सम्भवतीति भावः। तावत् क्रियापदं न केवलं तां[3] वक्ति यावद् इवादिः[4] इवप्रभृतिरपि। तत्समर्पणसामर्थ्यसमन्वितो यः कश्चिदेव शब्दविशेषः प्रत्ययोऽपि सप्रासो बहुव्रीह्यादिः[5]·····विच्छित्त्या तां वक्तीत्यपिः समुच्चये। कस्मिन् सति—साधारणधर्मोक्तौ। साधारणः समानो यो साध्योपमानोपमेययोरुभयोरनुयायिनो धर्मः[6]···। कुत[7]—वाक्यार्थे वा। परस्परान्वयसम्बन्धेन पदसमूहो वाक्यं तदभिधेयं वा वस्तु, विभूष्यत्वेन विषयगोचरं तस्याः[8]। कथम्—तदन्वयात्। तदिति पदार्थपरामर्शः। तेषां पदार्थानां समन्वयाद् अन्योन्यमभिसम्बन्धत्वात्। वाक्ये बहवः पदार्थाः सम्भवन्ति, तत्र परस्पराभिसम्बन्धमाहात्म्यात्।

Then he goes on to distinguish the sphere of this figure from that of *utprekṣā* by a half-*kārikā* as follows: तदेवं तुल्येऽस्मिन् वस्तुसाम्ये सत्युपमोत्प्रेक्षावस्तुनोः पृथक्त्वम् इत्याह—

उत्प्रेक्षावस्तुसाम्येऽपि तात्पर्यगोचरो मतः।

The phrase तात्पर्यगोचरो (which alone can be

(1) ०मावो नापि Ms. (2) The text is corrupt here and reads क्रियापरिस्पन्दस्पन्दीवदतामुपमां etc. (3) केवलता Ms. (4) यावदेवादिः Ms. (5) The text is corrupt here. The whole passage from तदेवमुभयरूपमपि to साध्योपमानोपमेययोः is repeated in the Ms, and the text is neither consistent nor correct (6) The text reads उभयोरनुयायिनः धर्मोक्तयोः क्रियया; कर्मभेदेन सम्बन्धस्योपमा. (7) तत: in Ms. (8) विषयो गोचरः परस्परा in Ms.

rescued from the corrupt text) is explained as तात्प
पदार्थव्यतिरिक्तइक्ति वाक्यार्थजीवितभूतं वस्त्वलङ्कारमेव गोचरो विष
स्तदिदमन्तःप्रतिभासः । As an instance of उपमा due t
असुख्यक्रियापदपदार्थे, the following verse is given :

पूर्णेन्दोस्तव[1] संवादि वदनं वनजेक्षणे ।
पुष्णाति मुग्धचापस्य जगत्त्रयजिगीषुताम् ॥

Then, इवादिप्रतिपाद्यपदार्थोपमोदाहरणम् । यथा

निपीयमानस्तवका श्लिलीमुखैः (already cited p. 73

इत्यादि । आख्यातपदप्रतिपाद्यपदार्थोपमोदाहरणम्, यथा

ततोऽरुणपरिस्पन्द (already cited p. 11)

इत्यादि । तथाविधत्वाद्वाक्योपमोदाहरणम्, यथा

मुखेन सा कैतकपत्रपाण्डुना क्षणाङ्कयष्टिः परिमेयभूषणा ।
स्थितात्पतारां तरुणेन्दुमण्डलां विभातकल्पां रजनीं व्यडम्बयत्[2]

इत्यादि । अप्रतिपाद्यपदार्थोदाहरणम्, यथा

चुम्बत्कपोलतलसुत्पलकं प्रियायाः
सद्योज्झितशयनमामुकुलोचकार ।
आविर्भवन्मधुरनिद्रमिवारविन्द-
(मिन्दीवरं प्रशिथ)[3]मितमुत्पलमुत्पलिन्याः ॥

तथाविधवाक्योपमोदाहरणम्, यथा

षड्ढोऽयमंसार्पितलम्बहारः etc. (*Raghu*° vi, 60).

After discussing these examples, he says : आदि
ग्रहणाद् इवादिव्यतिरिक्तेनापि तथादिशब्दोत्तरेणोपमाप्रतीतिर्भवतीति

(1) पूर्णेंदो० Ms. (2) विडम्बयत् in Ms (3) मिन्दयश्च Ms. Our emen
dation is conjectural.

The following is probably an example of the figure as involving *samāsa* :

पूर्णेन्दुकान्तिवदना नीलोत्पलविलोचना ।

Then the verse यान्त्या मुहुर्वलितकन्धरमाननं from *Mālatīmādhava* i, 28, माच्छिद्दोक्षतपट्टसूत्रसदृशः from *Bāla-rāmāyaṇa* iii, 10, रामेण मुग्धमनसा हृयमध्वजस्य from *Bāla-rāmāyaṇa* iii,80, and महीभृतः पुत्रवतोऽपि दृष्टिः from *Kumāra*° i, 27 are cited. In the last of these verses Kuntaka admits that there is अर्थान्तरन्यासभ्रान्तिः. There are two other verses, इत्याकर्णितकाञ्चनेमिवचः(नो) and इतोद्-माकर्ण्य तपस्विकन्या, which cannot be restored.

The figure *prativastūpamā*.

Kuntaka considers the question as to whether it is necessary to regard प्रतिवस्तूपमा as a separate figure or include it in *upamā* : समासवस्तुन्यासोपनिबन्धनं प्रतिवस्तूपमापि न पृथग् वक्तव्यतामर्हति, पूर्वोदाहरणेनैव समानयोगक्षेमत्वात्. Then citing Bhāmaha's definition and example of *prativastūpamā* (ii, 34 and 36 respectively), he remarks :

कियन्तः सन्ति गुणिनः साधुसाधारणप्रियाः ।
स्वादुचारुफला नम्राः कियन्तो वाध्वगाखिनः ॥
(Bhāmaha ii, 36)

अत्र समानविलसितानामुभयेषामपि कविविवक्षितविरलत्वलक्षणसाम्य-व्यतिरेकि[न] किञ्चिदन्यमनोहारि जीवितमसिरिच्यमानमुपलभ्यते ।

Kuntaka, however, would in the same way regard उपमेयोपमा and तुल्ययोगिता as figures not separate

but included in *upamā*. He proceeds : तदेवं प्रतिवस्तूपमायाः प्रतीयमानोपमायामन्तर्भावोपपत्त्यौ सत्यामिदानीमुपमेयोपमादेरुपमायामन्तर्भावो विचार्यते. He says[1] that *upameyopamā* is nothing different (सामान्या, न व्यतिरिक्ता) from *upamā*, on the ground लक्षणानन्वयाख्यितेः (explained as तत्स्वरूपाभिधानं लक्षणं तस्यानन्वयाख्यितेः अतिरिक्तभावेन नावस्थानात्), for here only the उपमेय and उपमान become respectively उपमान and उपमेय. Similar remarks, he says, apply to *tulyayogitā* (सा भवत्युपमितिः स्फुटम्[2]), because of the साम्यातिरेक between the two objects, each of which is मुख्यतया वर्ण्यमानं वस्तु. The examples given of *tulyayogitā* are जनस्य साकेतनिवासिनस्तौ from *Raghu*° v, 31 and उभौ यदि व्योम्नि from *Śiśu*° iii, 8. In the same way, Kuntaka thinks that the *ananvaya*, in which there is a काल्पनिक उपमान, does not require a separate definition. The verse cited as an illustration of the figure is corrupt in the Ms, but may be restored as follows :

The figures *ananvaya* and *tulyayogitā*.

तत्पूर्वानुभवे भवन्ति लघवो भावाः प्रयाकाद्य-
स्तद्वत्तीपमितेः परं परिणमेच्चेती रसायाम्बुजात्[3] ।
एवं निश्चिनुते मनस्तव मुखं सौन्दर्यसारावधि
वक्त्रा[ति] व्यवसायमेतुमुपमोत्कर्षे[4] स्वकान्त्या[5] स्वयम् ॥

(1) The कारिकास on these two figures I have not been able to restore from the वृत्ति. (2) This appears to be a fragment of the missing कारिका. (3) चेतश्शाम्बुजवत् Ms. (4) °इपमोत्कर्षा Ms. (5) स्वकान्तेः Ms.

On this Kuntaka remarks : तदेवमभिधावैचित्र्यप्रकाराणामेवंविधं वैश्वरूप्यम्, न पुनर्लक्षणभेदानाम्। In this connexion he quotes Bhāmaha's definition and illustration of *tulyayogitā* (iii, 26, 27). It is noteworthy that the verse शेषो हिममिरित्थं च, which Bhāmaha gives as an illustration of the figure and which Kuntaka criticises, is also quoted in *Dhvanyāloka* iv, 4 (p. 236). Kuntaka explains that with Bhāmaha's definition also, the *tulyayogitā* falls within the province of *upamā* (उक्तलक्षणे तावदुपमास्वर्भावस्तुल्ययोगितायाः).

The figure *nidarśana*, in Kuntaka's opinion, may similarly be included in *upamā* : निदर्शनमप्येवंप्रायमेव. He quotes and discusses an instance of it running as follows :

The figure *nidarśana*

यैर्वा दृष्टा न वा दृष्टा[1] सुषिताः सममेव ते।
हृतं हृदयमेतेषामन्येषां चक्षुषः फलम्[2] ॥

He also quotes only two lines of a *śloka*

यत्काव्यार्थनिरूपणं प्रियकथालापा रहोऽवस्थितिः
कण्ठान्तं मृदुगीतमाहृतसुहृद्दुःखान्तरावेदनम्[3]।

(1) The reading here is corrupt in Ms. (2) सुभाषितावलि 1254 (धनदेवस्य) = शार्ङ्गधरपद्धति 3368 (प्रभाकरदेवस्य) = सूक्तिमुक्तावलि P 65b (प्रभाकरदेवस्य) = सदुक्तिकर्णामृत ii, 494 (अन्यत्र) = Hemacandra, इति p. 256 (anon) = कवीन्द्रवचन० 248 (anon). (3) •वेदनम् Ma.

as well as Bhāmaha's definition and illustration (ताम्बूलरागवलयं) of *ananvaya*, iii 44-45. The comment which follows is corrupt and difficult to reconstruct. Then comes the quotation तद्वल्कुना युगपदुच्छ्वसितेन तावत् from *Raghu*° v, 68, and another corrupt verse, beginning with हेलावभग्नहरकार्मुक एष सोऽपि. probably from some lost Rāma-drama.

Taking up the figure *parivṛtti* after this, Kuntaka says : परिवृत्तिरप्यनेन न्यायेन पृथङ् नास्तीति निरूप्यते. In his opinion, it is, like the figures discussed above, nothing more than a variety of *upamā* ; because in it, the two objects are each described principally and the साम्यप्रतीति is clear. The missing *kārikā* on this and its *vṛtti*, reconstructed, would run thus :

The figure *parivṛtti*

विनिवर्तनमेकस्य यत्तदन्यस्य वर्तनम् ।
न परिवर्तमानत्वादुभयोरत्र(?) पूर्ववत् ॥

